नं: १३३ - घ

सिद्धान्तकौमुदी

व्याख्या बृहच्छब्देन्दुशेखरः

खण्डित

पत्राणि १६०
६००

नं० १३३-घ
सिद्धान्तकौमुदी
व्याख्या
बृहच्छब्देन्दुशेखरः
(खण्डित)
पत्राणि १६० -क
६६०

पत्राणि १६० -क
६००

प्रयत्नो द्विधेति क्वचित्तु यत्नो द्विधेत्येव पाठः चतुर्धेति प्रकृः स्पृष्टाणामूष्माणां चैव विवृतं करणं स्मृतं तेभ्योऽपि विवृता
वेङौ ताभ्यामैचौ तथैव चेति शिक्षावाक्यात् विवृततरः विवृततमश्च यत्नयोरपि प्रतीयमानत्वेन नाज्झलाविति स
त्रभाष्यग्रहणार्थं ईषद्विवृततरत्वस्य प्रतीयमानत्वेन चतुर्धेत्यसंगतम् किं चैवं सत्येङैचोः सावर्ण्यस्य प्रसक्तेरे
वाभावेन तदर्थं तत्प्रत्याख्यानानुसरणमपि व्यर्थमिति तन्न नाज्झलाविति सूत्रे वैयर्थ्यापत्त्या सूत्रकारेण विवृ
ततत्वाख्यानामेचां सवर्णसंज्ञाननुप्रयुक्तत्वबोधनात् नचैवं संवृतकथनमधिकं अ अ इति पाणिनीयशास्त्र
विधेयत्वेन तत्कथनात् यदि तु सूत्रकृता इक्ष्वाद्धास्मि मयहापप्रयत्नभेदादैवेन प्याचर्यसावर्ण्याज्ञान
सावर्ण्यमिति कचिनेनदासंतु संप्रयत्नाः माल्लुवनाज्झलाविति सूत्रे अत एव तुल्यास्यसूत्रे भाष्ये वर्णानां पे
चां च सावर्ण्यमाशंक्य विवृततरत्वेनैव परिहृतं एवं च एदैतोरोदौतोश्च न सावर्ण्यप्रसक्तिः प्रयत्नभेदादि
त्यलम् ऋटष्टादीनामाभ्यन्तरत्वं न्वाप्रभृतिकाकलकपर्यन्तदेशाद्रूपास्यान्तर्गत तत्तत्स्थाने बुजिह्वाग्रादी
नां स्पर्शेषत्स्पर्शरूपावस्थानसमीपावस्थानरूपाभ्यन्तरस्वरूपकार्यकारित्वाद्वर्णोत्पत्तिव्यवहितप्रागभा
वित्वाच्च बोध्यं तत्र बहूनामेकस्थानत्वेपि कस्यचिदुच्चारणे सम्यक्स्पर्शः कस्यचिदीषदिति अनुभवं
शिक्षाकारोक्तिं चानुसृत्य विवेकत्वं नच ह्रस्वादीर्घादीनां कालविशेषपरिच्छेद्यत्वानियमाय कार।
णभेदोऽवश्यं वाच्यः प्रयत्नविशेषरूप एव अन्यस्य निरूपयितुमशक्यत्वात् स च वर्णोत्पत्तिप्रागभावि।
त्वादाभ्यन्तर एवेति तदकथनान्न्यूनता अज्झ च दीर्घयोः सावर्ण्यनापत्तिश्चेति वाच्यं अइउण् सूत्रे भाष्ये
कालभेदजनकप्रयत्नस्यास्यविशेषणेन सवर्णसंज्ञासूत्रे ग्रहणस्यो तत्त्वेनास्य बहिर्भूतत्वेन तेषां

प्रा॰ श्रो॰

बाह्यत्वमित्याशयात् अस्य यथास्य बहिर्भूतत्वं तथा बाह्यप्रयत्ननिरूपणावसरे उपपादयिष्यते स्पृष्टं
प्रयत्नमिति नपुंसके भावे क्तः स्पृष्टानङ्गेवाधानात् न ङ-नस्य पुंस्त्वात्र प्रयत्नमिति क्वाचित्कोपपाठ इत्याहुः
ईषत्स्पृष्टमिति अत्र स्पृष्टमीषत्स्पृष्टमिति विभागकथनसामर्थ्येन चवर्गीयकारादीनां न सावर्ण्यं +
अन्यथा ईषच्छब्दस्य प्रत्ययवत् ईषत् स्पृष्टस्यापि स्पृष्टत्वानपायात् न दुर्वारं स्यात् प्रक्रियेति नेनर्द +
एडाठकमित्यादौ दीर्घसिद्धिः अन्यथा संवृताकारस्य विवृतेन आकारेण सावर्ण्याभावात् सन् स्यादिति +
भावः विवृतमेवेति प्रक्रियादशायां विवृतत्वं प्रतिज्ञेयमित्यर्थः नच विवृतत्वकरणेः स्वरास्तेभ्य एओता
भ्यामप्यैऔताभ्यामप्याकारः संवृतोकार इति शिक्षावाक्यात् आकारस्य विवृततरत्वे नाकारस्य विवृत
त्वप्रतिज्ञायामपि दीर्घेण सावर्ण्यासिद्धिः तस्मादकारस्य विवृततरत्वं वक्तुं प्रक्रमिति वाच्यं स्वराणा
मूष्मणां चेति प्रागुक्तपाणिनीयशिक्षाबलादकारस्य विवृतोपदेशः कर्तव्यः आकारग्रहणार्थ इति
अइउण् सूत्रस्थभाष्यवार्त्तिकबलाद्दीर्घाकारेपि विवृतत्वस्यैव स्वीकारात् प्रागुक्तशिक्षास्थं तु नैन
ह्यास्त्रीयप्रक्रियोपयोगि पाणिनिशिक्षाभाष्यवार्त्तिकविरोधाद्ध्येत्यवधेयम् अत्र एकस्य विवृत
त्वादपरस्य संवृतत्वात् संधाभावः नचात्रोद्देशस्य सवर्णग्राहकत्वापत्त्या आकारादीनामप्यग्रमादे
शः स्यादिति वाच्यं यथोद्देशपक्षे ऽस्यासिद्धत्वेनात्र ग्राहकशास्त्राप्रवृत्तेः कार्यकालपक्षे तु तपरि
निर्देशान्सिद्धमिति भाष्य एव समाहितत्वात् एतेनानुनासिकाकारादीनां स्यादेऽननुनासिक एवो
च्चारितगुणकः स्यादिति परास्तं अदइति न्यासेनान्यरत्वे न विधेये नापि तत्काल सवर्णग्रहणात्

वस्त्रामेकशेषनिर्देशाद्वासिद्धमितिबोध्यं पूर्वत्रा अस्यविधित्वेत्रिपाद्यांपरस्यपूर्वं प्रत्यसिद्धत्वानापत्तिः
तथाच गोधुक्‌मानित्यादौघत्वेजश्त्वेपरत्वाल्लत्वेभष्भावानापत्तिः नचान्यविधित्वेत्रिपाद्यामप्यस्यप्रवृत्तिः
स्यात् सपादसप्ताध्याय्यामपिपूर्वंप्रतिपरस्यासिद्धत्वापत्तेः मध्येपाठसामर्थ्याश्रयणेतुत्रिपाद्यामप्रवृ
त्तिःस्यादित्याशयेनाह अधिकारइतिअतएवसूत्रंधुटिसिद्धंवाच्यमित्यादिकंचरितार्थं एवंपत्वादुत्तरंतिस्त
स्यासिद्धत्वं पूर्वशास्त्रेणतूपस्थितत्वाद्विशेषणत्वार्थस्यैवग्रहणं पूर्वत्वेचक्वचित्सपादसप्ताध्याय्याःक्वचित्त
त्रांतरस्यसंहितायाः तत्रायमर्थः होढइत्यादौअस्योपस्थितत्वाद्वाक्यभेदेनान्वयः हस्यढोभवतिइदंचशास्त्रंपूर्व
त्रासिद्धमिति अतएवनमुनेइत्यादिभिस्तत्रविषयउपपद्यतेशास्त्रमितितनुकार्यमितिभावः असिद्धमिति +
हेनिष्पन्नंप्रवृत्तमितियावत् सिद्धश्चप्रत्ययवित्यादौतथादर्शनात् तद्भिन्नमसिद्धमनिष्पन्नमप्रवृत्तमिति
यावत् यद्यपिलोकेनाहार्यनिश्चयस्यैवप्रवर्तकत्वंदृष्टंतथापीहशास्त्रप्रामाण्यादाहार्यारोपोपिशा +
स्त्रप्रवृत्तावप्रवृत्तौचतयामकइतिबोध्यं नचविद्यमानेपिशास्त्रेज्ञातेपिकार्येशास्त्रप्रामाण्यात्कार्य
मात्रेऽभावारोपोस्त्विति वाच्यं सिद्धेऽसिद्धत्वारोपात् सूत्रोदाहरणसंपन्नेपरत्वात्प्रवृत्ते कार्येप्रवृत्तेरेव
प्रयोजकतयाज्ञातेकार्येभावप्रतियोगित्वारोपेपिदेवदत्तहंतृहतन्यायेनस्यानिवृत्तिवादेऽभावद्वयाचेतप्र
प्राप्तौमनोरथासिद्धेः नचतौसदित्यादिनिर्देशाद्देवदत्तहंतृहतन्यायस्यानित्यत्वाद्देनत्प्रयोगसिद्धिरितिवा
च्यं हतेदेवदत्तेनहंतरिहतेपितोत्पन्नज्ञानेदेवदत्तस्यपतत्वारोपेतुसतंतरांहंतृमृद्यतस्यहननेतुउज्जीवन
मस्त्येवेतिनच्यावशरीरं तावित्यादौवृद्धिहेतुः पूर्वंसवर्णस्यहननेनाद्यमसजातीयप्रसंगमात्रं ननुहत

१।१ नस्थानीयेऽल्प्रवर्तनमिति न तत्रास्य न्यायस्य विषय इति कार्थतेनास्यानित्यत्वं बोधनीयं ॥ प्रकृते तु निरवधिष्ठा
नादेशासंभवेन तत्र नस्थानीयं कार्यप्रवर्तनमात्रप्रयोजकमेव ॥ अत एव यण्कारस्य मुख्याद्विति तस्यासिद्धत्वम
२ शक्यं कर्तुमित्यसिद्धवचनाद् निर्दिष्टशास्त्रे स्थानीयत्वे इति केयटः ॥ अतिदेशश्चास्त्रारोप एव एतेन कार्यासिद्धत्वेऽपि म
नोरथस्य च्छान्दसत्वे लोपस्य पूर्वमेवाप्रवृत्तौ रात्रस्य प्रतीघातान्मनोरथसिद्धेः स्यन्तु हेतिपराम्
स्यएवं चेदं प्रकृतिसूत्रेऽचः परस्मिन्निति सूत्रे पत्वतुकोरिति च सूत्रे भाष्ये ॥ ननु मनोरथस्य दर्शनाभावरूप
लोपाभावरो पस्य दर्शनरूपत्वेन न दोषः ॥ अभावाभावस्य प्रतियोगिरूपत्वान्निंचो नकारीन्यानित्यत्वमपि स
वचंढलोपेतिदीर्घेत्तदशास्त्रावयिषस्य चललक्षणं नैमित्तिकमिति विहत्यातेनन्तं नित्यमित्युक्ते रदोषादिति
देवं नहि अमूरुत्यादावदजोरस्य स्थानवस्थायामुत्थे कृते ज्ञानस्यालस्य सत्वादसत्ताध्यायीस्थकार्येऽसुर्यो
सिद्धत्वेऽपि श्रवरीत्यात्काराभावेन तद्ध्यायनापत्तिः ॥ न च न मुटादेशे इति वार्त्तिकेन दायां एरतः श्रादेशः
सिद्धत्वनिषेधसामर्थ्यादेतद्विषये पूर्वोक्तन्यायाप्रवृत्तिरिति वाच्यं ॥ शास्त्रासिद्धत्वपक्षस्यैव ज्ञापयितुं युक्त
त्वात् ॥ एवं श्रीभावात्पूर्वमदसोसेरिति मुत्वे श्रीभावाभावे दात्यैकाराभावेनैतद्वृत्तिसूत्रं व्यर्थमिति न
दपि शास्त्रासिद्धत्वे ज्ञापकं वाध्यं केचित्तु अमूरुत्यादौ वैनंतिकतयाऽध्यायस्थार्थं गीकारे पिलक्षेलक्षणस्य
नित्यायात् दस्य विकाराभावेन संनियोगशिष्टन्यायात् नस्य सत्वाभावान्न पुनरुत्याप्युत्याऽमूरुत्यादौ ।
सिद्धिरित्याहुः ॥ तत्र तृथाउकाराय हारे संनियोगशिष्टन्यायामस्यापि निवृत्तो दात्यत्वमस्य वललक्षण
भेदाबन्नहेल्लक्षणस्येति न्यायस्यापि विषय इति चिंत्यं ॥ अदसोसेरिति सूत्रे समाहारद्वंद्वनिर्देशात्त

त्वणो भेदस्यस्यत्वात् नु अधिकं कृत्स्नमेवं न न स्त्रे भाष्यप्रदीपोद्योतेऽइत्युक्तं शास्त्रासिद्धत्वाङ्गीकारे पत्रार्थं त
रंगत्वात्पूर्वमेव त्रैपादिकं प्रवृत्तं न तत्रापि न तत्कार्यस्य एवाभावप्रतियोगित्वारोपेण तन्निवृत्तिर्निवृत्ते रभावः
आदेशावृध्यभावः नहि सन्ततस्य वृध्यभावस्तु तिन किंचिदवद्यम् जायमानकार्यं तु स्यानिवृत्त्यादेशे
एव प्रवृत्तेनेव हि रज्जनत्वस्य प्रयुक्तापवृत्तिः शुक्तिं नगोचरयतीति न्यायात् स्पष्टं चेदं द्विर्वचनेचीति भा।
ष्ये यत्र तु सह प्रसंगस्तत्रापवृत्तिरेव अभावारोपात् न च कार्यसिद्धत्वेनाय मतिदेशः किंतर्हि का
र्यस्यासिद्धत्व मनिष्पन्नत्वं प्रतिपाद्यते तत्र निष्पन्नस्यानिष्पन्नतायाकल्पन प्रातेनापि कर्तृत्वम प्राकल्पतया
पूर्वकार्यप्राप्तावप्रवृत्तिरेव प्रतिपाद्यत एवं च इत्यनिदोषइति वाच्यं राजन्भ्यामिति स्थितेकस्यासंपादस्य
प्राध्यायीस्थस्याप्रवृत्त्या एतन्दप्रवृत्तौ नलोपे जाते प्राप्नदीर्घत्वस्यानेन वारणानापत्तेः एवं हरइहे
त्यादौ यलोपेत्स्यासिद्धत्वेन गुणाभावानापत्तेः एतेन पूर्वत्रेनेत्यस्य सूत्रत्वीयं नलोपः सुविति सूत्रं तु पूर्व
विषयसंभावनायां परिनिषेधइत्यर्थं वाधनद्वारा राजाश्व इत्यादौ नलोपे दीर्घविषयस्य संभावितत्वेन
तच निषेधाभावायस्यान इत्यपास्तं राजभ्यामित्यादौ सर्वथानलोपानापत्तेः पूर्वत्र प्राप्ते एव निषेध
कृते तु निषेध इत्यर्थे विप्रागुक्तरीत्या राजभ्यामित्याद्यसिद्धिः नलोपः सुविति सूत्रासंगतिश्च एतेना।
विद्यमानवत्पदानुवृत्त्यैव सिद्धेः सिद्धग्रहणं व्यर्थमित्यपास्तं कार्यस्याविद्यमानवत्त्वे मनोरथासि
द्धेः शास्त्राविद्यमानवत्त्वे तु कृतकार्यस्य शास्त्रस्य वृद्धेरत्तीतयाऽविद्यमानत्वेन तद्द्वारा प्रवृत्तौ राज्ञ

शा॰ शे॰ भावमित्याद्यसिद्धेः किंच शास्त्रस्याविद्यमानत्वे विरुद्धत्वस्य कार्यस्याविद्यमानत्वबुद्धिर्दुरुपपादा यदि निमित्त-
कारणाविद्यमानत्वं कार्याविद्यमानत्वे नियामकं स्यात् स्यादपि तथा न चैवं कुलालाविद्यमानत्वेपि घटस्य
त्वादर्शनात् शास्त्रे तु युगपत्प्राप्तिके च रितार्थे नलोपः सुपिति सूत्रं सपिप्राप्तत्रौ लोपचरितार्थं स्यात्
असिद्धत्वे तु कारणेनुत्पन्नत्वबुध्याभवत्येव कार्येनुत्पन्नत्वबुद्धिः कारणानुत्पत्तौ कार्यानुत्पत्तेर्लोकसिद्ध-
त्वादित्यलं बाह्यप्रयत्नश्चेति काकलकाभ्यन्तराद्गलविवरसंकोचविकासयोस्तोत्पत्तिर्द्विधा निविशेषरूप-
नादतद्विशेषरूपघोषाल्पघोषप्राणमहाप्राणत्वरूपबहिर्भूतकार्यकरत्वेन वर्णोत्पत्त्यनंतरभावित्वे-
न च आस्यबाह्यदेशस्थत्वेन च बाह्यत्वं विवारादीनां विकासादीन् करोतीति सिद्धांतात् अत एवात्मबु-
ध्यासमेत्यार्थान् मनो युंक्ते विवक्षया । नाभिप्रदेशात्प्रेरितो वायुः प्राणाख्य ऊर्ध्वमाक्रमन् तत्तत्स्थाना-
न्याहत्य ध्वनीनभिव्यञ्जनकाले एव स्पृष्टतादीनाद्य मूर्ध्नि प्रतिहतो निवृत्तः वर्णानभिव्यञ्जनतदभिव्य-
क्तिकाले वायत्नविशेषसहायेन गलविवरादीनां विकासादीन् करोतीति सिद्धांतात् अत एवात्मा बुध्यास-
मेत्यार्थान् मनो युंक्ते विवक्षया मनः कायाग्निमाहंति स प्रेरयति मारुतं सोदीर्णो मूर्ध्न्यभिहतो वक्त्र-
मापद्य मारुतः वर्णान् जनयते इति शिक्षया न विरोधः अत्रेदं बोध्यं शब्दप्रयोगेच्छयोत्पन्नयत्नान्नाभि-
प्रदेशात्प्रेरितो वायुर्वेगात् मूर्द्धपर्यंतं गतस्ततः प्रतिनिवृत्तो यत्नविशेषसहायेन तत्तत्स्थानेषु जिह्वा-
दिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति ततो यत्नविशेषेण परावृत्तिसमये गलविवरा-
दीनां विकासादीन् करोति तत्र ये तत्तत्स्थानाभिघातकाय यत्नास्ते आस्यांतर्गततत्तत्कार्यकारित्वादा-
स्यप्रयत्नाः स्पृष्टत्वादयस्ते आभ्यंतरा इति च गलविवरादिविकासादिकराश्चास्यबहिर्भूतदेशकार्यकरत्वा-

ह्रस्वाद्याइति मात्राकालिकत्वादिकं वा यत्नत्वमहत्वकृतमिति नाभिप्रदेशात्प्रेरकयत्नएव कश्चिद्विलक्षणो वायुं।
प्रेरयति कश्चिदपि किमिति तस्य यत्नस्य वायुप्रेरणोर्ध्वं कार्यमास्य बाह्यदेशमिति सोपि बाह्य एवेति दिक्. एतेन +
नास्याद्बाह्यदेशे यत्नोत्पत्तिः मानाभावात् तु बाह्यत्वं तु वर्णोत्पत्त्यनन्तरभावित्वमात्रेणेति परास्तं आस्ये तु त्व
देशप्रयत्नमिति वार्त्तिके आस्ये न प्रयत्नविशेषणेन बाह्यप्रयत्नव्यावृत्तिरिति भाष्यविरोधापत्तेः उदात्तादीनां यद्य
पि प्रागुक्तरीत्या आभ्यन्तरत्वमेव तथापि पूर्वोदोषः न भाष्येण सवर्णसंज्ञानुपयुक्तत्वबोधनात् आन्तरत +
म्य परीत्तोपयोगित्वेन तत्र तत्र दर्शयिष्यमाणत्वात् बहिस्तु घोषेण त्वेन व्यवहाराच्च तेनैव सादृश्ये
मिति न बाह्येषु अप्रयत्नेन बोध्यं इदं चात्र नासिक्यस्य कृत्स्वत्वादेश्चोपलक्षणं प्राग्इति आन्तरसमाम्नायिकाः प्रा
यशः अतएव यमविसर्गादीनां पृथग्ग्रहः अतएवानुस्वारस्य श्वासाघोषविवारानेत्याहुः श्वासा
नुप्रदानाः अनुपश्चात्प्रदीयते उत्पद्यते इत्यनुप्रदानो बाह्यप्रयत्नौः तत्प्रयत्नकाः विवृएव ते कंठमि
ति तदभिव्यक्त्युत्तरं जायमाने कंठविकासे तेषां कर्तृत्वविवक्षा बोध्या विवारएषां प्रयत्न इत्यर्थः
अन्येत्विति वर्गतृतीयचतुर्थपंचमाः अन्तस्थमाः हकारानुस्वारो यरलवा इत्यर्थः नादभागिनः तत्प्रय
त्नकाः यद्यपि स्वेपाद्रिकोड्ड घोषाघोषान्यतरप्रयत्नमात्रेणापि प्रक्रियां प्रानिर्वाहस्तथापि शिक्षाधनुरो
धेनान्येषामुक्तिरिति बोध्यं वर्गयमगा इति वर्गगा यमगाश्चेत्यर्थः अल्पोसवोऽल्पप्राणाः यत्न एत
दुच्चारणोत्तरं प्राणानामल्पत्वमिव भवति वर्गेष्विति विद्यमानानामिति शेषः चतुर्णामिति निर्धारणे
षष्ठी अन्यतमादित्ति शेषः एतेन परशब्दयोगे चतुर्भ्य इति पंचमी उचितेत्यपास्तं मध्ये पूर्वस्य दृश्यश इति
सादृश्यं च प्रयत्नैक्येन एवं च वर्गपंचमयुक्ताः प्रथमादयो यमा इति विवरणकारोक्तिरसंगतेति भावः

५

पा. शि. अत एव यमानामयोगवाहेषु गणनं भाष्यकृतः संगच्छते परस्परं शास्त्रानुभवविरोधात् चत्वारश्च यमाः।
स्मृता इति पाणिनिशिक्षोक्तसंख्याविरोधाच्च प्रथमद्वितीयतृतीयचतुर्थयमत्वेन हि चत्वार इत्युक्तं अपंच
वेद एवतदाह प्रातिशाख्येषु प्रसिद्ध इति एतेन तत्र कानमन मित्यादौ यमे न वक्तव्य यथा नाद्य रोनुनासिक इति नश्च
वर्णेनेत्यपास्तं अखंडपदे एव यमोत्पत्तेर्नेदोष इत्यप्याहुः अन्येषां त्विति अचां उक्तान्यहलां चेत्यर्थः स्पष्ट
मिदं संहितासूत्रे भाष्ये यरलवाश्चेति चकारेणाक्षरस्वचामपि ग्रहणं बोध्यं सुपांसुलुगिति सूत्रे रकारस्णां
नर्थलोदकारो भवतीति भाष्यात् अस्मादेव भाष्यात् घोषसंवारनादत्वमचां अन्यथा तद्दीर्घपर्यायेण स्था
नं अल्पप्राणत्वात् गीकारे दीर्घपर्यायेण स्थानं अत एवामानुनासिकार इति प्राग्युक्ता शिक्षा संगच्छते अन्ये इ
ति द्वितीयचतुर्थौ नयमौ शषसहाश्च योगवाहश्चेत्यर्थः जिह्वामूलीयादीनां स्थानादिविवेकस्तु स्वरू
पनिर्णयाय न तु सावर्ण्यादावुपयोगातिबोध्यं अनुपयुक्ता इति तुल्यास्य सूत्रे प्रयत्नस्य ग्रहणात् इत्य
र्थः उपयुक्तत्वे हि शङ्कयोरपि सावर्ण्यं स्यादिति भावः परीक्षायामिति साचघोषवतो नादवत इत्यादिना
तत्र तत्र स्फुटीभविष्यति कादय इति अनेन स्पर्शभवेत्सूर्वो ह्यं तस्य परतो यदीत्यादिप्रातिशाख्य त्रिभिश्च मा
ध्यमैर्वर्गैरिति भाष्यादि पर्यालोचनया कखघङ इत्यादीनामपि नादिनादित्वानुमानात् मातृकामंत्रेत
थैव पाठाच्च एतेन चतुर्दशसूत्र्यां जादियावसानत्वेन कादिमावसानत्वे योगादिदं चिंत्यमित्यपास्तं लो।
कप्रसिद्ध पाठापेक्षत्वात् स्पर्शा इति तत्संज्ञकार इत्यर्थः अंतस्थाश्चाव्यावंतः शषसहा ऊष्माण इति
तमपि ग्रहणाघे सोष्माणो नादवंतश्च ते भवंति चतुर्थावाग्यत्तानि अन्यथा सोष्मणः सोष्माण इतिहि

तीयानादवतोनादवंतश्चेति चतुर्थाः प्रसङ्गेऽपरिज्ञातिस्थानेऽन्तरतम इत्यस्मिन्सूत्रस्य भाष्ये ह्यामाण्यात् द्वितीया
चतुर्थयोः पूर्वत्वं बोध्यम् एवं तयोरूष्मत्वेऽपि विवृतमूष्मणामित्यत्र शषसहा एव गृह्यन्ते तयोः स्पृष्टं
प्रयतनमित्यत्र ग्रहणात् तथा च शिक्षा स्वराणामूष्मणां चैव विवृतं करणं स्मृतं अचोऽस्पृष्टा यणस्त्वीषन्ने
मस्पृष्टाः शलः स्मृताः शेषाः स्पृष्टा हलः प्रोक्ता इति नमश्चाद्धे तेन विवृतादन्यत्वं इति तद्विवरणकृ
नः एतन्मूलकभाष्ये ईषद्विवृतत्वमूष्मणामुक्तं अचः स्वरा इति स्वरशब्दवाच्या इत्यर्थः उदात्तादिभिः स्वरैः
स्वयमेव राजन्त इति व्युत्पत्तेः स्वयंपूर्वाद्राजतेर्वा ह्रस्वकादौ णादिको डः स्पष्टं चेदं सूत्रेऽस्मिन् उदात्त इत्यत्र भाष्ये
तद्धर्मत्वादुदात्तत्वादयोऽपि स्वरशब्देन व्यवह्रियन्ते कपाभ्यामिति खफयोरप्युपलक्षणं प्रागर्धविस
र्गीति ऊर्ध्वाधो वक्ष्यति तत्र तद्वयात्मिका लिपिर्विसर्गस्यार्धं च तत्तद्वयात्मिका चानयोरिति साध्यंप
लक्षणे बोध्यम् येनोच्चारणेऽपि अर्धं विसर्गसादृश्यं वदन्ति तेषामेतौ पादमात्रिकौ बोध्यौ अं अः इति उप
लक्षणमिकारादेः तदेव ध्वनयन्नाह अचः पराविति अत एव मोऽनुस्वार इति सूत्रेऽनुस्वारग्रहणं च वि
तार्थं अन्यथाकृत्वोऽकः पौ चेति कमोऽस्मिन्निति वदेत् तद्धि स्वर एव स्वारस्त्वमनुगत इति व्युत्पत्त्या
चः परत्वबोधनार्थं तथा च शिक्षा अनुस्वारो विसर्गश्च ःक ःपौ चापि पराश्रितौ इति अलाब्वीणा
निर्घोषो दन्तमूल्यः स्वरानतु अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु चेति अचः परत्वं चाविकृता
नुस्वारस्यैव अत एव बहूर्ज्जि इत्यादौ न दोषः नपुंसकस्य झलच इति सूत्रस्य भाष्ये तु हलः परमप्य

पा॰ प्रो॰ नुस्वारापादकं एवं पक्षस्यैव न्याय्यत्वात्तदर्थसाधकं ऋऌवर्णयोरिति अचरलोनयोर्वर्णयोरितिविग्र।
हः ननु ऋऌ औ इति स्थिते वैकल्पिकत्वात् प्रकृतिभावाभावे विशिष्टं तरंगत्वात् सवर्णदीर्घे सत्यारावित्या
पत्तिरितिचेन्न अकृतव्यूहपरिभाषया सवर्णदीर्घाप्राप्तेः अयेयण प्रवृत्त्या सवर्णत्वरूपनिमित्तस्य
विनाशात् सोऽस्त्येव तु वत् एवं च सवर्णदीर्घाभावे ऋलोऽङीति ऌकारस्य गुणो ऋकारस्य यणेच
सिद्धं रलावितिं यद्वा वार्णादाङ्गं परिभाषया दीर्घं बाधित्वा गुणः न च युगपत्प्राप्तिविषये एव सन्या
यः मानाभावात् अत एव लावस्यायाम् अडिति पक्षे वृद्धिं बाधित्वा अयङ्ङादेशो ध्येयानामित्यादि-
सिद्धिः अन्यथान्तरङ्गत्वात् दाटश्चेति वृद्धावायादेशो ध्यायानामित्यापत्तिः एतेन एकनिमित्तक एव।
सन्याय इत्यपास्तं अत एव श्वत्यय इत्यादिनिर्देशाः संगच्छन्ते यत्र त्वप्रवृत्तिर्विशिष्टा तदर्थमनित्यत्व
माश्रयणीयं ऊ सिद्ध ऋलोरित्येव ननु रलोरिति क्वचित् तथा दृश्यमानः प्रयोगस्तु आगन्तुना का
रेणोपपाद्यः ऋऌवर्णयोरित्यत्र ननु न दीर्घः ऋल्यक इति प्रकृतिभावात् न च ऋत्यशिवेत्यादा
वनत इति निषेधात् ऌत्वतानापत्तिः ऋऌगिति वर्णोपदेशे पृथक्वर्णद्वयोच्चारणेन सावर्ण्यानि-
त्यत्वस्य क्वचित् ग्रहणस्य ग्राहकत्वस्य वा कल्पनात् न चार्केन्द्र इति न्यासः कार्यः ... इति मध्य
लो॰ व्यमयदन्तौ पीसमासः रेफयुक्त ऋकारभिन्नस्येत्यर्थात् ऋ ... त्यादौ निषेधाप्राप्त्या वर्णोपदेशे ऌ-
कारो व्यर्थः एवं तोनेत्यादिभाष्यस्यापि त्रैवतात्पर्यं अत्र तु सावर्ण्यान्न सिद्धमिति वाच्यं सूत्रं गवि

विषयत्वात्तुल्यकरणज्ञानगौरवं चाश्रित्यैकलृकारग्रहणस्याख्यानेलाघवाभावात् ममन्तु फलमुखत्वाददनित्यत्वा
दिकल्पनागौरवं नदोषाय ननु नहि वार्त्तिकं दृष्टान्तस्तत्रहृतः प्रवृत्तिविनित्वतीयाचहोक्तं दर्शीनिस्तत्र
स्यभाष्योक्तन्यायेनात्र त्वत्तायकपराग्रं प्याश्रसंगनाद्रितिचेत्र यत्रवार्त्तिके सूत्रं नात्पर्यग्राहकं तदति
रिक्तविषयत्वान्नद्राष्ट्यस्यनदोषः इदं च वार्त्तिकं प्रथमयोरितिसूत्रस्य सवर्णग्रहणेनवोधितमिति
वहृष्यते अकारहकारयोरिति एकारस्य केवलतालव्यत्वं ओकारस्य केवलौष्ठ्यत्वमिति मतेन एकारवृा
कारादीनामप्युपलक्षणं एतेनन्नाकुशालावित्येवसूत्रयितुमुचितमित्यपास्तं नचहशिचेतिसिद्धेः
नोरोरितिवार्यं आकारघारस्यार्थवत्वात् नचहकारेऽनोरित्येवसिद्धेयशिचेत्येवपठितुं युक्तं नपरक
रणादाकारेरृवहकारेपिपूर्वेसूत्राप्रवृत्तेः सौत्रहि वचनोपि पञ्चम्यर्थमध्यमपदलोपि समासं दर्शयति
आकारसहितत्रतिअतएव कालसमवेलास्विति निर्देशउपपद्यते समाहारद्वन्द्वे तु टचप्रसङ्ग इतिभावः
नचहल्पदेन समाहारद्वन्द्वोऽन्तं आपदेनेतरेतरयोगेन दोषइतिवाच्यं अवृतल्पदेनाकारस्य साहवि
वक्षाभावेन द्वन्द्वस्यैवदुर्लभत्वात् तथात्वेह्राज्ञ्भिरप्याकारस्य सावर्ण्यं न स्यादिति वोध्यं इत्येतेषि
ति एतेषु परेषु एतेषु विद्यमानस्य चेत्यर्थः तेन हकारादीनामकारादिषु दीर्घादीनामपि संग्रहः इ
त्येतेषु परेष्विति न काचित्कोपपाठः तथा पाठे उपलक्षणत्वं वावोध्यं एतेनाकः सवर्णे इत्यत्र त्वान्त्य
हणसमर्थ्येन दीर्घवारणं शाकमिनिपपरास्तं प्रोतौ शाकारोऽच्चारणं न शिशूपेरित्पादोचरितार्थः न
ह्यकृत्यहपरिभाषया पूर्वदीर्घाप्रवृत्तेः दीर्घादीनामिति आदिनोदात्तादीनामपि ग्रहणं वोध्यं अ

प्रा॰ घो॰

हणकेति दीर्घादीनामिव ह्रस्वकारादीनामप्यकारादिवाच्यत्वेवृद्धे अगादिप्रत्याहारेषु इकारादीनामनु
च्चारितत्वेन प्रत्याहारकत्वासंभवेन प्रत्ययानां प्रकृतिवत्त्वनुपपत्त्या पर्यायेन्वयानुरोधेन त्वादिप्यरत्वादि
देशात्स्वीकृततया प्रत्याहारेषु नहाच्यवाच्येनिरर्थकलक्षणयाऽ वादबोधकत्वं स्यादित्यर्थः अणुदि
त्त्राण अणुदित्सु सवर्णबोधकताविधेयेति विधिरूपस्यास्यानन्यस्य न त्रापि सत्वात् नयकष्टयोगः प्रा
थम्यात्मिन्यादिन्यायविरोधः सवर्णस्येत्यस्य बोधकइति शेषः एवमन्यापि बोध्यं ननु कृत्रिमान्या
येन प्रत्ययस्येति निषेधः स्यात्तथा चागमादौ सवर्णग्रहणं स्यात् एवं च वृत्तौ वेत्यादिसूत्रेऽप्यर्थः स्याद
त आह प्रतीयत इति अत एव त्यादर्शयस इति न सूत्रे तामिति तन्त्रे भाष्ये स्पष्टं नेतेदमरप्र
त्रिमात्रेण अनुवंधानामनेकांतत्वात्तेनेदयरप्रभृति मात्रेण अन्तरंगत्वात् उपदेशेऽ इतिवचनात्र
सूत्रांतर्गते स्वेव शादिशाहेषु संज्ञायामनुवन्धविनिर्मुक्तैव पदार्थोपस्थितिरित्वात् सवर्णप्र
सक्तिः इत्संज्ञाकार्ये तु स्थान एवत्वान्नतदंगे स्थितिन्यायात्तत्र त्वाप्येवं वर्त्तन एव इति ध्येयं पाठांतरं
वर्णग्रहणप्रसक्तिः उदितिभिन्नंपदं तेनोपदेश इत्यादौ उदित्पदार्थो बोधेऽप्यण सवर्णग्राहकत्व
त्वस्यप्रवृत्तिः अतद्गुणसंविज्ञानश्चायं बहुव्रीहिः चोः कुरित्यादौ चकारककारादीनामेव संज्ञा
त्वं समुदायस्य वर्णानामप्रसिद्धत्वाच्च अप्रत्ययइत्युदिदंशेन संवध्यते चोः कुरित्यादावुदित्कर
णात् क्रुकङ्गादौ सवर्णग्राहकत्वं तन्न तत्रोकारस्योच्चारणार्थत्वात् सूत्रे च करेण स्वरूप+

स्यापि ग्रहणं बोध्यमित्याहुः । अत्रेति ग्राहकसूत्र एवेत्यर्थः । अत्र तपरकं तु उरृदिति सूत्रे तपरकरणम् । नहि
चुरादिण्यन्तात्क्ते तथा तोर्ल्लुङि । चङ्युपधाया ह्रस्व इति ह्रस्वे कृते ऋकारस्य दीर्घस्य स्थाने ऋस्य एव यथा स्यादित्येवमर्थं
पूर्वेणाऽणा ग्रहणेनैव उरृदुपक्रम ऋकारेण तपरत्वान् भिन्नकालाग्रहणेन तत्स्थाने स्थानेऽन्तरतमत्वं न चादेशानां प्रसक्ति
मित्यर्थं न स्यात् न च तपरसूत्रेण लृकारग्रहणार्थं तत् स्थानेऽन्तरतमपरिभाषया तत्सवर्णेन तद्ग्रहण
फलाभावात् न चैवं भाव्यमानत्वात्सवर्णग्रहणप्रसक्तौ तद्ग्रहणार्थं तपरत्वाभावे आदेशानां अनिवृत्त्यर्थत्वेन
स्वरूपाभ्यनुज्ञानार्थत्वेनास्य पूर्वबोध्यत्वाभावेन चाविधेयत्वात् कृतेऽपि तपरत्वे भाव्यमानतापीत्यन्यदेत
त् । यत्तु उपसर्गादृति धातावुरदिति तपरकरणं मानमिति तन्न लृकारग्रहणेन चारितार्थ्यात् । [illegible]ति
ऋलृवर्णयोरित्यत्र जातिपक्षाश्रयणात् ऋत्वजात्याक्रान्तं लृत्वजात्याक्रान्तं तयोः सवर्णसंज्ञाविधाना
दिति भावः । नन्वेवं वर्णसमाम्नायादिष्वव्यापकजातिग्रहणादेवाष्टादशादीनां ग्रहणे अज्झलादौ च सिद्धे ग्र
हणकशास्त्रं व्यर्थं । अत एव सूत्रारंभपक्षेऽस्य ह्रस्वादित्यादौ दीर्घादिग्रहणसिद्धिः । अन्यथाऽण्ग्रहणे
न वर्णसमाम्नायस्थानामेव ग्रहणेन णकारादिचिह्नेन प्रत्याहारेऽन्तर्भावमित्वाभावेन तत्र त्वाद्यव
र्णस्य चरितार्थत्वेन व्याप्यव्यक्तिपक्षे तत्र त्यात्र त्यव्यक्तेर्भेदेन प्रकृते तदप्रवृत्तिः स्पष्टैव न चाद्रउणि
त्यादावकारादेर्विनिगमनाविरहेण सर्वाकाराणामनुकरणमित्ययमपि सत एवेति न दोषः । प्रयोग
स्य सर्वाकाराणामनुकरणेऽपि सूत्रस्थानुकरणे मानाभावः स्यादिति यत्नः अत एव आगमादिप्रत्याहारे उप
स्थितदीर्घकारादीनां तदुत्तरविभक्त्यर्थेनान्वयः संगच्छते नव प्रत्याहारशास्त्राणां विशिष्टत्वेन घटा

शा॰ शे॰

दिशाद्द्वघटकाकारादिभिरिव तद्घटकाकारादिभिर्न सवर्णग्रहणं प्राप्नोतीति वाच्यं यथा तेषु व्याहाराणामा
दितो वृणोतेः सवर्णग्रहणं यथा स्यादिति भाष्ये एव वर्णोपस्थापकशब्दघटकस्यापि स्वग्रहणेन ग्रहणा
नुवर्णतात्पर्यकाणामेवाणग्रहणेन ग्रहणात् उपस्थितवर्णभेदेनैवावयवस्याप्यस्य ग्रहणाच्च कवर्गोपि
कुत्वे ज्ञाने स्वीकारात् कुरित्याद्यनुगतव्यवहारात्तत्सिद्धिः संज्ञापक्षेप्यनुगतव्यवहारायानुगतधर्मस्या
वश्यकत्वात् त्रयी शब्दानां प्रवृत्तिरिति पक्षेप्यावश्यकत्वं स्पष्टं चेदं वृद्धिरादैच् सूत्रे कौस्तुभे तत्र च ज्ञातिवो
धार्थमेव तर्हि सूत्रमावश्यकं षड्भेदवत्त्वादिज्ञातिवोधार्थमपि सूत्रस्य कर्तव्यतापत्तेः लोकव्य
वहारात्तत्सिद्धिरिति तुल्ययोः सममिति चेन्न विधेयेऽष्टादशानां ग्रहणापत्तेः न च विधेयविशेषणत्वा
त्तत्र ह्रस्वत्वादिविवक्षितं उद्देश्यविशेषणत्वाच्चास्य त्वाविवक्षितमित्यादौ न विरुद्धेति मीमांसमतरीत्या निर्वा
हः उपेयिवानित्यत्रोपेयत्वविवक्षायाः स्तुत्यपेत्यादौ अननुवाद्यगतैकत्वविवक्षायाश्च दर्शनेन तस्यावै
याकरणैरभ्युपगन्तुमशक्यत्वात् अस्य चावित्यादौ व्यापकत्वज्ञाने रप्यविवक्षापत्तेश्च इदमेव सूत्रं तदा
नाश्रयणे ज्ञापकं ऋग्रहणे ऌग्रहणानापत्तेश्च ऋत्वजातेर्ऌवृत्तित्वस्वीकारे प्रमाणाभावात् ज्ञा
तिवोधार्थमुद्दिष्टस्यावश्यकत्वाच्च आत्त्वादिकमपि ह्रीमात्रत्वादिविशिष्टमत्त्वादिकमेवेति न तद्वो
धकसूत्रारंभः पृथगनुबंधकरणाच्च न ऋदित्कृदित्वयुक्तकार्यसंकरः वार्तिककृता त्वणग्रहण
मात्रप्रत्याख्यातं सवर्णैर्णग्रहणमपरिमाकृतिमाग्रहणादिति अणमात्रे सवर्णग्रहणलाभाप

ध्वनितं चेदं वृद्धिसूत्रे कौस्तुभे

नकार्यं कश्चिन्नु तत्त्वाभावायापि कार्यं जातिग्रहणप्राप्तातिप्रसंगवारणायाप्यत्यय इति निषेधार्थं च तदाव
श्यकमिति तदाशयः यदि तु लत्वानुरोधेन व्याख्यानाद्विधेयविषयेऽव्याप्तिः पक्ष एवानुवाद्यविषयेऽव्या
तिपक्ष एवेत्याश्रीयते इति न दोष इत्युच्यते तथापि नास्य पाकत्वेऽव्यायत्रानुगमः क्रियते इति भाष्योक्ता
न्याये नोक्तार्थस्य सूत्रस्यावश्यकमेवेति दिक् सामर्थ्यादिति एचोऽयवायाव इत्यादौ तु स्थानेन्तरतमप
रिभाषयैव निर्वाह इति वक्ष्यते न यथाभामित्यत्र तु ऐऔच्सूत्रेण पाठौ वृद्धिरादैजित्यत्राप्यैङ्‌ इत्यव
पाठ्यं तत्र गुणस्त्रेच परस्परसवर्णसंज्ञावादिमते चतुर्णां ग्रहणसत्त्वात् तपरकरणेन।
यथोद्देशपक्षस्य बाधनादनुवाद्यतयाणुदित्सूत्रप्रवृत्तेः नचैवं पूर्वपक्षसिद्धान्तयोर्निर्दलत्वाप
त्तिः पूर्वपक्षे सिद्धान्तदूषणातिरिक्तस्यणवत्त्वेस्य त्वचवृद्धिगुणविधौ प्रत्याहारग्रहणवैय।
र्थ्यरूपस्य स्फुतावेच एचोपग्रहस्येत्त्वचतद्वैयर्थ्यरूपस्य दोषस्य सत्त्वादिति वाच्यं ऐऔजिति सूत्रेऽवैय
।र्थ्योपन्यासेन तन्मूलभूतग्रहणवैयर्थ्यरूपस्य दोषस्यापि क्रोडीकृतत्वेनाक्षतेरित्याहुः यथापीति
पूर्वत्वापवादाश्रमितिविशेतेरित्युक्तन्यायेन तद्वाक्यार्थबोधोत्तरमेतद्विधेयमित्त्रत्तुल्यास्यप्रयत्नं सवर्णपद
वाच्यमिति सवर्णपदार्थज्ञाने जाते अणुदित्सूत्रवाक्यार्थबोधः वाक्यार्थबोधे पदार्थज्ञानस्य कारण
त्वात् पुनस्तद्वाक्यार्थबोधे चरन्नमानं तथा च ऋकारलावित्यस्य बोधकालेन तद्वाक्यवाच्यत्वस्य लक्ष्य
तावच्छेदकस्याज्ञानान्न लक्षणप्रवृत्तिमशक्येति भावः प्राप्ते एलादिति सूत्रलिंगकालसमये वा।
लास्त्विति निर्देशाः येनु निर्देशादेव सावर्ण्याभाव मितकं तितेषा मानुमानिक वचनकल्पनाया

पा॰ शे॰ नः अत एव भाष्ये प्रयत्नभेदेनैषां सावर्ण्याभावः साधितः संगच्छते एतेन हेयाः इत्योरन्यतरस्य नादाकावात्य
रस्य सनः सस्य घत्वं स्यादित्यपास्तं दीर्घान्यरत्रस्तु नस्यापि प्रश्लेषात् इदं च व्यक्तिपक्षे एडादिनस्त्वमत्वे
जातिपक्षे तु भिन्नजातीयत्वादेव न हकारेणाकारग्रहणं नाकलादिवित्यनेन च न तज्ज्ञात्याक्रांतत्वे निषि
धः सलभानाज्ञलावितिसूत्रं च मंदप्रयोजनमिति बोध्यं हो ढ इति हकारेणाकारग्रहणे तु नियघत्वा क्रियमेनररा ग्रिनमित्याह
द्वोतितस्य सर्वस्याप्युपलक्षणमिदं पत्वे न ढत्वस्यासिद्धत्वात् संयोगांतलोपस्याप्रापादयितुं युक्तः इत्यपास्तं
सर्वस्याप्येकयैव युक्त्या वारयितुं शाक्यत्वेन आपाद्यमाने ष्ठीन्यायानादरात् हलो नेन राइति सूत्रे याहि
साहचर्येणाज्ञानाक्रान्तहलामेव ग्रहणात् यद्यपि प्रवोरनाकावितिसूत्रभाष्येऽनुनासिकायणइति
सामान्यत उक्तं तथापि कुं उरध्वेनेत्यादौ परसवर्णमाधांकारे फोषणां सवर्णानसंनीति समाधान
परं हयवरट् सूत्रस्य भाष्यविरोधेन तस्य रेफातिरिक्तपरत्वं मनसि निधाय याहृयवलाइति ह
योरिति पतदर्थमेवाणादित्सूत्रेण ग्रहणं अन्यथात्नग्रहणमेव कुर्यात् तेन संयन्ते त्यादौ वापदांतस्ये
ति परसवर्णानामननुनासिकयवलानामनचिचेति द्वित्वं सिध्यति हलो यमामिति लोपस्तु वैकल्पि
कः अत्र चाणग्रहणमेव मानमित्याहुः अतो भिस इत्यादिनकारोच्चारणात् आङि चापि इत्यत्र ओ
सनुकर्षणार्थोऽनुकारात्तनपर इत्यत्र बहुव्रीहि अन्ययोसिचेत्यनेनसिद्धे किं तेन चाकारतपरस्यैवायो
यथा स्यात् अति स्वहयोरित्यत्र मा भूदित्यर्थं चकार इति वाच्यं नियमार्थिये न्याय्यत्वात् सहि वहो रोदि
ति सूत्रस्य वर्णग्रहणव्याख्यानाद्वपंचमीसमासोपि न दाहतः परइत्यादिना वर्णग्रहणे तु तत्साम
र्थ्यादत्यावकिन्न सर्वग्रहणबोधनेन नैतत्र नपरसूत्राप्रवृत्तिरिति बोध्यं आद्यस्योदाहरणमनोभि

ऋत्यादि द्वितीयस्य तु वृद्धिरादैजित्यादि नचात्र संज्ञाया स्तात्परत्वेपि संज्ञिनां तद्भावात्कथमेतत्
त्रिमात्रस्यावृत्तिः संज्ञासवर्णानाम प्रसिद्धत्वाच्च संज्ञासमकालस्याप्रसिद्धत्वाच्च द्विमात्राणामप्य
तत्कालत्वाद्भावत्प्रापत्तिरिति वाच्यं अत एव तपरकरणाण्णाद्वाभ्यादिप्रामाण्याच्च तात्परत्वस्य तात्पर
र्यान्नूवाधो वर्णस्तात्परवर्णस्य समकालग्राहकल्पनेनादोषात् यत्तत्तत्राणित्यनुवर्तनेन तच्चपरेणैवते
न नियमार्थमिदमिति तत्र अणग्रहणमननुवर्त्य लाघवेन विधित्वस्यैव वक्तुं युक्तत्वात् विधित्वेपि वृद्धिरादै
ज्जिवत्तदित्यादौ सावकाशेन तपरसूत्रेणातो भिस ऐस् इत्यादौ परत्वेनाणुदित्सूत्रबाधोपपत्तेश्च संख्याकृतव्य
वहारस्य परस्परपरिहारेणैव दृष्टत्वेनेह विरोधस्य सत्त्वात् स्पष्टं चेदं भाष्ये अतो भिस ऐसिति तपरकरण
न्तु तत्सामर्थ्येन तत्रोपस्थितेनानेनवकाशत्वमेव तस्य वा… इति केचित् अकारस्यैव संज्ञात्वेपि विशिष्टाद्विभक्त्यु
त्पत्तिस्तत्र अतो भिस इत्यादौ सोत्रत्वाद्बोध्या यत्तु अतो भिस इत्यादौ विशिष्टाद्विभक्त्युत्पत्तेः समुदाये तात्पर्याद
वयवस्य संज्ञात्वासंभवेन तकारविशिष्टासंज्ञा तत्कालस्येत्यत्र तत्कष्टेन विशेष्यस्यैव परामर्शः अन्यथा मन्त्रिका साद्धे
देर्वर्णस्याप्रसिद्धत्वात्सूत्रस्यासंभव इति केनेव स्यात् एवं च विशिष्टस्याप्रत्याभावात्स्वयस्य पदैकदेशत्वेना
नर्थकत्वाच्चाण्दित्सूत्राप्रवृत्तिरेवैत न हि विषये रत्याहुः तन्न पक्षे निवक्तु ब्रीहोतु विशिष्टे संज्ञात्वं दुर्लभं अत
एव तदित्यर्थं वर्णः प्रतिनिर्दिश्यत इति भाष्यं संगच्छते संयोगसमवायान्यतरसंबंधेनान्यपदार्थस्य वृत्तिपदा
र्थे संबंधित्व एव शायेणान तु गुणत्वस्वीकारात् वक्ष्यते चेदं सर्वादिसूत्रे तत्कालस्येति तद्ग्रहस्य तदुच्चारण।
कालसदृशोलक्षणेन तत्कालपदेन बहुव्रीहिः तत्सर्वं धनयवाह समकालस्यैवेति एवकारश्च न्यायसिद्ध
बाध्यबाधकभावस्यानुवादक इति भावः जाति पक्षे तु तज्जाति मत्सकलव्यक्तिग्रहणप्रसंगे यां व्यक्तिमुपादा।

प्रत्याहारे ऋनिर्दृष्टलक्षणायाः सतेनैजादि नीलेशाद्दानामेवोपहत्वात्
दोषः दीर्घानुदात्ताद्दीनामेकैकस्य सवर्णत्वं न परंपरासंबंधेन तत्काल
परंत्वैत न हि ष्वेपिककालव्यावर्तकं न तत्तत्कालस्यापि पेच्छदसाम
र्थ्येन इत्येयं

९

शा॰ श्लो॰ यत्नाति निर्दिष्टपत्ते न तोमित्रकालव्यक्तिर्मा भूदिति नियमार्थमेवेन तत्सवर्णस्य ग्रहणमनुवृत्तेः तेन त्नात्यं तरस्य पुनः
यत्नाति नित्यमार्थमेवेन तत्सवर्णस्य ग्रहणमनुवृत्ते तदंच विभाक्ति तकारेन प्रवर्त्तते तोउपसर्गाद तीतिन
समकालव्यक्ति ग्रहणाय विधार्थ ये वै न त कुतो नेतिन शाकं दंच विभाक्ति तकारेन प्रवर्त्तते तोउपसर्गादतीतिन
परकरणात् अदोरवित्यत्र दकार एवेति न दोषः सर्वपंचसमासाभावपक्षे तकार उच्चारणार्थो मुखसुखा
र्थो वेति स्पष्टं चेदं वध्यादिसूत्रेषु भाष्ये ननु एवं तिन्यादि न मिति सूत्रे तिनिशत्ताय ग्रहणं कार्यग्रहमा भूत् तथा भ्यां
यामिरित्युक्तादिव उदित्यत्र दित्वमाश्रित्य वार्त्तिकं प्रत्याख्यानं भाविदीर्घयाद् त्याद्यर्थेत परसूत्रे चर्त्वेन द
कारो विश्लिष्यत इत्युक्तं भाष्ये तेनैव हि रूप्यत इति चेन्न भाविदीर्घस्य संप्रसारणसंज्ञायां तद्भावित पक्षा
श्रयणं रूपप्रकारान्तरेणव्याख्याते सिद्ध न यामदसो से वित्यत्र समाहार द्वंद्वे नैव निर्वाहाद्भाव्यमानो कार
स्य सवर्णग्राहकत्वज्ञापने फलाभावेन च तद्भाष्यस्य प्रौढिवाद परत्वात् अदोरवित्यत्र धकारस्यापि
कदस्य सत्वाच्च इत्यादिक वृद्धिरादैच् वृद्धिः आत ऐजिति पदत्रयं तत्र तत्य स्यभिन्नपदत्वेन च तत्पृष्ठं वा अतो न
समासांतादिप्रवृत्तिशंका न परकरणमसंदेहार्थं तथा पूर्वार्थ यथोद्देशपक्षे त्रिमात्रादिव्यावृत्तये परार्थम
भाष्ट पि यत्नुर्थ्यसंहितेत्यनुवर्त्यं ग्राह्य संज्ञायां नेत्यर्थाज्ग्राहकसूत्राप्रवृत्ति रितितन्न तस्यप्रथमान्तत्वात् उद्वेरुदा
त्तइत्यादौ दोषापत्तेश्च तेन रमेश्वाः गंगोदकमित्यादौ त्रिमात्रचतुर्मात्राणां त्रिमात्रचतुर्मात्रान चतुर्मात्रो
पिप्लुतावेचइदुतावित्यत्र भाष्ये स्पष्टः प्लुतस्य विषयेस्मृत इति प्लुताप्लुतप्रसंग एवेति बोध्यं अत्र तद्धितार्थे
तिसूत्रसंमतस्येकृया सत्ताः क्रियंत इति पक्षेयें ग्रीयथोद्देशं संज्ञापरिभाषमित्याश्रीयते तदा यथोद्दे
योगः प्राप्यप्यमित्याद्युद्देशपलक्षणं तशाह एवकारश्च स्याद्युपादेयलक्षणमित्यमिथुनोक्ते स्त्रयेवा

नुभवाच्च पाठक्रमादार्थक्रमस्य बलीयस्त्वेनादैज्वृद्धिरित्यानुपूर्वीकल्पना हेयः वृद्धिशब्दस्य पूर्वपाठस्तु मं
गलार्थो ग्रंथादौ वर्णसमाम्नायस्तु न पाणिनिकृत इति भागे वोक्तं वृद्धिशब्दस्तु पदपरः अर्थपरतायामसं
भवात् व्याख्यानाच्च संख्यासंज्ञासूत्रे भाष्ये स्फुटमेतत् तथा आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थः यदा
भेदोर्थस्तु वाच्यवाचकयोरभेदात् अत एवायं मन्त्रो ग्निरितिवदयं डित्थ इत्यादिर्व्यवहारः पदपदार्थयोस्तादा
त्म्यस्यैव शक्तितायामंजूषायामुपपादितत्वात् तदुक्तं हरिणाऽपि वध्यादयोपि शब्दाः स्वरूपोपनिबंध
नाः आदैच्त्वात्यायिते शब्दैः संबंधं यांति संज्ञिभिरिति निश्चितं एवं रामे निष्ठुरं नाम मानभंगः पिनाकि
नः गर्वभंगो भार्गवस्य शौर्यभंगश्च वालिनः हिरण्यपूर्वं कशिपुं प्रचक्षते इत्यादिप्रयोगोपपत्तिः
नामनामिनोरभेदात् न च कशिपुपदस्यासुरविशेषलक्षणा हिरण्यपूर्वपदं तात्पर्यग्राहकं हिरण्य
कशिपुनामकत्वेन प्रतीत्यनापत्तेः न च हिरण्यपूर्वकशिपुपदवाच्यत्वेनासुरविशेषकशिपुविशेषलक्ष
णा इतरत्तात्पर्यग्राहकमिति वाच्यं बाधादिप्रतिसंधानाभावेपि बोधात् वृद्धिप्रयोजनान्यतराभा
वेन काव्येनेपार्थदोषापत्तेश्चेति यथाक्रमेक्ष्येयः आदैजुद्देशेन वृद्धिपदाभेदो विधेयः स्पष्टश्च पदा
र्थयोरभेदो ध्यागोरित्यत्रकः शब्द इति भाष्यार्थो न याकोस्तु भेदोक्तः न च वृद्धिपदोद्देशेनादैज्भेदए
व विधेयोस्तु एवं चानुपूर्वीव्यत्ययोपि न कल्प्यः पदविशेष्यक शक्तिग्रहस्यैवार्थविशेष्यशक्तिग्र
हस्योपयोगीकारादेदेङ्गुण इत्यादौ अदेङुद्देशेन गुणपदाभेदस्य विधाने नानुपपत्तिरिति वाच्यं प
पदेनार्थस्मरणाय संबंधज्ञानविषया हि शक्तिग्रहस्योपयोग इति अर्थविशेष्यकशक्तिग्रहस्यै

10

शा॰ प्र॰

वैचित्र्यमितिभाष्याशयात् वृद्धिशब्दस्य संज्ञात्वं तु व्याख्यानादिना बोध्यं व्यवहाराय नियमः संज्ञा
याः संज्ञिनिष्ठं चिह्नमिति पक्षे तु वृद्धिशब्देनादैच एव बोध्यं तदर्थस्य सत्वात् वृद्धिशब्दस्य प्राथम्यमे
वयुक्तं अत्र पक्षे यथा ज्योतिष्टोमराजसूयादिशब्दानां यागविधावेव यागसामानाधिकरण्यान्ना
मधेयत्वावगतिर्न तु वाक्यान्तरेण तथा मृजेर्वृद्धिरित्यादावेव सामानाधिकरण्यान्नामधेयत्वावगति
मृजेर्वृद्धिरित्यादौ न ह्याचकपदकल्पनयार्थोपस्थित्यंगीकारात् शाब्दबोधे वृत्त्या पदजन्यपदार्थो
पस्थितेः कारणत्वस्य हानिः वृद्धिरादैजित्यादिकं त्विको गुणवृद्धी इत्यत्र उपस्थापकं उपस्थाप्य+
स्योपस्थापकेन वृद्ध्यादिपदेन वृद्धिर्यस्येत्यादौ तस्याबोधनात् परसंज्ञा सूत्रत्वव्यवहारः अत्र पक्षे
विधिवाक्ये नैव वृद्धिसंज्ञाविशिष्टानामादैचां भाव्यमानत्वात् सवर्णग्रहणप्राप्त्या तपरत्वमसं
देहार्थं न च वृद्धिर्यस्याचामित्यादावादैचामनुपस्थितौ सवर्णग्रहणं दुर्वारमिति वाच्यं नादैचां
त्वाभावे नेष्टापत्तेः क्वचिद्विधिवाक्यस्योपजीव्यत्वेन प्राधान्यात्तन्निर्णीतार्थग्रहस्यौचित्याच्च
अत्र चातद्भावितानामपि ग्रहणं तद्भावितमात्रग्रहणे मानाभावात् शालीयादयः सिद्धेश्च कुर्वन्त्व
यस्मयादित्वेन भत्वात् उभयसंज्ञकत्वाच्च संहितापाठे जस्त्वं भवत्येवेति दिक् ॥ भूवादयः भूश्च वा
श्चेति द्वन्द्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः ततः आदिशब्देन बहुव्रीहिः तेन भूप्रभृ
तयो वाप्रसदृशाश्चेत्यर्थः केचित्तु भूसदृशा वाप्रभृतयश्चेत्यर्थः धातुपाठे चादादिगणे सस्वपादौ ।
वाधातुः आदिप्रभृतिभ्यश्चात्र बहुव्रीहिर्न तु रूपयोरेकशेषः ध्वनितं चेदमत्रैव भाष्ये चुरादिमनो

भूवादि र्थेषामिति चिपलि सति भ्वादयः इति यद्यपि भवितव्यं तथापि अस्मादेव निपातनाद्वकारः तथा च वार्त्तिकं भूवादीनां वकारोयं मंगलार्थः प्रयुज्यते भवो
वार्थं वदंतीति भ्वार्था वा वादयः स्मृतः अस्यार्थः भूवादिशब्दयोः श्रूयते वकारः सोऽनान्तरीयको ऽपि निपात्यते कुतः इत्याह मंगलार्थं इति अथ पूर्वं सत्त्वाभावे धात्वादिवल्मं
गलं यद्वा वकारे निर्दिष्टे विकल्पव्याहृति स्मरणमेवं ... अर्थावस्थादिना ... इत्याह्वकारागमः प्रकारान्तरमाह भुवो वार्थान्वदंतीति वा भुवो धातोरर्थे
वदंतीति भ्वादयः इति निदिश्यते तात्पर्यं प्रदर्शनमिदं व्युत्पत्तिस्तु भवनं भूः किं मा सा तां तं ... पदादित्यादौ वेकिप भुवं वदंतीति भूवादयः वदेरौणादिकरत्रसप्तः ॥

रमायां चेत्याहुः स्वस्मिन्न च सारूप्यं च श्योगभेदेनोपपाद्यं तेन भूवः संज्ञासिद्धिः सारूप्यं क्रियावाचकत्वेन तदाह ।
क्रियावाचिन इत्यादि क्रियावाचिनः किं याः प्रपूपसीत्यादावातो धातोरिति माभूदिति नचार्थनिमित्तकत्वाद्योग।
द्विरंगत्वेन लोपेऽसिद्धत्वं नाजानन्तर्ये इति निषेधात् तन्नोपि वहिर्भूतार्थनिमित्तकविभक्तिसापेक्षत्वेन लोपस्यै
व वहिरंगत्वाच्चनाप्यस्य लाक्षणिकत्वं नकारस्यानुस्वारः पंच मौक्षलि धातुषु सकारान्तः सकारस्य षोढ्वं वर्गस्त्व
र्गत्व इत्यभियुक्तोक्तेः ध्वादिषु लाक्षणिकानामपि दर्शनेन तद्विषये तत्परिभाषाऽप्रवृत्तेः आतो धातोरित्यत्र प्र
तिपदोक्तस्याकारो गृह्यत इति न्यवक्तुमशक्यं प प्रपुपइत्यासिध्यापत्तेः प्रस्तुतं न नोतीति विट् विड्वनोरित्यात्वं
श्रुतएव जहातिसामित्यादिनिर्देशात् संगच्छते नचातोनापइति वार्त्तिककृन्मते क्रियावाचिन इति विशेषणं व्या
र्थं यथा श्रुतस्य तन्मतेऽसत्त्वात् विकल्पार्थकनिपातवाशब्दस्य धातुत्वे प्रातिपदिकत्वाभावात् सुबभावे पदत्वा
नपत्तेः श्रुतलः शाकटायनोऽत्यादि तु मुनापन्नेष्ट नच प्रत्यासत्त्या धातुपाठपठितार्थानामेव ग्रहणान्न दोषः तद्रहितधातु
पाठस्यैव प्रकृतस्य तन्त्र भाष्यध्वनितत्वात् अर्थनिर्देशोपि तस्योपलक्षणत्वाच्च अत एव पराभवति केशान्वयती
त्यादौ धतुत्वं क्रियात्वं च साध्यत्वेन प्रतीयमानत्वं साध्यत्वं च क्रियान्तराकांक्षानुत्थापकतावच्छेदकवैजात्य
वत्त्वं श्रस्यादीनामपि क्रियावाचकत्वं प्रहरत् क्रियाप्रकारेषु जायतेऽस्ति विपरिणमते इत्यादिषु प्रस्तुतगणनात्
भूतभविष्यत्कालसंबंधात् प्राक्ष्यासन्नविघ्ननाशमुद्दिश्य किं करोमीति प्रश्ने स्तौत्यनुत्तरत्वाच्च उपसर्गास्तु द्योतका एव
धातव एव वाचका इति प्रपचादिसमुदायानां न धातुत्वं प्रपाठाच्चेति सर्वं भाष्ये स्पष्टं भ्वादयः किं शप्यन्तर इत्यादिना
वार्थकतिङन्तानां हि रुगादीनां च माभूत् हि रुगादीनां क्रियासमानाधिकरणलिंगाद्यनन्वयित्वाच्च क्रिया

११

शा॰ प्रा॰

तंबाध्यं हि रुगादीनामव्ययपाठस्तु ज्ञापति यदि कत्वाद्यभावे व्यकत्वाद्यर्थः स्यात् यत्तु तत्पाठसामर्थ्याद्धातुत्वाद्यभाव
कल्पितमिति तन्न प्रधानबाधकल्पनापेक्षयाऽधिकृतविशेषणबाधकल्पस्यैव न्याय्यत्वात् यदि तु क्रियांतरा
कांक्षादर्शनेन तेषां न क्रियावाचित्वं तदायमेव पक्षमुदाहरणं न च कालस्यापि तद्दर्शनेन क्रियावाचकत्वानुप
पत्तिः कालस्यापि धात्वर्थत्वात् लकारस्तु द्योतका एव कालाद्यवाचकभावार्थकलकारे दोषाच्च स्वं प्राग्दि
नां तु सौत्राणामुदित्करणेन तस्य कृति कल्प्यनुवादेनाडु विधानेन सार्वधातुके परे विकरणविधानेन च धा
तुत्वं ज्ञाप्यतेऽन्तु चक्रमेऽस्त्वत्र पठितत्वोः त्वपत्वमेत्यत्र पठितयसः करतिप्रभृतीनां च धर्मिग्राहकमानात्
केषांचिद्धात्वधिकारविहितकार्यादर्शनात्तु बाध्यं चुले पटु ष्ठिविल्लव इत्यादीनां वकुलमेतन्निदर्शनामि
त्यनेनेतिदिक् प्राग्रीश्वरान् रीश्वरप्राक् स्यचाधिरीश्वर इति सूत्रस्थस्य ग्रहणं रेफविशिष्टोच्चारणा
त्वीश्वरे तोसुन्नित्यादिस्थस्य न ग्रहणं अन्यथा व्याप्तिन्यायेन तस्यैव ग्रहणं स्यात् क्वचिदमुक्त इति स्य एं
भाव्ये तत्रीश्वरात्प्रागित्युक्त्वे नाध्यक्षो संबंधोत्स्यैव तस्य नतः प्राक्सत्वात् एतेन तद्धिहितकर्मप्रवच
नीयसंज्ञया निपातसंज्ञायाः समावेशेन स्यादित्यपास्तं प्राप्तविभाषात्वाच्च विभाषा कृञीत्यत्र न दो
षः यद्वा रीश्वरमभिव्याप्येत्यर्थः त्यप्लोपे पंचमी प्राग्ग्रहणं त्वेकसंज्ञाधिकारेऽपि गत्युपसर्गकर्मप्र
वचनीयसंज्ञाभिः समावेशार्थं प्राक् निपाताः संतो गतपर इत्यर्थात् तेनाव्ययत्वाद् गतिसंज्ञकेषु स्वपः
श्रवणेन अप्राप्तेनु प्रागित्याव्ययमित्याहुः न चाव्ययसंज्ञाप्रकरणे चादयोऽसत्वे इत्यादिप्रकरणा।
स्तु च निपातसंज्ञा एवं चैकसंज्ञानधिकारात्संज्ञासमावेशोपि सिध्यतीत्यपरमनुकूलमिति वाच्यं

कर्मप्रवचनीयसंज्ञया प्रिगन्यादीनां समावेशापत्तेः तथाच ज्यमत्र प्रावर्षदित्यादौ गतिर्गताविति निघातः
स्यात् महासंज्ञाकरणेन तु नियमेन पातयन्तीत्यर्थमन्यस्मिन्नित्यन्वर्थलाभाय तेनैषां द्योतकत्वं बोधितम्
अत एवोरीक्रियते साक्षात्क्रियते अनुभूयते पुरस्कृत्यादौ कर्मणि लकारः संगच्छते नचैवं तत एव पशुशब्दादे
र्थोऽस्तीति सिद्धौ चादयोऽसत्त्वे इत्यत्रासत्त्व इति व्यर्थमिति वाच्यं स्पष्टार्थत्वात् अत एव पदैकदेशानां चादीनां संज्ञा
ग्रर्थवत्त्वाभावाच्च पादपूरणार्थानां तु निपाता इति बहुवचनात्साधुत्वं यद्वा निपातनं निपातो नेकेष्वर्थेषु येषामि
त्यर्थश्चायच्च तेन निपातानामनेकार्थत्वं सिद्धमित्याहुः असत्त्व इति न प्रसज्यप्रतिषेधः वाक्यभेदात् समर्थ
समासापत्तेः तथा च नयत्राह अद्रव्येति सत्त्वं तु लिंगसंख्याकारकान्वयित्वं नच पर्युदास एवास्त्वितीति वाच्
त्वस्य क्रियाविशिष्टद्रव्यवाचकतया क्रियायाश्च द्रव्यभिन्नत्वेन निपातत्वे स्यादिति वाच्यं ` ` द्रव्यवाच
पशुशब्दादेरपि विशिष्टप्रातिपदिकार्थादि पक्षे लिंगाद्यर्थकत्वेन व्यावर्त्यालाभेन सामर्थ्याद्द्रव्यमात्रार्थकत्व
विवक्षणेनादोषात् महासंज्ञाया बलेनैवास्तु नत्वत्र पर्युदासेनार्थकानां निपातत्वानापत्त्या प्रसज्यप्रति
षेध एवोचित इत्याहुः चादयः किं स्वरादिमात्रपठितसत्त्ववाचकानामभूत् तथासति निपातत्वादायु
दात्तत्वं स्यादिति बोध्यं लोधं नयन्ति पशुमन्यमाना इत्यत्र तु स्यादेव निपातत्वं तत्र हि पश्विति सम्यगर्थे
ऽव्ययं तु त्वमृषिं नयन्ति पशुं मन्यमाना इति तान्तु स्याच्चपादस्तु निरुक्तेऽस्यां प्रदायिक एव लोधशब्दार्थ
निर्णयाय तस्य प्रयुक्तत्वेन पशुशब्दांशाऽन्यथा पाठे मानाभावात् अत एव लोधमिति अनवगतमि
ति तद्भाष्यव्याख्यानं स्पष्टं चेदं प्रकृतसूत्रे हरदत्तग्रन्थे दशाधातौ माधवग्रन्थे च गतिसंज्ञासूत्रेति

प्रा॰ शे

12

चकार उपसर्गसंज्ञासमावेशार्थः तेन प्रणिप्रणीत मित्यादौ गतित्वात् कृतिरनन्तर इति स्वर उपसर्गत्वात् ण+
त्वादि च सिध्यति योगग्रहणं तु पदार्थे प्रादीनामन्वयस्तत्र प्रत्येकं गत्युपसर्गत्वमिति बोधनार्थं प्रत्यासत्ति
न्यायात् अतएवाभेदेऽप्यर्थविशेषकत्वमिसावयतीत्यादौ षत्वं न प्रादय इति योगविभागकरणं तु क्रि।
यायोगं विनापि निपातत्वाय तेन प्रगतस्याचार्यः प्राचार्य इत्यादावव्ययपूर्वपदप्रकृतिस्वरः सिध्यती
ति प्राञ्चः केचित्तु उपसर्गा विभक्तिस्वरप्रतिरूपकाश्चेति चार्थं तगणसूत्रेण तत्र निपातत्वसिद्धिरित्याहुः
वस्तुतस्त्वेतद्योगविभागसिद्धमेव तत्रोपसर्गग्रहणमिति भाष्याशय इति दिक् अपरे त्वाहुः प्रकृति
वदनुकरणमित्यपि देशान्तरपोलुक् अनुकार्यानुकरणयोरभेदविवक्षयानुत्पत्तिरेव वा निस
निर्दुस्सुदुरिति निसस्तपतो निसोगत इत्यादिनिर्देशादुपसर्गस्यायतनाविस्पष्टत्वामनोऽन्ते शुसांतेनिरः
कुषः सद्वोरधिकरणे इति निर्देशादिफान्तावपि इति बोध्यं ननु निरः कुष इत्यादिशास्त्राणि निसिन
प्रवर्त्तेरन् न च प्रयोग एव शास्त्रप्रवृत्त्या प्रयोगस्यानामिदमनुकरणं तथा त्रितिसूत्रस्य भाष्यस्वरसा
त्प्रयोगे चोभयोरपि शेतत्वान्न दोषः केचित्तु गत्या प्रयोगार्थं कल्पितस्याप्यनुकरणं यथा लटः
शतृशानचावित्यादाविति न दोष इति वाच्यं एवमपि निस्संबंधिनिरोऽलाक्षणिकतया तदनुकर
णे इति चेन्न एकाच उपदेशे इति सूत्रानन्तरं निरः कुषो निष्ठायामिति लघुभूतन्यासे न सिद्धे सत्यपि
स्त्रीति विकल्पप्रकारेण निरः कुष इति निष्ठायामिति गुरुभूतन्यासकरणस्योपसर्गहृदयो न रूपद्वय

स्यसिध्यावैयर्थ्येन तां नोपसर्गग्रहणोपलक्षणम् इति दीक्त परिभाषाया अप्रवृत्तिज्ञापनार्थतयाऽदोषात् नञ्प्र
माणानां सामान्ये पदस्पातात् व्याख्यानाच्च निष्ठायामिति पर्युदासे प्रत्ययत्वेनैव सारूप्यं न रुत्वेनेति +
पर्युदासेन क्त्वेवं प्रवर्त्तेनेति न प्राक्त नचरुस्तभृ इति क्तादि नियमानिश्च कोषि ये त्यकमेव स्यात्
घञ्यान्यासेन तु न निषेधप्रापितस्येवायं नियम उत्तरार्थस्य वक्ष्यमाणत्वादिति वाच्यं नियमस्य सज्ञा
नीयत्वेनोपसर्गानिमित्तनिषेधप्रापितस्येव नियमात् विकल्पप्रापितस्यापि नियम इति वादिनां मते यथा
न्यासे दुर्वारत्वेनेष्टापत्तेश्च मदुक्तरीत्यारीत्या वारणे तु समं अत एव दुरदुपसर्गेत्वस्य निषेधे दुःसोपि निषे
धः तेन दुःषेधतीति चिंत्यं एवं च निष्कोष्टानि क्कोषितेति रूपद्वयसिद्धये विकल्पप्रकरणे पाठ आवश्यक अप।
कः अत एव क्वचिन्निस इति क्वचिन्निर इति वैलक्षण्येन निर्देशः सूत्रकृतः संगच्छते तं तेउभयग्रह +
णाय अत एवासिद्धत्वमपि न नचयथान्यासेपि निरङ्कुशोऽनिष्ठायामित्येव कुतो न सूत्रितं नयस्य विभाषे
त्यस्य प्राप्त्यानिष्ठायां विकल्पस्य प्राप्तेरनिष्ठायामित्यस्य वैयर्थ्यापत्तेः सामर्थ्यान्नानुमानिकवचनक
ल्पने तु न किंचिद्बाधकमित्याहुः परे तु इदन्तास्योव निस्नु निर्दुरामिव सूत्रभाष्यादावव्यवहृतत्वात् व
त्रिकारादीनां तु प्रमाद एव निरङ्कुशोऽनिष्ठायामित्येव तु सूत्रयितुमुचितं यत्तु इदुपधस्य चेत्यर्थेऽह
यवरट् सूत्रभाष्ये उक्ताद् दुष्टुतमित्युदाहरणं दत्तं तन्न तत्रत्यस्य ग्रहणस्य प्रयोगवादीदुग्धांपरं विसर्जनीयि
प्रोषधिष्यामरत्नु नरभाष्येक वाक्यतयोपलक्षणेनायाश्चावश्यकत्वात् ज्ञापकार्थसाधकं मूलं तु इत्यनुरोधेन
त्याहुः नवेति इति शब्दो मध्यमणिन्यायेनोभाभ्यां संबध्यते व्याख्यानात् स च लोकेऽर्थपदार्थकस्य

श॰शे॰ शब्दपदार्थकत्वं करोतीत्युपस्थितत्वात् यथा गवित्ययमाहेति इह तस्य रूपमिति परिभाषणात् शब्दप
दार्थकस्यार्थपदार्थत्वमिदमेवेतेः पदार्थविपर्यासकृत्त्वं नाम तेनार्थ एव संज्ञी संज्ञा च शब्दस्यैव संज्ञा
13 त्वेन ज्ञातोऽन्यतरस्यामित्यत्रोपस्थितिर्न स्यात् तस्यैव संज्ञित्वे तु विभाषा श्वेरित्यस्य न शब्दो वा शब्द
आदेशा रूपार्थः स्यात् संप्रसारणग्रहणानुवृत्त्या वा विपर्यायः स्यात् न चेत्येवं उ निपातार्थत्वेन
गृह्यते इति शब्दस्य प्रत्येकं संबंधात् तेनिवेतीति अत एव संज्ञाकरणं चरितार्थं अन्यथा विभाषा।
प्रदेशेषु नेत्येव वदेत् न च तयोरपदार्थतयाऽन्वयप्रसंगः विकल्पवाचिपदस्य तयोर्लक्षणाभ्युप
गमात् तथा च लक्षणा नान्यथेति ग्राहकमिदं सूत्रं साचार्थद्वये सूत्रानुरोधात्क्रमेणैव जनितान्वयबो
धेनैराकांक्षादिकमपि सूत्रवल्लोटवत् तत्र विभाषोपपदेनेत्यादिप्राप्तविभाषायां नास्योपयोगः
तद्विषये सर्वत्र स्वरितञितः इत्यादिना नित्यमात्मनेपदप्राप्ते तस्य पक्षे निवृत्तिमात्रार्थत्वात् ननु नेयं प्राप्तवि
भाषा उपपदेन प्रतीयमाने कर्तृगामित्वे उक्तार्थानामप्रयोग इति न्यायेनात्मनेपदाप्राप्ते स्पष्टं चेदं वि
भाषोपपदेनेत्यत्र कैयटे इति चेन्न कर्तृगामित्वविषये वृत्ति व्याख्यानस्यैव तत्सूत्रस्थभाष्यप्रामाण्ये
नोचितत्वात् विभाषोर्णोरित्याद्यप्राप्तविभाषास्वपि नोपयोगः तस्य पक्षे ङित्वविधिमात्रार्थत्वात्
अप्राप्तत्वेन निषेधासंभवाच्च श्रोर्णोर्ऊवीत्यत्र तु परत्वात् सार्वधातुकमपिदिति नित्यं ङित्त्वमेव भवति
किं तूभयत्र विभाषास्तु विभाषा श्वेरित्यादिका स्यावपूर्वकं तत्र हि संज्ञासूत्राभावे यदि विधिमु।
खेन प्रवृत्तिस्तर्हि पित्त्वविकल्पः स्यात् किं त्वनुपज्ञादित्वान्नित्यमेव संप्रसारणं स्यात्

निषेधमुखेन प्रवृत्तौ तु कित्त्वेव प्रवृत्तिः स्यान्न तु पित्त्वे उभयथा प्रवृत्तिस्तु वैरूप्यलक्षणवाक्यभेदापत्ते
र्न युक्तमशक्यत्वा वस्तुतो भावनात्पर्यकतालाभेन पित्त्वेव प्रवृत्तिः स्यात्कित्त्वे तु न स्यादेवेति बोध्यं संप्र
करणे तु श्रुतक्रमानुरोधात् पूर्वं निषेधः पश्चात्प्रवर्तते ततः कित्कार्ये सर्वस्मिन्निति पक्षे रूपं प्रापिते
सति पश्चाद्भवतीत्येकतरेण विधिमुखेनैव विकल्पः न चोभयत्र विभाषार्थमावश्यकमप्राप्ते विभाषास्त
विप्राप्तेति घटायोन्मीलितं चक्षुः परं न हि न पश्यतीति न्यायात् एवं च विभाषयोर्विदितिसूत्रेण प्रो
क्तं वीत्यत्रापि निषेधाद्बलीयांस इति सार्वधातुकमित्यस्य निषेधे ततो विकल्पः स्यादिति वाच्यं वि
भाषा न सीत्यतो विभाषाग्रहणानुवृत्त्या क्वाचित्कत्वाभ्युपगमेनादोषात् अत एवोभयत्रा दृष्टा
मच्चरमेति विकल्पो नेति वक्ष्यमाणं संगच्छते अन्यथा नत्रापि न वेत्यस्योपस्थितावुभयत्रापि तरंगा
याश्चापि निषेधे सर्वसाधारण्येन विकल्पः स्यात् न चांतरंगत्वादेव तस्य न निषेधः न वेत्युपस्थिति
वैयर्थ्यापत्तेः निषेधाश्च बलीयांस इति न्यायाच्च न तत्र लक्ष्यानुरोधेन व्यवस्थेति दिक् स्वं रूपम् ॥
स्वं रूपमिति न संज्ञापरं पूर्वनिर्देशात् रूपग्रहणेनार्थस्यापि विवक्षेति भाष्यविरोधाच्च तस्मात्संज्ञि
परं तदाह संज्ञीति रूपं शब्दस्य संज्ञेति भाष्येपि संज्ञाशब्दः संज्ञायत इति व्युत्पत्त्या बोधार्थपर इ
ति न कोऽपि दोषः राज्ञोपदित्यादौ लौकिकव्युत्पत्त्योपस्थितार्थस्य प्रत्ययेन पौर्वापर्यासंभवात् शब्दद्वारा व्या
नेमानाभावात् प्रातिपदिकादित्यनेनाभेदान्वयासंभवाच्च सामर्थ्येन वक्ष्यलक्षणसंस्कारानुरोधेन तदर्थे
क शब्दमात्रग्रहणापत्तौ नियमार्थं सूत्रं तत्र स्वशब्देन शब्दस्वरूपात्मवाची नपुंसकनिर्देशानापत्तेः

14

शा॰ शे॰ रूपग्रहणं चैवं पर्यायेष्वेव न च रूपग्रहणाभावे आत्मीयवाचकतया ऽर्थस्यैव संज्ञित्वं स्यात् न शब्दस्येति तच्छंका
वारणार्थं रूपग्रहणमिति वाच्यं प्रतीतावुपदेशानपेक्षत्वादसाधारणत्वादंतरंगत्वान्नियतोपस्थितिकत्वा
च्च शब्दस्य स्वं रूपं रूपात्मवाचकस्यैव ग्रहणात् अर्थो हि प्रतीतौ संबंधग्रहणमपेक्षते साधारणश्च पर्यायैर
पि प्रतिपादनात् बहिरंगश्च यद्ज्ञानजन्यबोधविषयत्वात् अनियतोपस्थितिकश्चानुकरणदशा
याम् अप्रतीतेः किंत्वात्मीयवाची तत्त्वार्थे रूपं रूपं शब्देन शब्दस्य रूपमेतदुभयं संज्ञीत्यर्थः तत्रार्थो न वि
शेष्यः उक्तयुक्तेः किंतु शब्दविशेषणं एवं चार्थविशिष्टः शब्दः संज्ञीति फलितं तेन चांतरंगत्वादिना राज्ञ
श्व श्वशुर इत्यादौ राजन्शब्दस्यैव ग्रहणे सिद्धे स्वत्वं व्यर्थं उपस्थितार्थत्यागे मानाभावात् तस्य विशेषणत
यान्वयस्यापि संभवादिति वाच्यं उक्तन्यायसिद्धार्थानुवादकत्वेनैव स्वत्वे ऽशब्दार्थविषयेकश्चिदुक्तन्या
याप्रवृत्तेरपि ज्ञापनात् तेन तन्न पदे लुप्तस्यापत्यादौ न दोषः एवं चेदं स्वत्वं लौकिकमुख्यत्वोपस्थितार्थे
कार्यबाधे तदर्थ कालेक शब्दग्रहणे प्राप्ते ऽर्थविशिष्ट उपस्थितः शब्द एव संज्ञीत्येतदर्थं फलितम् अत।
एव श्वाचामुदीचामपत्यं पञ्चुरित्यादौ न दोषः अर्थे कार्यस्याबाधात् एवं चार्थवत्ग्रहण परिभाषा।
सिद्धा उपस्थितोऽर्थश्च मुख्यः प्रसिद्ध एव गृह्यते तेन गौणमुख्यन्यायः अभिव्यक्तपदार्था ये स्वतिन्याय
श्च अर्थानुपस्थितौ तु केवलशब्देपि इदमेवाभिप्रेत्यार्थपरिभाषाविशिष्टोपादानविषयेत्युक्तं न
चाशब्दसंज्ञेति व्यर्थं उपसर्गयोः किरित्यादौ अर्थकार्यस्याबाधादिति वाच्यं दाधाघ्वदापित्यस्य ईहल्य
।घोरित्यादौ चारितार्थ्येनोपसर्गे घ्वोरित्यादौ स्वं रूपमित्यनेन पुरत्वाद्बाधवारणार्थत्वात् कार्यकाल
पक्षे प्यविशेषात् क्रधातोदाधाप्रश्च प्राप्तत्वाच्च न च शब्दस्य संज्ञेति न षष्ठीतत्पुरुषः कर्मसंज्ञादेर

र्थसंज्ञात्वेन निषेधाप्रवृत्तेः कर्मण्याप्नीत्यादौ स्वरूपग्रहणापत्तेः अर्थकार्यस्य बाधसत्वात् किं तु सप्तमी
तत्पुरुषः तत्र शब्दपदेन शब्दशास्त्रलक्षणे यथाश्रुते बाधानुपपत्तिश्चेत् तदेतत्सकलमभिसंधा
याह शब्दशास्त्र इति इदमपि स्वत्वाद्यायवर्णानामात्रविषयं येन विधिः एवेति करणे तृतीया न कर्त
रि कृद्योगषष्ठ्या बाधात् विधिरिति कर्मणीति किः ननु भावे न घ्यासमिति कर्मणोनुपादानात् साकाङ्
क्षतापत्तेः करणं च एतत्तन्त्रं कर्त्रीप्सिततमस्यैव तत्त्वात् न च एवरञ्जित्यादौ रुकावादीनां च शब्दान्त
स्वरूपतोऽवभासने वास्यादिविधिवत्तत्वादीनां अतो विवक्षानिबंधनं तद्रूभयं बोध्यं एवं च तृतीयया
पारतन्त्र्यं लक्षणे न च शब्दानां विशेषणभावेन एवं च विशेषणमिति लब्धं तदप्यंतरंगत्वात् सा
मानाधिकरण्येमेव न तु व्यधिकरणं तत्र तदेतद्विधौ सन्निति सामानाधिकरण्येन विशेषणत्वप्रयोज्यता
यत्वतदैश्चैः निमित्तं एवं तु हन्त्यादौ रनेशोनदं तां विधिः न गमित्यन्वयो भवति बाधात् यद्वा बाधज्ञा
नस्य बोधेः प्रतिबंधकत्वात् तादृशबोधाभावस्यैव तन्त्रत्वं न तु पयोगी वा यज्ञानेन ज्ञायमानबोधेः प्रामा
ण्यज्ञानजननात् सन्नसौ लक्ष्य संस्कारकरत्वात् एवं च बाधात्वस्य चेत्यंशस्य रशेविषये प्रवृत्ति
र्बोध्या तदाह विशेषणमिति तदेतस्येति स्वं रूपमिति स्वत्रक्रूरस्येत्यनुवर्तनात् तदेतस्य शब्दस्येत्य
र्थः अत एव पक्षे न शब्दो लब्धः नन्वेवमेरज्जित्यत्र न स्यादत आह स्वस्येति स्वमित्यनुव
र्तिष्यत्यावि पर्णाप्यत इति भावः समासप्रति विशेषणविशेष्यभावव्यत्यासेन तात्पर्यग्राहकमि
दं एवं च द्वितीयाश्रितेत्यादौ श्रितादयो विशेष्यास्तु द्वितीया विशेषणं स्यपत्तेन रूपं परमाश्रितत्वं तत्र न

15

शा॰ शो॰

समासः एवं नञादिभ्यः फगित्यादावपि नञादिविशेष्यं प्रातिपदिकं विशेषणमिति फलितं तेन सोऽत्र ना
ऽन्यत्र फक् नन्वत्र तदन्तविधिसत्त्वेऽपि नञ्सतिः श्रितां तस्य सत्त्वे तत्त्वाभावात् श्रितशब्दस्य तत्प्रकृतिके
लक्षणया तेन तदन्तविधावपि तच्छ्रितप्रकृतिकोत्तरत्वलाभाभावादिति चेन्न समभिव्याहृतस्तुवादिप्रत्य
यान्तिम प्रकृत्यंशप्रतिश्रितादीनां विशेषणत्वे प्राप्ते तदन्तविधेर्निषेधार्थत्वात् अत एव वत्रद्वाहेपेत्यादि
चरितार्थं अन्यथा सर्वेतोपः त्वद्भाशब्द इत्यर्थे संभवः स्यात् एतेन तद्युग्मं तमेवोदाहृतं न्यायमिति के यद्वा
यत्कं टावेन मपीति नव्योक्तं च परास्तं मद्युक्तरीत्या सर्वत्र समासस्य स्थलभत्वात् अंतरङ्गानपीति न्यायेन
संबुद्धिलोपहलङ्यादिलोपाप्राप्तावुक्तरीत्या तत्रापि दोषाभावाच्चेति दिक् उगिति उगितावर्णो न यत्र प्राति
पदिकं विशेष्यं तेन तदन्तविधिर्भवत्येवेत्यर्थः तेनातिभवतीत्यत्रोगितश्चेति ङीप् दातिरित्यत्रान
ङ्गीत्वं जितीश्च सिद्धः शत्रन्तभवत इति सर्वादिपठिते अस्यापत्यं इः काम इत्यत्र च चरितार्थम् त्रित्वं तु
वाहादिभ्यश्चेत्युत्तरत्र चरितार्थं अत्र तस्य चेत्यंशो व्यपदेशिवद्भावेनापि सिद्ध इत्याहुः विरामः
भावे घञ् शब्दानुशासनप्रस्तावादाह वर्णानामिति शब्दनित्यत्वे वर्णानामुच्चारणाभाव इत्यर्थः स
च स्वभावाद्वा व्यापाराद्वा किंचिद्वर्णोच्चारणानन्तरकालिक एव गृह्यते प्रदेशा वावसाने इत्यादयः अ
भावस्यापि वृद्धिरुत्तरपैच्छापर्यमस्त्येव यथोच्चरितप्रध्वंसिनां नित्यविभूनां वा वर्णानां परशब्दोना
न्तार्थः अन्यत्वस्याव्यभिचरितत्वादत आह अतिशायित इति अर्धमात्रातिरिक्तकालव्यवायेन
रहितः परः किम् अवग्रहे माभूत् मात्राकालो ह्यवग्रहः अन्यथा सन्निकर्षस्य पुरुषभेदेनाव्यवस्थि
तत्वादत्रापि स्यात् परग्रहणेन तन्मामध्यान्सर्वापेक्षया न्यूनस्यार्धमात्राकालव्यवायस्य सत्त्वे

यद्यपि क्रमिकाणां वर्णानां प्रत्येकमुच्चारणक्रियाकालहेतु व्यवधानमस्त्येव तथापि तस्यावर्जनीयत्वादर्धमात्राकालव्यवधानमाश्रीयते ततो निरिक्तं परमाश्रयो यत्र वर्णे यति अत्र संहितामधीते न पदानीति प्रयोगे के पदसंनिकर्ष एव संहितामाहुः श्रासेहानत्नु वर्णसंनिकर्ष इति सं... रंभः सन्निकर्षमात्रे शक्तिरुक्त्वात्रार्थः सन्नयेतिवान्तिककारः यदाह संहि तावसानयोर्लोकविदितत्वात्सिद्धमिति ल

असमवेतत्वाच्च कालानंतरतत्वमितियावत्

कर्षस्य ग्रहणान्नदोषः एतेन परःशब्द ग्रहणसामर्थ्यात्पूर्वपरयोः संनिकर्ष एव संहिता एवं चावसा
विषयेन संहितासंज्ञेत्यपास्तं अत एवासोयगृह्यस्येत्यादीनां संहिताधिकारे पाठः संगच्छते पूर्व
संनिकर्षमात्रेणैवत्र तस्यवृत्तेः ध्वनितवेदं विसर्जनीयस्य स इति सूत्रे भाष्ये इति दिक् केचित्तु पुरुषभेदेन संनि
कर्षस्याव्यवस्थितत्वात्तयाच्चारंभसामर्थ्यादेवोक्तसंनिकर्षलाभे पर ग्रहणं व्यर्थमेवेत्याहुः संनिकर्ष
श्च न संबंधः गुणानां परस्परं संयोगसमवाययोरभावात् नित्यविभुद्रव्यत्वापक्षेऽपि न अजसंयोगनि।
राकरणात् आह संनिधिरिति व्यवाभावा इत्यर्थः सुप्तिङ् सुप्प्रत्याहारेः न सप्तमीबहुवचनं निर्देशः
स्वार्थात् स च सुपः पकारेणैव न कपः स्वादिष्वित्यादिग्रहणात् अन्यथा सुप्यसर्वनामस्थान इत्येवव
देत् यद्यपि प्रत्ययाहितप्रत्यय प्रकृत्यवयकसमुदायस्य सुप्तिङ्भ्यां विशेषणात्सिद्धं तदंत ग्रहणं
तथापि संज्ञाविधौ प्रत्ययग्रहणे तदंत ग्रहणं नास्तीति ज्ञापनार्थं मंतग्रहणं न च ज्ञापितेपि फलाभावः
प्रत्ययोरेव पदसंज्ञायामपि पदप्रदेशेषु प्रत्ययग्रहणपरिभाषया तदंत ग्रहणसंभावात् यस्मिन्नज्ञापि
प्रस्यचारितार्थ्ये न तेन ज्ञाप्यमिति सिद्धांतात्तैर्दितिवाच्यं पदसंज्ञायाः स्वादिष्वसर्वनामस्थान इति
प्रकृतिसाधारणत्वया पदग्रहणे प्रत्ययग्रहणस्यैवाभावात् अत्र त्वेत्ते प्रत्ययग्रहणे यस्मात्सविहितत
त्वाद्यन्तप्रवर्तते एवतेन नातिप्रसंगः यस्मात्प्रत्ययविधिरित्याद्यनुवृत्तेर्वा ज्ञापनफले तु नरन्तम
पोयइतिसूत्रेण न रन्तमयोरेव संज्ञा न तदंतस्य तेन गोरीब्राह्मणितरेत्यत्र न ह्रस्वः विहितांशोपस्थि
तिफलं तु पदसमुदायस्य पदत्वाभावः हरिष्वित्यादौ सोः पदत्वाभावश्च पदत्वे हि सात्पदाद्योरितिष

उत्तरादिग्रहणे न तु संज्ञाविधावपि न दंते गृह्यते केवले सज्ञानर्थक्यात् । ल ।

[illegible]

[illegible]

प्रा॰शे॰ निषेधः स्यात् नच केवलस्यैव नन्तं न त्वं व्यपदेशिवद्भावेन सुलभत्वात् यस्माद्विहितस्तदादित्वं तु नेन लाभं स्या
ति से इत्यादौ से इति प्रत्ययमात्रस्य पदत्वं स्य से इत्यवस्थायां प्रकृतिप्रत्ययसमुदाये प्रागेव प्रवृत्तं स्यात् व्यपदेशिवद्भावे
नवाधं रामा विरित्यादावप्येकदेशविकृतन्यायेनैव पदत्वं एकादेशात्प्रागेव पदत्वप्रवृत्तेः नन्वेकादेशात्कृते
ऽस्य प्रवृत्तिरस्ति उभयत्र आश्रयणे नातिव्याप्तिविरहात् स्थानिवद्भावेनापि नास्य सुबन्तत्वं यस्माद्विहितस्त
दादित्वस्याप्यशास्त्रीयत्वेनातिदेष्टुमशक्यत्वात् ईदृशो विषये लक्ष्यानुरोधाय यथोद्देशपक्ष एवाश्रीयते
कार्यकालपक्षे तु ग्रामणिसे इत्यादौ षत्वनिषेधैकवाक्यतापन्नसंज्ञा दुर्लभेति प्रांचः यत्तु कार्यकालपक्षो नाम
कार्यप्रवृत्तिसमये कार्यविधायकैकवाक्यतापन्नस्य संज्ञाविधायकस्य प्रवृत्तिरित्येव साचोपदेशेनैव
त्यत्र संकोचेन किंचिन्मात्रं स्नातिदेशवाक्यस्याप्येकवाक्यतायाः सुवचत्वात् दिव कर्मेचगतिबुद्धि
कर्त्तुरीप्सिततमम् इत्यादीनामनेकेषां कर्मणि द्वितीयेत्यादिभिरेकवाक्यताया दृष्टत्वादिति तत्र अ
रा तिदेशो नहि पूर्वसंज्ञाया आरोपमात्रे साच स्वादिविध्येकवाक्यतापन्नानस्याआरोपेपि षत्वनिषेधस्य दुर्ल
भत्वादित्याहुः वस्तुतस्तु ग्रामणिसे इत्यादौ यतः प्रत्ययविधिस्तदादित्वमपि व्यपदेशिवद्भावेन सुलभ
मिति कार्यकालपक्षेपि न दोषः नहि तेन शास्त्रीयस्यैवातिदेश इति वक्तुं युक्तं एकाज्झादेसनिदेशाना
पत्तेः तस्य लोकन्यायसिद्धताया भगवता उक्तत्वाच्च विशिष्टोपदेशाद्व्यवहारो यस्य समुदायस्य तद्व्य
वहारा एकस्मिन्नपि कर्त्तव्या इति तदर्थः समुदाये दृष्टाः शास्त्राश्रया अवयवे वर्त्तंत इति तत्र तत्र भाष्योक्तेश्च
अत एव अश्वत्थं तत्व प्रत्युक्त प्रातिपदिकसंज्ञानिषेधस्तस्य सिध्यति सतिहि प्रातिपदिकत्वे ङोत्सर्गि

कप्रश्च मेकवचनापत्तिः कुमारीत्यादौ किं स्वरापत्तिश्च स्त्रियः पित्त्वं नुमार्थं धानुकमपि दिशत्यर्थं ध्वनितं चे
द मर्थवत्सूत्रे भाष्ये तत्र हि प्रत्ययपर्युदासः एषनोक्तः नचैवं यस्माद्विहितस्तत्र विहितत्वांशानि
वेशाव्यर्थः अधिकव्यावृत्त्यर्थत्वात् अत एव वदेवदत्तस्त्रिकीर्षतीत्यादौ देवादेर्न संनतत्वादि प्रयुक्तमा
तत्वादीनि स्पष्टमेवगं ज्ञाप्तत्रे भाष्ये स्पष्टं चाधिकमात्रव्यावृत्त्यर्थत्वमस्यानुपसर्जनादित्यत्र कैय
टेनोक्तं न चावयवधर्मस्य समुदाये व्यारोपसंभवे तत्रापि धानुत्वादि दुर्वारं नारशारोपस्य लोके बहुशो
ऽदृष्टत्वात् तदाह ग्रहणपरिभाषायां विहितत्वांशानिवेशात्वनव तेन तदंशे व्यपदेशिवद्भावादिनेत्येव
कानां च तर धात्वादिसापेक्षतयैव बोधकानां प्रातिपदिकसंज्ञासिद्धिः प्रकृते तु कटादीना
मर्थवत्वाव्यभिचारान्नदनवृत्तिसामर्थ्येनैव रैरशार्थकत्वं असर्वशात्र प्रकृतिकस्वंते

प उपदेहिहप्रोः खेश्च विधीयते सुपीत्यधिकारात् उपपदमिति महासंज्ञाकरणाच्च सुपच्छिती
यैव प्रकृत्यर्थैकदेशस्यकमेत्वेनान्यापेक्षायायुक्तत्वात् ललाटसाहचर्याच्च अत एव च

तत्र समाससिद्धिः अन्यथा हि परस्परमनन्वयेनैकार्थीभावाभावात्तद्दुर्लभः स्यात् न
चैकक्रियान्वयित्वमेव सामर्थ्यं तावतापि एकार्थीभावानुपपादनात् सर्वत्र परस्परान्वय
पूर्वकस्यैव तस्य दर्शनात् इतः सर्वो मन्त्रिक इत्यादौ इतः सर्वे मन्त्रिक इति समासापत्तेश्च
अत एवास्यार्थमित्यत्र प्रकृत्येकदेशेन विभक्त्यर्थान्वयः अत एव इष्टपुत्र इत्यत्र प्रत्ययेनाभावाश्र
यबोधः नञ्योग्यतानकृत्वाह्वानदर्शनदोषः तस्मात्सर्वसूत्रे केवलार्थवत्त्वमेव गृह्यते तत्फ
लं तु धनं वनमित्यादौ प्रतिवर्णं संज्ञाभावः एकान्तं द्विर्वचनन्यायस्य तु नायं विषयः समु
दायकार्ये एवावयवानामननुग्रहात् तत्फलं तु हि फडादि निरर्थकेऽप्यरवैभ्योऽपि संज्ञावि
धानसामर्थ्यादौत्सर्गिकैकवचनेन तस्य हल्ङ्याब्भ्यो दिलोपेन लोपाभावः उच्चारणं तु धना
दिभ्यो ल्ययितृगभावार्थं स्यात् अतो लोपाभावार्थं च अन्तरं तस्य पः श्रवणं तु न अवय
वसंज्ञोत्तरं सुप्त्यत्लौकिकं तत्त्वेन समुदायस्यापि संज्ञायां प्रातिपदिकावयवत्वात् लुकः
प्राप्तेः लिङ्गं तेन सुपः श्रवणमपि दोषः तत्र धातुत्वेन प्रत्ययान्तत्वेन च समुदायप्राति-
पदिकत्वस्य दुर्लभत्वात् एतेन पर्युदासेनैवार्थवत्त्वे लब्धे पुनरर्थवद्ग्रहणं समुदायस्या
वयवत्वार्थवत्त्वे तत्रैव यथा स्यात् अतो वाक्यस्य नेत्यपास्तम् बहुपटवः इत्यत्र संज्ञानापत्तेः
त्वदुक्तस्यापि श्रुत्वार्थत्वाच्च यत्तु सत्त्वार्थकत्वेनापि साहश्यसंभवा ``` यदौ प्रातिपदि-
कत्वे तस्यादि तिन्त्र बहुलत्वासंस्कारानवबोधनत्वैव शुक्तत्वात्तन्न च दातीत्यत्र पूर्वो

नन्वेवं तद्धितांतत्वात्प्रातिपदिकत्वप्राप्तिः विभक्तिप्रयोजकतद्धितांतत्वनिमित्तप्रातिपदिकत्व
स्य संकलप्रवृत्त्या लक्ष्यलक्षणस्येति न्यायेन प्रवरप्रवृत्तेः समानाधिकरणे चेत्यादिनिर्देशो विभ
क्त्यैकादेशस्यांतवत्त्वाभावज्ञापनाच्च एतेनांतवत्त्वाभावेन कांडे इत्यादौ प्रातिपदिकत्वे ह्रस्वत्वे स्यादि
ति परास्तं कार्यकालपक्षे परादिवत्त्वेन एव त्वस्य प्रत्ययत्वे प्रत्ययांतत्वस्यार्थे समासज्ञ स्त्रीत्वयानि
षेधश्च लिंगाभावाच्चेति ह्रस्वेन पुंसकप्रत्यत्र निरूपयिष्यामः नन्वेवमपि अनुपसर्जनं स्त्रीप्रत्यय
तदादिनियमनिषेधात् प्रत्ययांतत्वेन राजकुमारीत्यादौ विध्यर्थमेव समासग्रहणं न चात्र प्राति
पदिकत्वस्य न फलं लिंगविशिष्टपरिभाषयैव तत्कार्यसिद्धेरिति वाच्यं वक्ष्यमाणरीत्या तया
परिभाषया प्रातिपदिकत्व तद्व्याप्यधर्माणां लिंगप्रत्ययरहितेष्टानां तद्विशिष्टातिदेशेन तस्या अ
प्राप्तेः न च राज्ञीशब्दितेराजकुमारेत्यादौ तदस्ति अतः स्त्रीप्रातिपदिकत्वमेव अ
स्याप्रग्रहणं त्वन्यार्थमिति वक्ष्यते न चास्य निषेधस्य स्त्रीप्रत्ययसामान्यग्रहणे विशेषग्रहणे
वा प्रवृत्तिः न चात्र तथेति वाच्यं वचनसंकोचकल्पने मानाभावात् तदग्रहणे इति परिभाषया।
मिवात्रग्रहणपदाभावाच्चेति चेन्न नियमपरिभाष्यमाणत्वेन संकोचकल्पनात् अस्य प्रत्ययग्रह
णपरिभाषाशेषत्वेन तत्प्रत्ययग्रहणपदस्यात्रापि संबंधाच्च अन्यत्र प्रवृत्तौ फलाभावाच्च केचित्तु
अंतरंगस्यापि हल्ङ्यादिलोपस्य लुक्विषये प्रवृत्त्या श्रूयमाण एव स्त्रीपि समासे जाते तत्राप्र
त्ययांतत्वेन प्रवृत्तसंज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यपि सत्त्वभावात् तत्त्वानुरोधेनय

ष्ठोद्देशापन्नस्यैवांगीकारात् अत एव गोमत्रियपञ्चत्यादौ नु माद्योतन लुकः शागेतरगणपदस्नौ नुसु
रेवेत्याहुः नचैवमपि क्वचित्कुमारीशब्देन षष्ठ्यन्तनिकारकोपदेति वचनात् सत्त्वापत्तेः प्रा
क्समासे प्रत्ययार्थान्तत्वान्मूर्धन्यत्वापत्तेः समासग्रहणं विध्यर्थमिति वाच्यं उपसर्जनस्त्रीप्रत्यये ब
दादिनियम सत्वेनप्रत्ययान्तत्वाभावात् इत्याहुः नच समासग्रहणं नियमार्थं किंतु विध्यर्थमे
वं प्रत्यर्थवत्त्वं इत्यार्थबोधकत्वे इति प्रशक्तिलक्षणावान च सा समासे वाक्ये वास्तीति नैया
यिकोक्तं युक्तं वाक्यसमासयोरविशक्तिरन्यत्रोपपादितत्वात् सर्वत्रैव हि वाक्यार्थो लक्षण ए
वेति च स्थितमिति मीमांसकमते लक्षणासत्त्वात् वैयाकरणमते संसर्गांशे वाक्यस्यापि
शक्तिरित्यर्थस्यार्थवत्त्वं तभाष्यकरयोः स्पष्टमुक्तत्वाच्च वक्तृपटवत् इत्यादिसिद्धेश्च नद्वी
त्वा समासवत् शक्तिलक्षणयोरभावात् न हि नग्रहणं न हि हि शिष्टपरमिति चेन्न पचत
कीत्यादावतिव्याप्तेः न च वक्तृ चपूर्व इति सूत्रणीयं गौरवापत्तेः किं चैवं वक्तृपटवास्तिस्पष्टं नी
ति वाक्यस्यापि संज्ञा स्यात् समुदायस्यापि वक्तृचपूर्वत्वात् न हि प्रत्ययान्तत्वादिव्यवहारा
ति प्रसंगवारणार्थं प्रत्ययग्रहणे यस्मादिति वचनवत् अत्र नाद्दशं वचनमस्ति एतेन पू
र्ववर्तित्वोत्तरवर्तित्वाभ्यामेव वेष्टितस्यांनिवेशनीयमिति पचतकीत्यादौ न दोष इत्यपास्तं
विनागमनाविरहेणमध्यवर्तित्वसंबंधस्यापि ग्रहणापत्तेश्च किं चैवाकङ्ग्रहणपरिभाष
यामूलकेनोपदंशमित्यादावतिव्याप्तिर्दुर्वारैव स्यात् उपदश्यमानस्यापि मूलकस्य रो

धा॰शो॰ दिकां मूलकेनोपदंशमित्यादौ यद्यप्यसोढं न भुक्त इति वक्तकारणे तृतीयासत्वेनोपदंशानन्निरू
पितकारकत्वादिरूढेनेवल्यनेइतिमूलकस्य भुजौ करणत्वात्तृतीयासत्त्वन्न्यायेन न दोष इति
न शांकं न चार्थवत्त्वाभावाद्वारणं पाचकजौपगवइत्यादिपि संज्ञानापत्त्यानैयायिकेकृत्त
द्धसूत्रे र्थवत्संग्रहस्य वक्तुमशक्यत्वात् न चैवं तृतीयाप्रवृत्तीनीतिविकल्पविधानं व्यर्थमिति मे
वेत्यनेनैव सिद्धेरिति वाच्यं स्वरविशेषात् दधि उपदंशमित्यादौ पक्षे प्रकृतिभावप्रवृत्तेर्विफ
लत्वं वक्तुं शक्यत्वाद्व्य मनुसमासग्रहणं कृतं नियमेन परत्वाद्वाधइतिदं न दोषः एवं कृत
द्धितेति सूत्रे कृतग्रहणं परिभाषणोपनिष्ठत एव निष्फलत्वादिति नत्वं द्धनितं चेदं पुंयो
योगादिति सूत्रे भाष्यकैयटयोरितिदिक् नन्वर्थवत्सूत्रे र्थवत्त्वं वृत्त्यार्थबोधकत्वं चे
न्न निपातानां प्रातिपदिकत्वानापत्तिः तेषां प्रातिलक्षणान्तराभावादितिचेन्न परंप
त्या तेषामप्यर्थबोधकत्वेन परंपरयावृत्तिमत्त्वस्य तत्रापि सत्त्वात् तेषां परस्परं तु द्योतकत्वं रू
पतात्पर्यग्राहकत्वात् एवं च रत्नादयत्वनुद्योधकत्वेन वार्थबोधकत्वपत्रार्थवत्त्वपित्यन्ये
न च धनमित्यादौ समुदायस्यापि प्रत्येकवर्णानामप्यर्थवत्त्वापत्तिः समुदायसंपादने न च
रितार्थेषु वर्ण्णद्योतकत्वरूपतात्पर्यग्राहकत्वाभावात् न दोषः पं॰२ पादहरणार्थोर्णा
न्तु निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति वचनात्साबाध्या अनुक्तसमुच्चयार्थः
कचकारेण चेतिदिक् साधनं तु प्रासनानात्तु पर्युदासाश्रयणं भाषाशब्देषु प्रातिपदिके पाठोऽनं
न चैवं भाषाशब्देष्वपि बोधकतारूपशक्तेः सत्त्वात्प्रातिपदिकं स्यादिति वाच्यं नन्निमित्तकार्ये

कृतेवर्णानांन्यूनाधिकभावेभावात्वभंगात्वभंगापत्तेः साधनुशासनात्त्वेत्याहुः अनुकरणा।
विषयेत्वयेनिरूपयिष्यामः अधिकारोयमिति संज्ञात्वेनाधिकार इत्यर्थः संज्ञासंज्ञिभावा
वगमस्तु विधेयसामानाधिकरण्याद्विधेयकवाक्यान्नयेव नन्वेवं हरतेर्दृतिनाथयोः क
र्मण्युपपदयोः पशौकर्तरीन्प्रत्ययोभवतीतिवाक्यार्थेयद्यपिकृत्स्नु उपपदोपाधीनांन
संज्ञातिप्रसक्तिः विरुद्धविभक्त्यवरुद्धानां पृथ्वीमांतेन प्रत्ययइत्यनेन सामानाधिकरण्या।
संभवात् वाक्यभेदे मानाभावाच्च अप्रधानत्वाच्च तथापिविकारागमानांहृनस्तश्चत्र
पुज्जन्तनोः घुगित्यादीनां प्राप्नोतीतिचेन्न प्रत्ययइत्यनेनार्थमित्युपलक्षणं अर्थसंज्ञाविज्ञानाद्वि
कारागमयोश्चानर्थकत्वाददोषः स्वार्थिकानामपि प्रकृत्यर्थेनार्थवत्वमस्त्येव। विकर स्त्ये
णानामपिद्योत्यार्थेनतत्वम् नचैवमपिहनश्चवधः नाभिनभंचविरागविरंगचेत्यादावा
देशानांसंज्ञास्यात् अर्थवत्वायोगविभक्तिकल्पाद्विधेयत्वाज्ञ्ञातिवाचंफलाभावात् स्थानष
ष्ठीनिर्देशेनदेशांशेनिराकांक्षतयापरश्चेत्यस्यानुपस्थितेः तस्माहृचर्येणाघदात्तश्चेत्यस्या
नुपस्थितेश्च रुस्तुश्चौनरसाहचर्येणस्थानार्थाकविभक्तौतवाच्यार्थभिन्नोद्देश्यकविधेयसंबं
धस्याक्लृप्तत्वेनैवसंबंधायोगविभागस्तु कश्चित्परस्येत्यस्यानुपस्थितावपितदुपस्थित्य
र्थः अतएवश्नमकज्ञादीनांप्रत्ययत्वंअतएवनयासयोरितिप्रत्ययस्यादितीत्वस्यनि
षेधः सार्थकइतिदिक् परश्च गुप्तिज्किद्भ्यःसन्नित्यादावपादानत्वासंभवाद्दिग्योगल

प्रा॰ कौ॰ लक्षणा पंचमी तत्र परः पूर्वो वेत्यनियमेनाध्याहारे प्रसक्ते पर एवेति नियमार्थमिदं गार्ग्योऽगिन्या
दावपि प्रसक्तः स्थानेन्तर्यस्य पूर्वपरसाधारणत्वादनियमोस्त्येव अत्र तस्मादित्युत्तरस्येति परि+
भाषोत्तरांगविकल्पप्रवर्त्तनेतदुक्तं प्राक् न तु निर्दिष्टं किंचिदस्ति इत्यादौ भ्यसादीनां परत्वदर्शने+
नांगसंज्ञासूत्रे प्रत्यय इति सप्तमीबलेन च सुपि च न स्फुहिते यस्येति च आर्धधातुके तुरु
स्तुशम्यमः सार्वधातुके इत्यादि सप्तमीबलेन च प्रत्ययविधिपरायामष्टाध्याय्यां न पूर्वादिप्र।
दाध्याहारो न्याय्यः किंच यथासूत्रसत्वेऽव्यवधानांशलाभायोत्तरांगविकल्पात् तस्मादिति+
परिभाषाप्रवर्त्तनेन यातदभावे प्राग्युक्तनिर्देशादिभिः प्रथमान्तैः प्रत्ययैः सामानाधिकर+
ण्यान्न पंचमी षष्ठीकमंगीकृत्य प्रथमसूत्रपदमुपतिष्ठतामिति व्यर्थे परश्चेति सूत्रमिति चेदत्रा
हुः यद्यपि प्रकृतिविशेषोद्देशेनैव प्रत्ययानां विधानात् प्रत्ययार्थमात्रविवक्षायां किमस्य
हृयस इति प्रयोगस्यापादयितुं न शक्यते तथापि प्रकृत्यर्थमात्रविवक्षायां केवलप्रकृ
तेः पच्यत इत्यादेः प्रयोगः स्यात् अतः प्रत्ययः परो भवत्येवेति नियमार्थमिदं तेन न केव।
लाप्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय इति सिद्धं न च गवित्ययमाहेत्यादिप्रयोगाणा
मनुपपत्तिः अनुकार्यानुकरणयोरभेदविवक्षया प्रातिपदिकत्वाभावेन स्वौजसिति सू
त्राप्रवृत्त्या प्रकृतित्वाभावात् प्रकृतित्वे च प्रत्ययविधावुद्देश्यतावच्छेदकाक्रान्तत्वं अपं
चन्यायः शास्त्राबोधितान्यतरप्रयोगविषये अतएव लिङ्व्यतिसइत्यादौ न दोषः ए

दर्श एव पपठ्यतेऽपदं न प्रयुंजीतेति अपरिनिष्ठितमित्यर्थः परिनिष्ठितत्वं चाप्रयुक्तत्वमित्य।
विधुद्देश्यतावच्छेदकानाक्रांतत्वं तिङत्वे तिङ्‌त्वादावव्याप्तिवारणायाप्रयुक्तत्वेति वैकल्पि
केऽडागमोद्देश्यतावच्छेदकाक्रांते सेद्धत्वादावव्याप्तिवारणाय नित्येति अत एव पचेलित्
यादीनामलौकिकत्वेन सिद्धांतः इति दिक् आप्रा समाहारद्वंद्वे एकवचनं स्यादेतत् पर
श्लेपत्वेनेन प्रकृतेराक्षेपात् प्रातिपदिकाधिकारो व्यर्थः न च पचति पश्यपेत्यादौ क्रियायाः
कर्मादित्वेन तद्वाचकतिङ्‌न्तात् द्वितीयाद्यापत्तिरिति वाच्यं संख्याभावात् सर्वत्रौत्सर्गिकैक
वचनापत्तेरोस्त्वेवं तत्वेनैव पदत्वे सिद्धे सुप्तिङं तमिति सूत्रे तिङ्‌ग्रहणं वैयर्थ्यापत्तेश्च औत्सर्गि।
कैकवचनस्य काचित्कतायाश्च व्ययप्रकरणे वक्ष्यमाणत्वाच्च न च धातुभ्यः सुपुत्त्यापत्त्यर्थे
तिङामपवादत्वात् भूसत्तायामित्यादिनिर्देशैः स्यादिविधेरनित्यत्वज्ञापनाच्च अनोगवि
त्यपमाहेत्यादौ न दोषः तस्येत्यादिसमर्थविभक्तिनिर्देशात् तसूच्चिपौ तिङ्‌श्रुति ज्ञापकाच्च
तनेभ्यस्तद्धितव्यावृत्त्यर्थः ज्ञापकसिद्धात्वं न स्वार्थिकत्तरवादेः काचित्कत्वाच्च अन्येषां
प्रकृतिविशेषादेव विधानाच्च एतेन सुत्वुत्पत्तेः प्राक् केवलप्रातिपदिकादेव तद्धितोत्पत्त्य
र्थं तदित्यपास्तं स्वार्थ इव्यलिंगसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूततापत्त्या
दियोग इति केवलप्रातिपदिकात्तद्धितानां विधानमशक्यत्वात् केचित्तु तिङ्‌श्रुति ज्ञापकं
न तिङ्‌न्तात्स्यादयो भवंतीत्यर्थे सामान्यापेक्षं वर्णयंति इति चेन्न पाठं ननु प्रातिपदिकाधि

प॰ शे॰

110

कारा भावे ऽन इत्यत्र त्यानइत्येतन्नु विभक्तिमन्तरेण सामर्थ्यानवगमात्तस्वेनात्तद्धितोत्पत्तेरत्र न
स्यापत्यादेस्तत्संबंधापत्यमित्याद्यर्थसत्त्वात् सूत्रे प्रथमोच्चारितबोध्यात् प्रत्ययइत्यर्थस्य सत्त्वे
नोपस्थितस्य सुवंतस्यैव विशेषणं स्यात् ननस्पृदात्तस्यापत्यमित्यत्रैव स्यात् दत्ताणोदत्तयो।
रित्यत्र न स्यात् किंचानुदात्तादेरित्यस्य सुवंतविशेषणत्वापत्तौ सर्वस्य विकारः सार्वइत्यत्रापत्ते
स्यात् सर्वस्य सुपीत्याद्युदात्तत्वात् प्रातिपदिकाधिकारे तु न त्सामर्थ्यात्तस्यैव विशेषणात्र दो
षः सर्वशब्दस्योंकादिपाठाङ्गेणे निपातनतो हृत्तोदात्तत्वात् न चास्यांतोदात्तत्वे मानाभावः
अत्र त्यभाष्यस्य सार्वइत्यत्रं तप्रयोगस्य च मानात्वात् सर्वस्य सुपीत्यारंभाच्च न च अंतरंगान
पीति न्यायेन लुक्स्थानिभूतप्रत्ययनिमित्तकार्यापेक्षया लुकस्तन्निमित्तप्रत्ययसमासादी।
नां च प्राबल्यबोधनेन पूर्वस्य प्रनिमित्ताद्युदात्ताप्राप्तिरितिवाच्यं अस्याकृतव्यूह परिभाषान नावमुदात्तादे
तिरिक्तत्वस्याचः परस्मिन्निति सूत्रे कौस्तुभे उक्तत्वेन तस्याश्चात्राप्राप्त्याद्युदात्तप्राप्तेः सा रित्यस्य सुवंत
म्यात् सर्वस्सुपि इत्यादौ सौवर्थः सत्तम्यस्तदंतसप्तम्य इति सिद्धांतप्रत्यये परतः पूर्वकार्य विशेषणत्वे
त्वाभावे तलुमतेत्यस्या प्राप्तौ प्रत्ययलक्षणेन सुवंतत्वसत्वात् अतएव सर्वस्तोमोतिरात्र ऽपि न दोष इ
इत्यादि बहुव्रीहौ पूर्वपदप्रकृतिस्वरेणाद्युदात्तसिद्धिः अन्यथा बहुव्रीहिकालेंतोदात्तत्वा तियाहुः ६
द्बहुव्रीहिस्वरेण तस्यैव प्रकृतिभावः स्यात् न त्वाद्युदात्तस्य सुप्ग्रहणं तु अत्यंतस्वार्थिके
तरपि तस्य प्रातिपदिकादेवोत्पत्तेर्ज्ञापकं च योगसूत्रभाष्यादावुक्तत्वेन तत्रांतोदात्तार्थम

विष्यति अत एवोपमानं संज्ञायामिति सूत्रे सर्वस्य स्व परतिवत्पामीति भाष्यं संगच्छते किंच सर्वस्य
स्त्री सर्वीत्यत्र लिंगविशिष्टपरिभाषयाप्याद्युदात्तत्वारणाय नतु स्वपूर्वग्रहणेन तु विभक्तौ लिंगविशिष्टा
ग्रहणान्नदोषः विभक्तिसंबंधिकार्यमात्रे तन्निषेधे यथोचितनाकाविति सूत्रे भाष्यस्य प्रवृत्तत्वात् इति चे
न्न गर्गादिभ्योऽपत्तित्यादौ सर्वत्र न च दृष्टिदोषात्तैः सर्वत्र समासान्तविधौ नत्वंकृतिके लक्षणायाः सत्वे
नानुदात्तादावेत्यत्रापि अनुदात्तादिशब्दानां कात्सर्वं नादित्यर्थे दोषानापत्तेः अत एवानद्यन्त इत्यादा
वपि न दोषः लक्षणानंगीकारे विभक्तं तस्य कारान्त प्रातिपदिकत्वाभावेनाकारान्तप्रातिपदिकस्य च स
र्वेतत्वाभावेन सर्वस्येत्यादावाद्युदात्तत्वे कृतेऽनुदात्तादि प्रातिपदिकाभावाच्च प्रातिपदिकारेऽपि दोषस्तद
वस्थ एव वस्थ एव न च प्रातिपदिकाराभावे लक्षणायां तात्पर्यग्राहकाभावः पूर्वोक्तरसाहचर्यस्यैव
तत्वादिति चेदत्राहुः सर्वत्र लक्षणाया आवश्यकत्वेऽपि समर्थानामित्यत्र सर्वत्र तस्यैव विशेषणं स्या
नु तस्यैवोपस्थितत्वादर्थाभिधाने समर्थत्वाच्च एवं च सर्वत्र द्वन्द्वकृतवर्णानुपूर्वी निबंधनकार्यादुल्प ता
त्यापत्तौ भानोरप्यसंभानवत्त्वासिध्यापत्तेः लुकाद्यो कारसंहितस्य निवर्त्तनात् प्रातिपदिकाधिकारे
तु तत्सामर्थ्यात्तस्यैव तद्विशेषणं अत एव ङ्याप् प्रातिपदिकाधिकारे परिनिष्ठितत्वमपेक्षितमिति
प्राचामुद्घोषः एवं चांतरंगानपीतिन्यायेन परस्परगुणादिबाधित्वा पूर्वमेकत्वे कि इष्टसिद्धिरि
ति दिक् प्रातिपदिकग्रहणे लिंगइति अस्याप्यज्ञापकं युवा खलतिरिति सूत्रे जरतीति स्त्रीलिंगनिर्देशाद
ति वक्ष्यते लिंगविशिष्टस्येति लिंगबोधकप्रत्ययविशिष्टस्यापीत्यर्थः फलं तु अग्रयस्कुंभी अतः

प्रा०

ककमीति सत्वं तद्धिकं सादिषूत्तरपदेषु विधीयते समासेऽस्त्यनुवृत्त्या विसर्गान्तस्य पूर्वपदत्वबो-
धनात् उत्तरपदस्याक्षेपेण चान्यासन्न्याकं सादिरूपस्यैव ग्रहणात् किंच कुमारीमाचष्टे कु-
मारयति इत्यत्र प्रातिपदिकाद्धात्वर्थे इति णिच्टिलोपः पुंवद्भावश्च न च ज्ञापकस्य विशेषा-
पेक्षत्वात् विशिष्टप्रातिपदिकग्रहणे एवायं इति वाच्यं एतस्यांशे च सत्यां नार्थोऽस्याग्रहणेने-
ति प्रवृत्त सूत्रस्य भाष्यविरोधात् षट्सूरित्यादौ स्त्वनुत्पत्तिरप्यस्याः फलं बोध्यं वस्तुतस्त्वत्र
नयापरिभाषया स्त्रीप्रत्ययसमभिव्याहारे प्रातिपदिकत्वं तद्व्याप्यधर्माणां विशिष्टेपि पर्याप्त-
त्वमतिदिश्यते अत एव बहुव्रीहेरूधस इति सूत्रस्थभाष्यं संगच्छते तत्र हि कुंडोध्नीत्यत्र न-
घनश्चेति कपापादितः नद्यंतबहुव्रीहेरित्यर्थात् इदं तस्य च बहुव्रीहित्वाभावान्नदसंगतिः स्य-
देव नद्यंतानां यः समास इत्यर्थे (एतन्मते लिंगविशिष्टपरिभाषया प्रातिपदिकत्वात् स्वादय इति
मनोरमायां यथाश्रुतैव साधुः) न च परिहृतः नद्यंतप्रकृतिरस्तु वंतोत्तरपदकः समास इति तदर्थं इत्या-
हुः सिद्धे इति ननु दृष्टा मालादृष्टा गौरीत्यादौ वाक्यान्त्स्वनुत्पत्त्यर्थं तदस्तु न चात्र लिंगविशिष्टपरिभा-
षया सिद्धिः आपूराहितस्य दृष्टामाल इति समुदायस्य प्रातिपदिकत्वाभावेन तस्य तया प्रकृते।
तिदेशाभावात् लिंगविशिष्टप्रातिपदिकस्यापर्याप्त्यर्थाच्च अनुसर्जनस्त्रीप्रत्ययतदादिविधिप्रभा-
वेन डाबंतत्वस्य सुलभत्वादिति चेन्न प्रकृतसूत्रस्थैतद्भाष्यप्रामाण्येन प्रातिपदिकसाहच-
र्येण च पृथक्त्वार्थोपस्थापकविभक्त्यंतानवयवकडाबंतस्यैव ग्रहणेनादोषात् न च स्त्री

युवतिश्च कूरित्यादौ त्यङ्: त्यदो वापत्तेः ।

प्रत्ययांतात्वेन्द्र्याावंतादेवेतिनियमार्थत्वेन तद्धिति श्वशुरस्य श्वश्र्वित्यादिनिर्देशविरोधापत्तेः ड्याावं
तादिति तत्फलं तु आर्याशूद्राकुन्त्यादिविवक्षायां केआर्यिका आर्यिकेत्यादिसिद्धिः अन्यथा
तरंगत्वात्पूर्वं कप्रत्ययकुन्त्याद्येकार्थीभावापन्नस्यार्थशब्दस्य निष्कृष्टस्त्रीत्वेन संबंधस्य बहुम
शाकलात् मध्ये टाबभावे आतः स्थानिकत्वाभावात् उदीचामातइति विकल्पाप्रवृत्तिः स्पष्टै
व तथा लोहितिका लोहिनिका च सिध्यति अन्यथा स्वार्थिकत्वेनांतरंगः परत्वाल्लोहिता
न्मण्णविति कतु ङीपं बाधेत ततश्च लोहितिके त्येव स्यात् ङीग्रहणेन तु सामर्थ्यात् ङ्यंता
त्कनिरूपहूयं सिद्धं वर्णो टतु दात्रादित्यस्य वैकल्पिकत्वात् एवं च लोहिनात्लिंग बाधनं चेति
न्कार्यं न चैवं बहुगोमत्के त्यत्रान्यपदार्थस्य स्त्रीलिंगत्वेन द्योतकापेक्षणेन च कपः शाकु
ङीप्स्यादिति वाच्यम् अकृत एव समासे लौकिक प्रक्रियावाक्य एवोत्तरपदस्य समासस्य वा
व यवीभूय समासोत प्रवर्तत इति समासांतात इति सूत्रे व्यक्ष्यमाणत्वात् स च विभक्तेः परस्ता
त्सुप्स्ताद्धेति परस्तादितिपक्षेपि तद्धितांतत्वात् प्रातिपदिकत्वे सुपोलुकि पुनः सुपि तत्र
प्रागेव वा समासं संज्ञेति च तत्रैव विचारयिष्यते ननु स्वार्थे परिपूर्णस्य बहिर्भूतकुन्त्यादियो
गः परिपूर्णार्थत्वं हि लिंगसंख्याकारकादि विषयक निराकांक्षत्वं। एवं स्वकुन्त्यतत्कुलं च
तरमेव कुन्त्याद्यर्थकतद्धितोत्पत्तिः तदुक्तं कुत्सित इति सूत्रे भाष्ये प्रियकुन्त्यादिषु ततः
प्रवर्त्तते सोविभक्तं तत इति तथा च बहिर्भूतपदार्थापेक्षसंख्याकारकार्ये स्वपेक्षयालिंगका

प्रा॰ प्रो॰ र्थस्यान्तरंगत्वेन पूर्वं प्रवृत्तेर्ङ्याप्प्रग्रहणाभावेपि न क्षतिः अत एव स्वार्थद्रव्यलिंगसंख्याकारकाणां
क्रमिको वाप्यत्ययमित्युक्ताः एतेन चैतन्न विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् पूर्वं ज्ञातत्वादि
ज्ञाननिमित्तो धर्मित्वेन प्रधानत्वाल्लिंगादिभिरप्याकांक्षितत्वात्तदवच्छिन्नद्रव्यज्ञानं ततः संख्याका
रकयोर्भिन्नपदार्थापेक्षत्वात्स्वमात्रापेक्षो लौकिकलिंगस्य पूर्वं माकांक्षितत्वेन तस्य ज्ञानं ततो विजा
तीयक्रियारूपपदार्थापेक्षकारकापेक्षया सजातीयपदार्थापेक्षसंख्यायाः प्रथममुपस्थि
कारकरूप तत्वेन तज्ज्ञानं ततस्तदनन्तरान्वयार्थं विभक्त्यर्थाकांक्षा एवं परिपूर्णार्थस्य कृत्तद्धितादिभिर्योगः एवं
च ज्ञानक्रमानुरोधेनैव तत्तत्प्रयुक्तकार्यप्रवृत्तेरुचितत्वेनान्तरंगत्वं स्पष्टमेव यद्यपि बोधो
न क्रमेण तथाप्युपायतया प्रत्यक्षज्ञानेदृष्टं क्रमं प्राप्य शब्दजन्ये बोधे आरोप्य लक्ष्यं साध्यते व्यर्थ
वद्वचनेन प्रातिपदिकत्वविधानात् प्रातिपदिकोद्देशेन ङ्याप्विधानात् ङ्यन्ताद्युद्देशेन च स्वा
२ द्यादिविधानादिति स्पष्टं चेदमचः परस्मिन्निति सूत्रे भाष्यकैयटयोः तस्यापत्यमित्यादेस्तत्संबंध्य
पत्यमित्यर्थे प्रत्ययस्त्वर्थेन नाद्दशाद्युसंबंधादिबोधाय विभक्तेरावश्यकत्वाच्च सुबुत्पत्त्यनन्तरं जा
यमानश्च तद्धितः सुपः परत्वादेव अत एव घकालतनेषु इति लुग्विधानं चरितार्थं प्रातिपदि
कात् परत्वं तु सामर्थ्याद्व्यवधानेपि स्यात् लभ्यं तदतिरिक्तव्यवधाने तु न सह्याने मानाभावात्
एवं च तद्धितविधौ गर्गादिपदानां तत्प्रतिके लक्षणेति प्राचां ग्रंथाः ग्रामादिकाप्य वलक्षणायां
फलाभावान्मानाभावाच्च ध्वनितं चेदं मत्वर्थसूत्रे भाष्यकैयटे न च स्पष्टमुक्तं तत्र हि भाष्ये

चित्रागावोस्येतिसमुदायान्मतुप्कस्मान्नभवतीतिशंकायां प्रातिपदिकत्वादित्युक्तं लक्षणया
दिनोक्तस्तु वक्तव्यत्वादितिवक्ष्यमाणत्वात् सर्वं नाद्युक्तत्वाच्च विषमस्यार्थान्तरप्रत्ययः प्रातिपदिकात्तु पुरःस्थप
नेत्यर्थाभिप्राये लोदमितिव्याख्यानं नचनत्वामिवचनरूतिनिषेधेन ज्ञापयिष्यमाणत्वं तस्वा
र्थिकेकानिष्टार्थकेन्यस्यासिध्यर्थं तदावश्यकं तस्यहि सर्वनीप्यं नरंगान्वादिति वाच्यं अपि तस्वा
र्थिकत्वेनातिरिक्तार्थाभावेनैकार्थीभावकल्पने मानाभावोन्न केवलप्रकृतेरपि स्त्रीत्वादिसंबंध
सत्वेन मध्येपि स्त्रीप्रत्ययोत्पत्तेस्तत्र वक्तुं शक्यत्वेन तत्त्वभावादिति चेन्न समुदायोन्नरटापा
स्त्रीत्वस्योक्तत्वेन मध्ये तदुत्पत्तौ मानाभावात् एकाद्विवचनन्यायेन तस्यैव युक्तत्वाच्च तेनहि प्र
कृतिप्रत्ययार्थयोरुभयोरपि लिंगसंबंधोबोधयितुं शक्यते उभयोरपितत्संबंधार्थत्वात् पूर्वोक्त रु
न्नेनत्तु प्रत्ययार्थेन सम्बोधयितुं शक्यः मिलित्वैवार्थबोधकत्वं एवं रूपैकार्थीभावस्य तत्रापि
वक्तुं शक्यत्वाच्च नचासंतस्वार्थिकप्रत्ययोनिरर्थकइतिभ्रमितव्यमुस्वार्थिकव्यवहारानु
पपत्तेः प्रत्ययश्रुति महासंज्ञानुपपत्तेः प्रकृत्यर्थापेक्षयाऽतिरिक्तः परं वाच्योद्योत्योवानास्त्री
त्यन्तदेतत्तद्वावित्यादिवचनानन्यतरत्वैयर्थ्यं अत एव स्वार्थिकस्य स्त्रीलिङ्गयोगविवक्षायांङी
पृङयंस्यादितिपरास्तं नचैवमपि विभाषापूर्वाह्नापराह्णाभ्यामिति सूत्रे भाष्येघकालतने
ष्विति सूत्रेण सूत्रान्तद्विहितोत्पत्तेर्ज्ञापितत्वात्तदर्थमेवदितिवाच्यं पूर्वोक्तरीत्यासार्थकत्वा
वादिविषयेतस्यचारितार्थ्येन ज्ञापकस्यैवासंभवादितिसूत्राशयः उगाप्रग्रहणंचस्त्रीप्रत्य

शा॰ को॰ यमात्रोपलक्षणं तेनब्रह्मबंधूतरायुवतिकेत्यादेः सिद्धिः जाते - ति निषेधान्न पुंवद्भावः पुंवत्त्वा
देरपि वैकल्पिकत्वात्तिकार्यस्यवक्ष्यमाणत्वात् नच पुंवद्भावाद्ध्रस्वत्वं विप्रतिषेधेनेति वार्त्तिकेद्व
रद्वकस्य त्र पुंवद्भाववाचकाप्रदर्शनपरभाष्यप्रामाण्यात्कप्रत्ययस्यपितत्सित्वादिषु पाठा
वशपकत्वेन युवतिकेत्यत्र पुंवद्भावस्यदुर्वारत्वान्न कश्चिद्विशेष इति वाच्यं केणइति ह्रस्वत्वेन
परत्वाद्बाधात् तद्धितइति अत्र च तद्धितशब्देन समासांतान गृह्यंते समासांतात्त इति वक्तव्य
वचनेन तेषामाभ्यामपि पूर्वप्रवृत्तेरिति विवक्ष्यते सच तक्रकौण्डिन्यन्यायेन स्त्रीप्रत्ययत्वानाक्रां
तएव एतेन युवतिरित्यसिद्धिरित्यपास्तं नचैवमपि युवन शब्दात्प्रकृतिविशेषापेक्ष
ति प्रत्ययापेक्षयांतरंगत्वान्ङीप्यपि प्रातिपदिकग्रहणइति परिभाषयाति प्रत्यये इनीति
रित्येवस्यात् नचोक्तार्थत्वादन्यतरस्यानापत्तिः कुणडो ङीन्न्यादावनङादिभिरुक्तत्वेपि
ङीपुस्त्रीकारात् अत एव कृदिकारादक्तिन इत्यत्र क्तिन्पर्युदासस्त्वरितार्थइतिवाच्यं अपवाद
त्वात्तिप्रत्ययस्यैवोत्पत्तेः यस्य स्त्रीप्रत्ययस्य स्त्रीप्रत्ययांतरनिमित्तत्वात्तत्रोक्तार्थानामि
त्यस्यबाधेप्यन्यत्रत्तद्बाधेमानाभावाच्च अतएवानाष्टकन्तिङीपोङीषश्चबाधनायेत्याद्या
करग्रंथाः संगच्छंते वस्तुतस्तु स्त्रेग्राग्रहणं मुक्त्वा यावत्सिद्धार्थानुवाद एवं अत्रत्यंतस्या
र्थिकानारम्भतस्यानिरवत्तेश्चसमासांतेषु न दोषः अर्थाभावेनोक्तन्यायाप्रवृत्तेश्च तेनात्यं
तस्वार्थिके कनिस्त्रपिकाणनिकेत्येवयद्यभिधानमस्ति लोहितिकेत्येतत्सिद्धये चलिहि

नाल्लिंगबाधनं वेति वचनं कार्यमेव अत एव भाष्ये ङ्याबेनातद्धितोत्वनिर्देश्यास्यादिति ङ्याप्ग्रह-
णं न त्र समासांते बुहोषः बहुगोमतीकेति स्यात् अत्र समासांतग्रहणमत्यंतस्वार्थिकोपलक्ष-
णं एनिकाएनिकेतिच स्यादित्यपि बोध्यं यदि तु तत्रान्यंतस्वार्थिकस्यनाभिधानं तदा मात्रो-
पलक्षणत्वं न दोषः समासांता अपि स्वार्थिकाः तत्र परत्वात्समासांताः प्रत्याख्यानेनेदमु-
त्तरं अत्यंतस्वार्थिनारभ्यसूत्रमते पितन्नि रन्नि रित्याशयेन वा कथं कालिकेति कालाट्ठेति
स्वार्थे कन् प्रत्ययस्यादितीत्वं भविष्यति कथं हरिणिकेति हरिणशब्दः प्रकृत्यंतरमस्तिक-
थं लोहिनिकेति बहुपत्येन तु लोहितान्नाल्लिंगबाधनं वेत्युक्तं एवं च एनिकाआर्यकेत्यादेरत्यं-
तस्वार्थिके कनि अभावः स्पष्ट एव वचनाभावात् एनशब्दस्य प्रकृत्यंतरस्याभावाच्च ङ्याप्
ग्रहणस्यात्यंतस्वार्थिके ष्वसंबंधाच्च अन्यथा कथं कालिकेत्यादि ग्रंथानुत्थानमेव स्यात्
एकदेशयुक्तिपरतयापि व्याख्यानं तदा स्यात् यदि ताद्दशप्रयोगसाधकं भाष्यांतरमुपलभ्येत ना-
लोहितान्नाल्लिंगबाधनं वेति वचमेवात्यंतस्वार्थिके षु तदसंबंधे ज्ञापकं बोध्यं अत्यंतस्वार्थिक-
त्वादेरपि ङ्याबाद्यं नादनभिधानमेवेति बोध्यं एवं च ङ्याप्ग्रहणं व्यर्थमेवेत्याहुः विवृतं
चैतद्भाष्यप्रदीपोद्योतेष्वितिदिक् स्योत सूत्रेसमाहारद्वंद्वः ढक्पाश्चेतरति नचसंज्ञायाः
कार्यार्थत्वेन प्रकृते चेत्संज्ञाप्रयुक्तकार्याभावेन कथं सेनिवाच्यं लोपस्यैव कार्यत्वात् न च
लोपमात्रफलिकेत्संज्ञानास्ति अन्यथा काम्यचः कस्यापि तन्त्वापित्तिरिति वाच्यं यत्र लोपे

प्रा॰ शे॰ 115 सति वर्णोच्चारणार्थैव यत्र्यं तत्र तन्मात्रफलिके संज्ञानं दीर्घीकारेपि तत्रेतस्यावृत्तिसंपादने चरिता+
र्थ्योच्चारणानामेषां वर्णानां तत्स्वीकारे बाधकाभावात् अत एव श्री प्रभृतीनामनेकाल्त्वात्सर्वादे
शत्वेपि नदवयव शादीनामिसंज्ञोक्ताकारे सोरुकारो वर्णास्त्र सावित्यादौ विशेषणार्थः अर्थवण
इत्यत्रापि अनुनासिकविशिष्टो बोधः असीत्युक्ते इसकाराट्टावित्यर्थोपत्तौ वाग्नमर्वत्स्वरइत्यादिन
सिध्येत् ङसे रिकारो ङसो शित्यत्रास्यग्रहणं माभूत् यद्येकवर्चस्येत्यत्रत्तनीयाव्याचत्नये पंच।
म्याउत्यनुवृत्तेरात्र श्यतया परिशेषादन्यस्य ङसो ग्रहणमित्युच्यते तर्हि टिङसीत्यत्र विशेषणार्थः
तत्रेकारानुच्चारणे एकशेषापत्तेर्यथासंख्यानापत्तेः यदि तु सौत्रत्वादेकशेषो न करिष्यते तदापि
त्वषयोजनः जसो जकाराभावे ओइत्यस्यावृस्यात् तत्सु तस्यमकारांततापि संभाव्येत एवं श
सः शकाराभावे ओटो ङित्वं संभाव्येत एवं च शादेशार्थवाभत्वेपि टिलोपः स्यात् जसः शीतस्मा।
त्कसोनइत्यनयोर्विषयभागस्त्वन्यतरस्य निरनुबंधकत्वेनापि सुवचः औठ टकारः सुडिति प्र+
त्याहारार्थः टाटकारस्तु ङसीति विशेषणार्थः तत्फलं तु सुपांसुलुगिति सूत्रेणाकारादे
शे इनादेशाभावः ङे प्रभृतीनां ङकारो घेर्ङितीत्यादौ विशेषणार्थः न च घेरित्येव सूत्रमस्तु सु
पीत्यनुवर्त्यतां जसि चेति नियमाच्च नाङिति प्रवृत्तिरिति वाच्यं तत एवारानद्यादित्यादौ ङिती
त्यनुवृत्तेः यतयरित्यर्थं जसि चेत्यस्यावश्यकत्वाच्चेत्याहुः सुपः पकारः प्रत्याहारार्थः न वि+
भक्तावितिनिषेधोपयोगिनी विभक्तिसंज्ञामाह विभक्तिश्च चकारः पुरुषवचनसंज्ञाभ्यां समावे

शार्थः अन्यथैकसंज्ञाधिकाराद्वचनप्रामाण्येन पर्यायः स्यात् सुप इति सूत्रं तिङः त्री त्रीणीति सू
त्रात्तिङ इति चानुवर्त्तते तदाह सुप्तिङावित्ति त्रीणि त्रीणीत्यप्यनुवर्त्तत इति तद्धि तन्त्र्यासङ्गेतिसू
त्रस्य भाष्यस्वरसः अत्र च न त्राविभक्ताविन्यादौ सामर्थ्यात्तदवयववचनग्रहणं अननुवृत्ति प
क्षे प्रथमयोरित्यत्राचीत्यनुवर्त्तनात्तस्मात्कसीति लिंगात्सुऔजस्त्वौरूपग्रहणेनैव सिद्धे प्रथम
योरित्युक्तेश्च त्रिकयोः प्राचां वैयाकरणानां प्रथमाद्वितीयापदवाच्ययोग्रहणं न विभक्तौ त
स्मादित्यादिप्रयोजनं न च विभक्तिप्रदेशेषु सुप्तिङः पदाभ्यामेव व्यवहारोस्तु किं विभक्तिसंज्ञ
येति वाच्यं तत्र यत्रेत्यादौ त्यदाद्यत्वानापत्तेः न च तेषामपि सुप्संज्ञास्तु एतेहीत्यत्र सु
पि चेति दीर्घापत्तेः सन्नम्यतां इति स्त्रीलिंगात् इति बोध्यं प्राचां वैयाकरणानां राणं उह्यापि
अस्मिन्व्याकरणेपि सुपिति प्रत्याहारः न सुप्नमी बहुवचनमेव एकस्यानेकसंज्ञाविधान
वैयर्थ्यापत्तेः सुप इति च षष्ठी तानीति पदद्वयरहितं तान्येकवचनेति सूत्रमनुवर्त्तते संपूर्णमेव
वाक्यमनुवर्त्तते न तु केवलस्य बुद्धिस्थपरामर्शेन यावा व्याकरणान्तरोक्तसंज्ञानामपि परामर्शात्
तिङः त्रीणि त्रीणीति सूत्रात् त्रीणि त्रीणीतिवर्त्तते तदाह सुप इत्यादि एकश इति एकैकमि
त्यर्थः संख्यैकवचनाच्चेति शसो येन नाप्राप्तिन्यायेन वीप्साद्विर्वचनापवादत्वान्न द्विर्वचनं
न चैवं ऋषिसहस्रमेकां कपिलाम् एकैकशः सहस्रकृत्वो दत्त्वा तथा सर्वेन सहस्रदक्षिणा सं
पन्ना इत्य ऽ उ ए सू त्रस्य भाष्य एकैकशा इति प्रयोगानुपपत्तिरिति वाच्यं एकशब्दस्य प्रधानार्थ

कृ॰ कौ॰ कस्यैकेतिसंबोधनमित्यदोषात् एकशब्दस्यैकस्य तु प्रत्येकमित्यर्थः किं चैतद्भाष्यप्रामाण्यादंतत्वा
र्थे प्रत्ययत्वे स्वार्थिकस्य तस्यांतरंगत्वेन पूर्वं प्रवृत्तौ शसंतस्य द्वित्वापत्तौ भाष्यासंगतेस्तद्वा
स्यत्वात् न च स्वार्थिकं द्विर्वचनमेव कल्प्यते शस्विषये तत्रैकशब्द इति सूत्रनिर्देशाद्वैकल्पिकमि
मिति वाच्यं ईदृशक्लिष्टकल्पनापेक्षया अस्मदुक्तप्रकारस्यैवोचितत्वात् अत एव सर्वस्य द्वे इति
सूत्रस्थ एकैकशब्द इति भाष्यप्रयोगोऽल्पार्थकएकशब्दमादाय शसः कारकाद्विधानेन मंगला
मंगलादिरूपार्थाप्रेक्षणेन च शसोऽपि बहिरंगतया परत्वाद्विर्वचनेन ततः शसिति साधितः के
यदेन यद्यपि क्लाप्तानामपि क्वचित्प्रयोगो दृश्यते तथापि यत्र तद्धिते नानुक्तावी स्यात्तत्र द्विर्वच
नमिति भाष्योक्ताप्रवृत्ते नह क्लमप्राकं द्व्येकयोः नियमार्थं द्रुमे इह द्व्येकशब्दौ संख्यापरौ।
न संख्येयपरौ बहुवचनापत्तेरित्यभिप्रेत्याह द्वित्वैकत्वयोरिति संख्यायाव्ययेति सूत्रस्था
भाष्यसंमतं आदशानः संख्याः संख्येय इति तु प्रायोवादमात्रमिति भावः सूत्रे लक्षणया प्रयो
ग इत्यन्ये अत एव सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा लिङ्गामिति वार्त्तिकं संगच्छते अत ए
व लोपकालं पूर्वनिपातप्रकरणस्यानित्यत्वान्नैकशब्दस्य पूर्वनिपातः संख्याया अल्पीयस्या इत्य
स्यानित्यत्वात् इत्याहुः एकशब्दस्तु द्विसाहचर्यात्संख्यावाच्येव न केवलादिवाचीत्याहुः व
स्तुतस्तु एकशब्दो द्वित्वबहुत्वाभावपरः अत एवाव्ययेभ्योऽप्येकवचनमात्रोत्पत्तिः संगच्छते
एतेन महासंज्ञयैव सिद्धे सूत्रद्वयं व्यर्थमित्यपास्तं न च घटमित्युक्ते एकत्वनिश्चयो न स्यादिति

घ २

वाच्यं द्विवचनबहुवचनाभावेन द्वित्वबहुत्वयोरबोधेन त्रिसंख्यात् घट इति ज्ञाताबेकवचनेव्या-
प्त्यभिप्रायेणैवेत्यर्थ निश्चयवत् प्रकरणादिना तस्यापि निर्णयसंभवाच्च अत एव पाचति कल्प
मित्यादौ व्यर्थनिपातस्य चैकवचनप्रयोगसिद्धिः नन्वव्यर्थकाचित्क एकवचनमिति महासंज्ञा
करणात् ध्वनितं चेदं न द्वितस्या सर्वेति सूत्रे भाष्ये इति दिक् बहुषु अयमपि सद्भूरव्यापर एव।
द्व्येकयोरिति साहचर्यात् बहुवचनं तु आश्रयगतं बहुत्वं धर्मे आरोप्य कृतं तत्फलं तु बहुः प
र्वत इति वैपुल्यवाचिनो ताग्रहणं इति सूचनं न च तत्र परत्वादेकवचनं स्यौजसौ इति वाक्ये बहु।
वचनस्यैव परत्वात् एषां च नियमपृष्ठत्वेन तदेकवाक्यत्वादिति सत्र हृदयं दारा इत्यादौ त्ववयव।
गतबहुत्वस्यावयविन्यारोपो बोध्यः अवयवावयविनोरभेदविवक्षावा सचक्कोशादहव्यवहाराद्य
नुसारेणैव तेनैकस्मिन् वृत्ते बहुवचनं न प्राप्नुयात् द्रव्यपक्षेऽभेदोपगतबहुत्वस्यैवाश्रयणात्
जातिपक्षेपि प्रत्यासत्त्यानदाधार द्रव्यगतस्यैव ग्रहणात् जात्याधारस्यावयवस्यैवानावयवाः
वृत्तप्राप्तवाच्यापि स एवेति बोध्यं एतेनैकस्मिन्नपि गुरवः समागताः आचार्याः कथयंतीत्या
दि प्रयोगाः सामर्थ्येनात इति दिक् रामइति अव्युत्पन्नपक्षेऽर्थवन्नूसूत्रेण रमंते योगिनोस्मिनि
त्यधिकरणे हलश्चेति यत्राव्युत्पन्नत्वेन कृत्तद्धितसूत्रेणैव प्रातिपदिकत्वमिति बोध्यं सरूपाणां
एकशेष एकविभक्ताविति सूत्रादेवकारोत्रापि प्पवक्रष्यत इति अभिप्रेत्याह सरूपा एवेति ननु विरूपाणी
त्यर्थः एवं चान्वयिनाव चक्रे टकावचोदेनान्वय एवकारस्तात्पर्यग्राहक इति विभक्तित्वात्

श॰ शे॰ वक्रेरेन सारूप्यान्वयोलभ्यतेऽन्यथासामानाधिकरण्येन स्यात् एकशब्दत्वासत्स्यात् अतोजननी
वाचिपरिच्छेत्तृवाचिनोर्मातृशब्दयोर्भ्यामादावपिनैकशेषः ओजसादौवैरूप्यात् यत्तुनैविन्नु
क्तेस्त्र्यर्थस्यानवगमात् ताभिरित्युक्ते पुमर्थस्यानवगमादनुप्रयोगविरोधेन नैकशेषइति न
न्न त्यदादितः शेषेपुंनपुंसकतइत्यस्य सत्वेन नैरूत्युक्तेपि स्त्र्यर्थावगमात् प्रकरणादिगृ
हीततात्पर्यवशेन तथावगमाच्च भ्यामिताभ्यामित्येवानुप्रयोगस्य समत्वाच्च पुमान्स्त्रिये
त्येकशेषोपि न तत्राप्येकविभक्तौ सरूपाणामेवेत्यनुवृत्तेरित्यादिवत्पने हनचैकविभक्ताविति।
वर्थे यानिसरूपाण्येवेत्युक्त्यापूर्वोक्तदोषवारणसंभवादितिवाच्यं हरिणस्त्रीवाचकहरिणी
शब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः पुंवद्भावेन तद्धि
तादौवैरूप्यात् दृष्टानीति लौकिके प्रयोगे इति शेषः एतेनांगकार्येन्त्वेन दीर्घादीनामसिद्ध
त्वादेवकारात् एकर्षेपि मातृशब्दयोरेकशेषो दुर्वारइत्यपास्तं एकशेषस्य त्वंतरंगत्वाद्विभक्त्युत्प
त्तेः प्रागेव नतुविभक्तेर्निमित्तत्वानाश्रयणात् सारूप्येतस्याउपलक्षणमात्रत्वात् एवंचैकशे
षविषये द्वंद्वप्राप्तिरेव द्वंद्वापवादकएकशेषइतिनु यद्येतत्स्यात् तर्हि विभक्तेः प्रत्येकंस्यात्
तथाच द्वंद्वोपिस्यात् कृतेत्वप्राप्तिरेवेत्येतावतैववैरूप्याभावश्च प्रातिपदिकांश एव अतएव सं
ज्ञाभूतप्रथमशब्दस्य सर्वनामसंज्ञकप्रथमशब्दस्य चैकशेषोभवत्येव अन्यतरस्य जसि प्रथ
मेइत्यस्यापि सत्वेपि प्रातिपदिकांशेवैरूप्याभावस्यैवसत्वात् इत्याहुः किंभिन्नपंक्तीनामेकशेषइ

त्रिपदेऽपि प्रयोगे स्वरूपप्रकृतिकविभक्त्यंतानामित्यर्थात् न फलभेद इति दिक् स्यादेतत् दिदं सूत्रं+
व्यर्थं तंत्रेणैव सिद्धेः यथा अन्तलाभत्वंता तंत्रेणैव भक्त्यंतानां दीर्घानामित्यत्र स्वतादृत्तिकारकस्य
सरूपाणामुपादानेऽपि शाब्दप्रतिपत्तिभेदसमाश्रयेणेन प्रत्येकं सर्वत्रासर्वत्रान्वयः तत्र कारणं तु शा+
ब्दानां तुल्यरूपता तदुक्तं अर्थलाभादिषु यथा भिन्नाभक्तिभिन्नादिविभक्त्या प्रयोगकालाभेदेऽपि श+
क्तिभेदं पृथक् स्थिताः अक्षिणां तंत्रेणां तंत्रे उपायस्तु तुल्यरूपतेति एवमक्षाभक्त्यंतानां भक्त्यंता+
भक्त्यंतानामित्यपि भवति तत्र तंत्रं द्विविधं शाब्दं तंत्रमर्थतंत्रं च शाब्दस्य पर्यायपरिवृत्तिसहत्वे शाब्दं तं
त्रं तस्य तत्सहत्वेऽर्थतंत्रं माघमसहायेत्यादावेतत्पटादित्यादौ प्रकारांतरेणैतत्स्वहृदयनिहितपर्णेन तत्
द्रूपेणैकशेषवादे मंत्रव्याख्यांतु एवं तत्र भक्त्याभक्त्यंतानामित्यादौ विभक्त्यंतानामेव तंत्रं अनेका+
नि शाब्दज्ञानानि अनेकस्य तदर्थोपस्थितनयोग्यपदिति प्रत्येकान्वयविषयः समूहालंबनात्म
को वा धीः ज्ञानयोग्यपदस्यापि पातंजलेरंगीकारात् पटान्यापूपान्यपूपेत्यादौ तु एकमेव शाब्दज्ञा+
नमर्थोपस्थितिश्चैकैव समूहालंबनात्मिकेति प्रातिपदिकानामेव तंत्रं क्वचिद्विभक्त्यंतानां तंत्रम
नेकज्ञानयोग्यपदं क्वचिन्मातिपदिकतंत्रं समूहालंबनात्मकमेकपदतदर्थज्ञानमित्यत्रान्वय
नैकपदसमभिव्याहारस्तादृशैकपदसमभिव्याहारश्च तंत्रमिति निर्बोध्यं अनेकार्थतात्पर्यग्राहक
मकरणादीनां क्रमात् क्रमेणोपस्थितौ बोधेनावृत्तिः अक्षाभक्त्यंतोमित्यादावपि व्याख्यानैरेव तु
द्वारेणैकमात्रेणातंत्रव्यवहार इत्यपि कश्चित् अर्थभेदेन शाब्दभेदे अनेके शाब्दप्रतिपत्तितात्पर्यैक

शा॰ शे॰ सरूपस्मारणात्मकं शास्त्रं तत्रं तद्देदपि शक्त्याभेदवादे तदुगतशक्तीनां तत्त्वे इदमेव सरूपस्मारि
शास्त्र तं स्थाने कार्थबोधकत्वरूपार्थं तत्रत्वेन व्यवह्रियते न चोप्याशास्त्रीये एकशेषेणनिर्वाहः
एकशेषशास्त्रमर्यादया इतरनिवृत्तिपूर्वकावस्थिते रेव प्रतीत्यालोपादिविषयस्य वशिष्यमाण
स्यैव लुप्यमानार्थाभिधायकतायाश्चावश्यकत्वेन प्रातिपदिनामेकशेषेणोच्चतत्र एव विभक्तौ
तदर्थव्यासत्त्यवृत्तिसंख्यायाश्चान्वये व्यासत्त्यवृत्त्यान्वयितावच्छेदकधर्मावश्यकतायामेतत्
वायांसमासवादे उपपादितत्वेन साहित्यरूपतद्वा...नावश्यकतया प्रत्येकान्वयस्य दुरुपपाद
त्वात् एवं च विभक्त्यंतानां तंत्रमिव प्रातिपदिकानां तंत्रेण रामा रामा रामा इत्यादिसिद्धिः ध्वनितं चेदम
शिष्य एकशेष इत्यादिना द्रव्यप्राप्तिवादेपि सूत्रप्रत्याख्यानपरभाष्येणेति चोक्तसत्यं लोकसि
द्धार्थानुवादकं सूत्रं अनुवादफलं तु अक्षादीनां त्वं तामसत्वाभत्वं तामित्यादौ प्रत्यर्थं शास्त्रनिवेशा
स्यापि दर्शनात् कदाचित्तार्थप्रयोगे सहविवक्षायां प्राप्तद्वंद्वनिवृत्तिः सहविवक्षाविषयप्रा
प्तस्यैव बाधबोधनाय तत्र पदं त्यक्त्वा एकशेषपदप्रयोगः सरूपाणामेकशेष एवेत्यर्थात्
ध्वनितं चेदं पृथक् सर्वेषां विभक्तिपराणामेकशेष इति पक्षे विभक्त्यंतानामेकशेष इति पक्षे
च द्वंद्वप्रतिषेधो वक्तव्य इत्याशंक्य नवकारा एकशेषो द्वंद्वं बाधिष्यत इति ग्रंथेन अत एव
च त्यायते सहविवक्षायामेकशेष इति इतरेतरयोगद्वंद्वविषय इति यावत् यत्र ह्यनेकार्थस्य मि
लितस्येतरान्वयः स तत्र प्रभूतो विषयः अत एवेदितोनुम् धातोरिति निर्देशः संगच्छते साहित्य

सरूपाणामेकशेष एवेति नियमार्थत्वात् तस्य लं तु सूत्रे

स्यभेदघटितत्वेनान्यपदार्थे उपसंक्रमात्परस्परान्वयाच्च साहित्यनिमित्तैकशेषाभावस्तत्रन्या
योऽप्यस्ति यः शिष्यते स लुप्यमानार्थाभिधायीति स्थिते पुष्यवंतावित्यादावविशूयमाणैक
शेषत्वोपस्थितत्वसर्वस्यैकत्रैकरूपेणैवान्वेतुं योग्यत्वात् पूर्वसूत्राद्द्वंद्वे इत्यनुवर्त्य द्वंद्वे प्रसक्ते
सतीति व्याख्यानाच्च द्वंद्वेकृते इति तु नार्थः पंथानावित्यादौ समासांतानामलौकिके प्रवृ
त्यात्तत्रजाते पश्चात्समासे एकशेषे न तु ष्ट्वणापत्तेः करावित्यादावेकवत्त्वापत्तेश्च सर्वेषा
मित्यादौ द्वंद्वे च विभाषा जसीत्यनयोरापत्तेश्च जसः शी स्यात्र वेति वक्तव्ये विभाषा जसी
ति तु ज्ञात्याख्यायामेकस्मिन्बहुवचने उद्भूतावयवभेदविवक्षया बहुवचने च एकशेषा
भावात्तत्र विकल्पवारणायोत्तरार्थे चेत्यादि समासे निरूपयिष्यामः एवं च सहविवक्षा
विषयं तं त्रमेकशेषशास्त्रेणोच्यते बोध्यं इदमेवाभिप्रेत्याविभक्तौ तानामेकशेषे एकग्रहणं
किमर्थमिति पूर्वपक्षे ब्राह्मणाभ्यां च देहि ब्राह्मणाभ्यां च कृतं पयः पयो जरयतीत्यादौ ए
कशेषे सति ब्राह्मणौ इति ब्राह्मणाभ्यः इति पयसी इति च प्राप्तयोर्वारणायैकविभक्ताविति
आशंक्य न वार्थविप्रतिषेधादिति तदर्थितत्वं तस्य खंडितं उपपादितं च कर्तृसंप्रदानमित्या
दयो विरुद्धार्थाः इति न युगपद्वचनं अनेकाश्रयश्चैकशेषः अनेकमर्थं संप्रत्याययिष्यामी
ति एकशेष इत्यादिना भाष्ये तत्रानेकमर्थमित्यस्य युगपदित्यादिः एवं च सहविवक्षावि
षयत्वस्य स्पष्टमेवैकशेषस्योक्तं एकग्रहणस्य फलाभावश्च स्पष्टमेवोक्तः शाब्दत्वं चैतेन च स

ला

प्रा॰शे॰ हविवक्षाविषये एव विभक्तौ नतंत्रेण वा सत्वेन भ्यां कृतं देहि पयोजनयनीत्यादिनीलोत्पलस्पर्द्धिनीलत्व
नेत्रे वा हरेरिति वद्दिदृक्ष्मानहंसानि वक्त्रेष्टमेवेति वाच्यं कृतं द्वंद्वानामेकशेषकृतिपक्षे सहविवक्षा
विषयत्वस्यैव सत्वाच्च स्वरसमासांतानां द्विदोषेण सुपत्तोनिराकृतत्वस्यदेतत् किंचासहविव
क्षायामपि सूत्रप्रवृत्तौ सहविवक्षायां द्वंद्वस्यैव कर्मधारयस्यापि बाधापत्तौ सारवसारवोमित्रत्व।
त्यादिप्रयोगाविरोधापत्तिरिति ध्येयं यथा च सहविवक्षायामेवैकशेषविरूपाणामनेकशे
षारंभपरभाष्यविरोधो न भवति तथा भाष्यप्रदीपोद्योते निरूपितं एकशेष एवेत्ययं नियमो
विभक्तौ यानि सरूपाण्येव न हि विषयस्तु नं एवं च श्रावित्यास्वरूपाणामेवैकशेषः इति च निय
मः तेन मातृमात्रादौ नैकशेषः प्रातिपदिकैकशेषे मातृमात्रो प्रतिषेधो वक्तव्य इति वार्त्ति-
के प्रातिपदिकैकशेषस्यैक विभक्तौ विधि पदाभाव एवोपपत्तिमत्वाद्विरूप समुदायादेकविभ
क्तौपरतएकशेषइतिपक्षं च मत्वा कृते मातृग्रहणं विभक्तौ विरूपाणामुपलक्षणं न च शाबुक्ती
विशिष्ट ।विधिनियमेन व्याख्यातिसिद्धौ वार्त्तिकं व्यर्थं विभक्तिपदभावे यानि सरूपतेषामेकशेष एवेत्यर्थ
स्यैव प्राप्तेः न सरूपाणामेवैकशेष इत्येवं नियमस्य सत्वेन प्राप्तेः प्रयोगमात्रावच्छेदेन सारूप्य
स्य हरिणीप्रसादादावर्शोगेन प्रयोग सामानाधिकरण्येनैव सरूपस्य ग्राह्यत्वयात स्मात्रा
पि सत्वात् प्रतिषेधेन च साहविवक्षाविषयैकशेषस्य निषेधे न हि द्वे षयेद्वंद्वः फलेवाक्यंच
सिध्यति असहविवक्षाविषयं तंत्रेत्तु भवत्येव मातृभ्यां कृतं देहीति च सहसामर्थ्यं नामित्या

दिवत्। ननु वार्त्तिके प्रातिपदिकानामेकशेष इत्यसंगतं विभक्त्यां नानामेकशेषेपि जननीभ्यां देहि
धान्यमातृभ्यां चेत्यर्थेपि एकशेषे मातृभ्यामिति स्यादिति तन्मतेपि प्रतिषेधश्चावश्यकः न च तन्त्य
तेरुच्छापत्तिः अत एव किमुच्यते प्रातिपदिकानामेकशेष इति न पुनर्यस्यापि विभक्त्यां नानामेकशे
षस्तेनापि प्रतिषेधो वक्तव्यः तस्यापि ह्येतानि कानिचित् विभक्त्यं नानि सरूपाणि मातृभ्यां च मा
तृभ्यां चेति अन्यमतमेतत्। विभक्तौ नानां सारूप्ये भवितव्यमेकशेषेणेति भाष्ये उक्तमिति वा
च्यं सूत्रव्याख्यानपक्षभेदेन तत्पभेदस्यानुचितत्वात्। विरूपाणामनेकशेष इत्यादिभाष्य
विरुद्धत्वाच्च अत एव गायमतमेतदिति प्रतीकमुपादाय भाष्ये पर्गमस्य वादेन त्वेतदुच्यते इति हरिके
यटादिभिर्व्याख्यातमिति चेन्न ईदृशाविरुद्धमभ्युपेत्यैव वार्त्तिकेपि तदुक्तेः अत एव भवितव्यमे
वैकशेषेणेत्युत्तरं एवं च तत्त्वबोधिन्यामुक्तं भाष्ये यस्य प्रातिपदिकानामेकशेष इत्यादीति शे
षः अनेन चाचास्य पूर्वपक्षवार्त्तिकमस्यस्य चिन्त्यमत एव तत्खंडनाय अत एव विभक्तिग्रहणसत्त्वे
पि तद्रूपलक्षणे सारूप्ये प्रातिपदिकैकशेषे उक्तरुत्रस्यापि ते मात्रादिविषयप्रतिषेधा वार्त्तिकव्यर्थ्यम्
रंभादि भगवता नोक्तं एवं च सूत्रस्थतन्नियमेनैव सिद्धेरिति तदाशयः एतेनैकविभक्तौ विग्रहाव
यैकविभक्तौ सरूपाणामेकविभक्तौ विवक्षितायामेकशेष इत्यर्थे यस्यां विभक्तावेकशेषस्त
स्यां विभक्तौ सरूपाणामित्यर्थस्य प्रत्यासत्त्या लाभेन भ्रामादावेकशेषो नेत्यसादोष एवं च वार्त्तिकं
व्यर्थमिति तद्भाष्याशय इत्यपास्तं अर्थवत्ते भाष्यानारूढत्वाच्च वार्त्तिकमते पिप्रातिपदिकैकशे

११९

119

शाश्वा· शेमात्रभ्रामित्यादावपि तदभावस्य प्राप्तत्वाच्च सहविवक्षाभावविषये द्विर्वचने चित्रत्वाभइयं तामित्या
दौ भाष्ये एकशेषप्राप्तिस्तु समानफलकत्वात्तन्त्रादिलक्षणः एकविभक्तावित्यत्रैकपदं तन्त्रव्यापार्थमे
व धनि तंचेदं विभक्तिः सारूप्ये उपलक्षणमिति भाष्ये एकपदानुच्चारणेन तन्त्रावृत्त्येकशेषाणा
मन्यतममित्यादौ गोबलीवर्दन्यायेन तन्त्रैकशेषयोः सहप्रयोगः क्रमेण बोधे आवृत्तिः ननु विभ
क्तं नानामेकशेष इति पक्षस्यापि भाष्यारूढत्वे स एव किमिति नोपन्यस्तः न च वृत्तस्थ वृत्तस्थे
त्येकशेषे तत्सहितस्यैव शेषे द्विवचनाद्यनुपपत्तिः इष्टानुपपत्तिसंभवात् युगपदधिकरण
वचनतायां द्वन्द्व इति पक्षे एकैकमनेकार्थाभिधायि परस्परसमभिव्याहारसत्त्वात् एवं चानौ
किकेपि तत्सत्त्वाद्द्वन्द्वादिप्रवृत्तेस्तत्रैव सत्त्वाच्च तत्रापि तत्कल्पनेन द्विवचनादीनामेव प्रवेशः
नचैवं रामकृष्णावित्यादौपि वृक्षाणामपीत्येकशेषापत्तिः द्वन्द्वविधानसामर्थ्येन सहविवक्षा
प्राक्कालिकस्यैव समानार्थत्वस्य तत्र निमित्तत्वात् तत्रैकस्य विभक्त्यंतस्य निर्भिवृत्तावपर
स्य नाद्विशिष्टस्य श्रवणं भविष्यतीति चेन्न अलौकिके तत्कल्पनेपि प्रत्येकं स्वनुत्पत्यनंत
रमेव तत्कल्पना तदनंतरमेव तत्कल्पक द्वन्द्वैकशेषयोः प्रवृत्तेः ततः प्राक् परस्परसमभि
व्याहाराभावेनांतरंगत्वाद्द्वन्द्वैकवचनत्यागेन द्विवचनाद्युत्पत्तौ मानाभावात् अत एव
व्यपेक्षावादे षष्ठीतत्पुरुषादयः संगच्छंते अन्यथा तत्र येपूर्वपदस्य राजसंबंधिनिलक्ष।
णयांभेदनिर्बंधनषष्ठ्यायनापत्तेः तद्भेदः स्पष्ट एव किंच द्वन्द्वव्यवहारोऽपि प्राक्तार्थ

रा१

द्याववसायः न च ब्रह्मवशाद्दृश्यन्यग्रोधापित्वं लोके दृश्यते नचलक्षणान्न्यग्रोधशब्देन तल्लाभात् ।
वार्थेद्वन्द्वद्वन्द्वे इति द्वंद्वसूत्रविरुद्धाच सा अपि चाप्रमाणाभावः समुच्चयान्वाचयपक्षेः समासस्यासा
मर्थ्येनैव वारयिष्यमाणत्वात् नहन्त्वार्थो यांदन्नौन स्याउक्तिसंभवाभावाच्च नचान्यत्रोपर्यपि ८
नुमशब्दात्वेपि एकशेषेकस्यशेषइत्यत्रविनिगमकाभावात् सर्वेषांसर्वार्थत्वमावश्यमितिवा
च्यं पि एकस्यलक्षणया पयन्तेरितिदिक् ननुमिलितेनार्थप्रतीतेः समुदायस्यप्रातिपदिकत्वे
समुदायादेकविभक्तौ परत्व एकशेषः नचसमासग्रहणस्य नियमार्थत्वात्कथं समुदायस्यप्रा
तिपदिकत्वं यत्र संघाते पूर्वोभागः पदमित्येवं सज्ञानीयविषयत्वान्नियमस्यादोषः एतत्पूर्वभा
गस्य स्थाने ऽक्षेणप्रयोगानर्हत्वात् अत एव वक्रु पटव इत्यादेः प्रातिकेपदिकत्वं एवं च एकाचद्वि
र्वचनन्यायेन समुदायादेव विभक्तिः नप्रत्येकं समुदायाउत्पन्नयाप्यवयवानां संख्यान्वयरू
पानुग्रहसंभवात् यामकुलाविन्यादोलुनद्वंद्वे विनासमुदायाद्विभक्तिः द्वंद्व विधावनेकं सुवन्त
मित्यस्यानुवृत्त्या एकाचद्विर्वचनन्यायस्यवाधात् अत एव नलोपादिसिद्धिः साच समुदायस्यैक
संख्याकारकावेश एवमवतीति पयः पयोजरयतीत्यादौन व्याप्तिः प्रत्यासत्त्यासतद्रूपसमुदाया
र्थान्वयित्वात् एकविभक्तेरेवग्रहणात् अत्र पक्षे एकविभक्तावितिसेवास्पष्ट हविवक्षायां प्रवृत्तिरि
त्यर्थेतात्पर्यग्राहकं अत एव पयः पयोनयतीत्यत्र गौणमुख्यकर्मणोरेकशेषोन नचात्रैकशे

शा॰ शे॰ षे नद्युत्पत्रद्वितीययाविरुद्धयोर्गौणमुख्ययोः कर्मणोः कथं प्रतीतिः नं त्वेवमपपत्तेः किं चासहवि
वक्षायामप्येकशेषेण नपुंसकादिविषयेऽपि देवदेवदत्त्यादौ नदापत्तिः नच रामरामौ इत्यादौ पर
त्वानित्यत्वाच्च वृद्धिरेचीत्यकादेशोऽभयतआश्रयणे तद्भावविरहादेकशेषो न स्यात् इति वाच्यं
परादिवद्भावो नोऽन्तस्य प्रत्ययत्वेन मांतसमुदायस्य चैकदेशविकृतन्यायेन तुल्यत्वातिनयाऽन्तनेः
सच न्यायो शास्त्रीयस्यातिदेशकरत्वस्यार्थस्य स्थाने षष्ठ्या बोधिते विकारस्यापि तद्ग्रहणमित्य।
र्थस्य प्रागुपपादितत्वात् पाठान्तर चिकीर्षतीत्यादौ तु गापत्तिवारणाय कृदतिङ् सूत्रस्य भाष्यरीत्या
ऽत्रापि स्थानिभूतादचः पूर्वत्वेन दृष्टस्य कार्ये सत्त्वेन अचः परस्मिन्निति स्थानिवद्भावेऽपि न सिद्धिः वि
भक्त्यव्यवहितस्यैव स्थितिरित्यर्थे मानाभावेन तस्यापि कदाचिन्निवृत्तौ विभक्तिसाहित्यैनैव निवृ
त्याव्यक्तौ द्विवचने रामइत्यस्याप्यापत्तेरिति वाच्यं एवं शिष्टरामशब्दस्यापि प्रातिपदिकत्वेन तन्नो
त्यनुवादक विभक्तौ रामावित्यादि सिद्धेः लक्ष्ये लक्षणस्येति न्यायस्य तु न विषयः लक्ष्याभेदात्।
किं च एकशेषपदे उपस्थितेः एकस्य प्रत्यासत्त्या विभक्त्यव्यवहितस्यैव ग्रहणेन विभक्तिव्यवहितस्य क
दापि शेषाभावात् इतरनिवृत्तेः स्वार्थविधेयत्वं ननु शाब्दं किं च वृध्यादिप्रवृत्तावेकशेषशास्त्राप्र
वृत्यानित्यविधुद्देश्यतावच्छेदकानाक्रांतत्वेन तावदेव परिनिष्ठितं स्यात् नत्वनुलोके प्रयुज्यते
प्रयुक्तानां चेदमन्वाख्यानमिति न तन्न प्रक्रियावाक्येऽवृध्यादि प्राप्तिः एतेन प्रयुक्तानेवहन्वाख्या।
नमलौकिकमुक्त्वाते शास्त्रीयं च कार्यं सर्वमलौकिक एव प्रवर्तते न परिनिष्ठितरूपास्ते

यत्काशास्त्रीयकार्यं प्रवृत्त्यापरिनिष्ठितं सत्लोके प्रयोगार्हं तदीयालौकिके कल्पिते शास्त्रप्रवृत्ताव
प्यत्र ततो वैषम्यात् एतेन परत्वान्नित्यत्वाच्चावादो नावकाशस्तद्वाहावित्याद्यसिद्धिः वेदं रूप्यादितिनि
रस्तमिति चेन्मात्रमात्रोरेकशेषाभावाय वचनस्य एकविभक्तावित्यस्यापरत्रैवाकरणे गौरवात्
किं चारब्धेषु त्यासत्तिन्यायप्रवृत्तौ मातृभ्यामित्यादावेकशेषापत्तिः सहविवक्षायामित्यर्थस्यप्रया
गुरुत्वरीत्यैकशेषशब्दबलेनैव लाभे नैकविभक्तावित्यैकशेषविशेषणत्वे फलाभावाच्च किं चैव
मपि अनेकबोधकैकमित्ताशब्दात् अणोभिर्वृत्तमिति सिद्धावपि मित्ताभित्ताभित्ताभ्याम् अत इति
स्थिते अंतरंगानपीति न्यायेनाकृतव्यूहपरिभाषया वा पूर्वं लुकि विभक्तिपरत्वाभावात् परत्वान्नित्य
त्वाच्चादिवद्धोसान्न्याभावाच्च एकशेषाभावे भित्ताभित्ताभित्तमिति स्यात् अथ विकल्पायेन
समाधाने तु लक्षणैकचक्षुष्कैर्द्वैधत्वात्तु पक्षे न च समर्थग्रहणेन परिनिष्ठितप्रातिपदिकात्त
द्धितोत्पत्तेः पूर्वमेकशेषे कृते पश्चात्तद्धित इति वाच्यं प्रातिपदिकादित्यधिकारात् किं तु समर्थेकृ
तवर्णानुपूर्वीकमिति भाष्याच्च प्रातिपदिकसंबंधिवर्णमात्राश्रयत्वसंबंधिवर्णनिमित्त
कार्येण परिनिष्ठितत्वस्यैवाश्रयणात् अत एवाधिमानस्येत्यादिनिर्देशाः संगच्छन्ते अन्य
थाप्रकृत्यंशे दीर्घश्रवणं स्यात् अत एव विश्वोहरं दधिसेवातु प्रामित्यादि विभाषापूर्वांलिख
त्रस्य भाष्यप्रयोगाः संगच्छन्ते अयं दोषः प्रत्येकं द्विवचनाद्यंतानामेकशेष इति पक्षेपि बोध्यः त
थाहि मित्ताभ्याम् मित्ताभ्याम् मित्ताभ्यामित्यत्र संमुदायाद्यद्यपि प्रातिपदिकादित्येकत्वविव।

12

प्रा॰ प्रे॰ लक्षणादेकप्रातिपदिकशक्तिकत्वेनाभावेन न प्राप्नोतीति तथापि तदवयवादेकस्मान्न स्पष्टु।
वीरत्वेन तत्र कृते परत्वाद्द्वादिरवशेषे वैरूप्यादेकशेषो न प्राप्नोति नच विनिगमनाविरहेण प्रत्येक
न्ना मुत्पन्नानां वा एतत्र यापत्तिः अंत्यादेकस्मादुत्पन्नेन सर्वेषां प्रत्ययार्थान्वयानुग्रहसिध्या तत एवो
त्पत्तेः उत्सर्गेतः परभूतप्रत्ययार्थार्थान्वयस्यैवमुत्पन्नत्वात् नथापिमेतासिद्धेश्च प्रत्यया
त्पत्तेः पूर्वमेकशेषः अकृतव्यूहपरिभाषयाऽप्राप्तेः प्रत्येकमुत्पन्नावपि एकपदार्थे त्रया
णामन्वयाभावेन सहविवक्षायाव्याहतेः प्रातिपदिकैकशेषपक्षे तु नाकृतव्यूहपरिभाषा
प्राप्तिः विभक्तेरुत्सत्तः सारूप्यस्योपलक्षणत्वेनाश्रयणात् अत एव सर्वत्रापत्यादिरूपसंख्या
नेभिन्नानां समूहोभेत्तं सर्वत्रेत्यच्युते प्रातिपदिकानां चैकशेषसिद्धमिति भाष्येउक्तं किंच
विभक्तिसहितप्रयोगरूपानुग्रहाय प्रत्येकं विभक्तेर्दुर्वारत्वं अत एव द्वंद्वविधानं संगच्छते एवं
समाहारद्वंद्वविषयेपि एकशेषो वोध्यः लौकिकन्यायसिद्धं तत्र स्पष्टुर्वारत्वाच्च नच नपुंसक
त्वापत्तिः समाहारद्वंद्व एव तदनुशासनात् अत एव घटघटमिति प्रयोगो न एवंच प्रत्यर्थं
प्राचूनिवेशपक्षेपि नञ्ब्राह्मणं हन्यादित्यादौ सकलव्यक्तिसंग्रहस्यैकशेषेणैव सिद्धेः प्रतिव्य
क्तिलक्षणेनावर्त्यं भवतीत्यपरमनुकूलम् एकवचनेन तु समुदायस्यैकत्वाभिप्रायेण बोध्यं
हननक्रियान्वयस्तु तत्र वाधितत्वात् व्यक्तिष्वेव भवति ब्राह्मणानां शतं भोज्यमितिवत् ए
कवचास्यान्यतरस्यामित्यस्य साथ्येवयेत्तु तत्रैव वक्ष्यते नचासहविवक्षायामपि तत्र सत्वे

इति नोनुमित्यादौ पूर्वरूपत्वनिर्देशो व्यर्थः अनेकपदार्थानवगमस्य दुरुद्धरत्वात् अनेकपदार्थस्या
नेकस्यैव तन्निमित्तकसमासे कृते तत्रेतरस्य कृतव्यूह परिभाषाया समासस्यैवानापत्तिः इत्यस्य
थानो रिति सूत्रप्रणयनेऽनुलाघवाभावः असंदेहाय यथान्यासमेव युक्तत्वाच्च एकशेषप्रवृत्ता
र्थेश्वेतरनिवृत्तिपूर्वकमवस्थानं नदोषः एक एवेति अत्रैकेति लुप्तविभक्तिकं नं पृथक्पदं अत एव
सरूपाणामित्यस्य तत्रान्वयः तच्चावस्थानस्य स्वतःसिद्धत्वेनाविधेयत्वान्निवृत्तिरेव विधेयात
त्र शिष्यमाणं लुप्यमानार्थाभिधायीति सिद्धांतानुरूप्यमाणवदाल्लक्षणया बोधः यत्तु घटादिश्ना
द् स्मरणाद्बोध इति तन्न प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वभंगापत्तेः इतरनिवृत्तिशा
स्त्रमज्ञानतो बोधानापत्तेश्च धातुविषये तु नास्य प्रवृत्तिः एकनिष्ठानेकव्यापाराणामेकधा।
तुना बोधवत् अनेकनिष्ठानामपि तत्फलानुकूलत्वेनैकधातुत एव बोधसंभवेनानेकधातुप्रयो
गस्याप्रसक्तेः शब्दशक्तिस्वभावेन धातुवाच्यक्रियायाः कर्त्रादिभेदेऽपि निवृत्तभेदाया एव प्रत्ययात्
नैवेवमपि कर्तृद्वयादौ लड्द्वयादिति वाच्यं वर्तमाने लडित्यादावेकत्वस्याविवक्षणादेकस्यैव विधा
नात् किंच लत्वज्ञातेः परत्वमाश्रित्यानेकस्य परदेशविधानेऽपि लस्यैव त्याच्चापि तद्द्विवल्लयाल्लद्व
यादेस्तुल्यसादयोऽभविष्यन्नीत्यदोषः ध्वनितं चेदं प्रातिपदिकानामेकशेष इति पत्नोपन्यासभाष्ये +
णां गर्गा इत्यादावपि पितुरेकत्वात्स्त्रकृतिरेकाय ज्ञमस्तु बहवः प्रानुवंति यत्र इत्यत्र व्यक्तौ काविव+
क्षयावारणीयाः संतु वा बहवो यज्ञाः तेषां विरूपाणामपि समानार्थानामित्येकशेषः वैरूप्यं चेषां

श. शे. केवलेभ्योविभक्त्यभावेन विभक्तौसारूप्याभावान्नइतिदिक् सरूपाणामितिकिम् घटपटौ शेष
इत्येतावन्मात्रोक्तौ द्विवक्तौरविशेषः प्रसज्येतएकइत्येतावदुक्तौत्वेकस्यादेशइत्यर्थः स्यात् त
थाचाश्वश्चाश्वश्चेत्यादौकदाचित्त्वनुदात्तवत्त्वादिसाम्यमादायनातृप्त्यादेशः प्रसज्येत केचित्तु
श्रूयपूर्वश्रूयमाणोदात्तानुदात्तयोरुभयोरनुग्रहाणांतरतमपरिभाषयोभयस्वरकएका।
देशोभविष्यति किंचह्युदात्तह्यनुदात्तयोरुभयोः पर्यायेऽप्युदोषस्तुद्विविकल्पापत्तिः त्रयाणा
क. मैकशेषत्वदात्तादीनामसंभवाच्च अतस्तत्त्वइत्युत्त्येकशेषएकश्रुत्योऽल्पत्वाद्दैवस्येवस्यात् सत्रे दे
त्वंनेकाल्त्वचरितार्थंततःसवर्णेदीर्घेदीर्घाज्जसिचेतिपूर्वसवर्णदीर्घनिषेधात् पणियावि
त्तिस्यादित्याहुः नचात्रस्यादेवनस्येतिफिट्सूत्रेणशाकटालेश्चाद्युदात्तस्यात्सघ्राट्स्यदे
वनास्तेपिचरत्वंतोदात्तस्यचेकशेषकदाचिदाद्युदात्तस्यकदाचिदंतोदात्तस्यशेषः स्यादि
तिवाच्यं स्वरभिन्नानांयस्योत्तरः स्वरविधिरितिवचनेनैवनिर्वाहात् भिन्नस्वरकाणांतत्राप्राप्तेश्च
स्वरभिन्नानामितित्वपूर्वमेवेतितत्त्वंद्वौचएकस्यएकश्चेत्यादावेकौद्वौद्वावनभिधानान्नभवतः विप्रा शेष
तीइत्यादौत्वेकशेषइष्टएव।व्यक्तिःपदार्थइतिपक्षेप्रत्यर्थंशब्दनिवेशात् यावद्व्यक्तिशब्दप्रयोगेप्रा
प्तेइदंसूत्रमावश्यकं यद्यपिकेवलाज्जातिःपदार्थः व्यक्तिद्वाराचलिंगसंख्यादीनांज्ञानात्वेवान्वयः
पुक्रा श्चात्रितत्त्वव्यक्तौवान्वयइतिपक्षेतुएकाकृतिकत्वविनाभूतानेकव्यक्तिप्रतीतेरेकस्मात्क्वादपिसं
भवात्रार्थोनेनेतिप्रांचः तथापिसर्वांपादाःद्वमयोरित्यादौनानाकृतियुक्तानेकव्यक्तिबोधार्थं

सूत्रमावश्यकं तंत्रादिनानेकार्थप्रतीतिसंभवति व्यर्थमिति चेद्यावताप्येतावता सूत्र एव तंत्र
वावर्त्तनं हत्यादित्यादौ एकेनापि त्यागादिना शब्देन तंत्रेणानेकार्थबोधः तस्मात्स्याद्वयेऽपि तं
त्रेण निर्वाहेऽपि सर्वतंत्रे णैव बोधनीयमिति नियामकाभावात् घटोयमिति नानाशब्दप्रयोगद
र्शनाच्च पाणिनीयोहं द्वंद्वः सूत्रं विना दुर्वारः स्यादिति पक्षद्वयेऽपि सूत्रमावश्यकं घटकलशावित्या
दिद्वंद्ववारणाय विरूपाणामपि समानार्थानामिति वचनमेव कर्त्तव्यं रूपमतेवोधत इति युत्स्वात्वा
स्या रूपशब्दार्थपरत्वमाश्रित्य नार्थिकार्थस्य क्रोडीकरणात्स्याद्वेत्याहुर्नेच्या: न च द्वंद्वोनभिधानाद्वारणीयः
तथात्वे तत्राख्यानस्यावमत्कारित्वात् किं चैवं सर्वत्रानेनैव द्वंद्ववारणे संभवति त्यदादीनि सर्वैरि
ति सूत्रे द्वंद्वनिवृत्त्यर्थत्वमाशंक्य सामान्यविशेषवाचिनोर्द्वंद्वोनेति वचनेन तं वारयतामस्यत्र त
द्वारणोपायमकथयतां च भाष्यकृतां तद्वारणार्थत्वस्यान्यत्र ध्वनितत्वादिति दिक् मातृमात्रोः स
हविवक्षायां तंत्रवारणाय सर्वत्र पक्षेऽपि सूत्रमावश्यकमिति तत्त्वं दच्युङ् स्त्रादिर्ज्जिङ्उवरत्यतस्त्रा
दिरिति षः प्रत्ययस्येत्यतः प्रत्ययस्येति चानुवर्त्तते तदाह प्रत्ययाद्यावितिदे तेनवाचाट इत्यत्र नेत्वं
प्रत्ययेति किं डाणल्लादीनां डादेः पूर्वमेवत्वे लोपेच सर्वादेश त्वानापत्तेः न च णलः प्रत्ययाधि
कारे पाठे नोपदेशोपि प्रत्ययादित्वात्सर्वादेशत्वानापत्तिः वाक्यार्थबोधोत्तरमेव प्रत्ययत्वज्ञाने

शा श्री · 123

नोपदेशो तदन्तात्तेः आदेशानामधिकारे प्रत्ययत्वे मानाभावात्फलाभावाच्च तुटुषः प्रत्ययस्येति स-
त्वपि तन्त्रे योगविभागादनित्यमिदं तेन चुञ्चुपूचणयोः श्वस्यतेत्वम् भाष्येतु यकारादी चंचुपूचणया
वितिसमाहितम् तस्यायंभावः उपदेश इत्यनुवर्त्तते उपदेशकाले विद्यमानो प्रत्ययादिश्चुटू इति वा
क्यार्थः यद्वा स नैमित्तिकलोपो व्योरिति यलोपस्य बहिरंगत्वाद्यकारोच्चारणसामर्थ्याच्चासिद्धत्वा
त्प्रत्ययादित्वाभाव इति यत्तूपदेश इत्यनुवर्त्तत इति तन्न डाणप्लादीनां उकारादेरित्वानापत्तेः वि
भः हलन्त्यमिति निषिद्धान्तस्य निषेधोयम् अनित्यमिदं प्रमोमकारपरित्राणार्थादुदित्करणाल्लिं
गात् तेन किमोत् के इति सिद्धं अन्यथा श्वाप्से ग्दिशीयत्वेन विभक्तित्वादित्संज्ञा न स्यात् अत एव
तदानीमित्यादौ तदोदाच कारे एदानीमितिटीयमस्येत्वनिषेधो भवत्येवेति दिक् विभक्तौ किम्
अचो यत् अतो गुणे उस्य पदान्तादित्यतो पदान्तादिति एङि पररूपमित्यतः पररूपमिति चा
नुवर्त्तते पुरस्तादिति अत एव नादिचीती ल्युहणं च विलार्थं तद्धिरामाः रामानित्यादौ निषेधा
भावाय पररूपेण पूर्वसवर्णदीर्घवाधे हितं हैयर्थ्यं स्पष्टमेव नोत्तरानिति अनंतरायेत्योत्तरान्
व्यवहितानर्थ इत्यर्थः एकवचनं सम् ननु सु संबुद्धिरित्येव सूत्र्यतां सत्त्वमीवहुवचने तु संबोधने
चेत्यतः संबोधन इत्यनुवृत्तेर्महासंज्ञाकरणाच्च न दोष इति चेन्न सामंत्रितमिति वन्महासंज्ञाक्लृ
प्ताहचर्याद्ब्रह्मस्तु अन्यथा तस्य संज्ञाश्रमव्यावृत्यर्थमेकवचनग्रहणं तदंतस्य संज्ञित्वे हि एङ्ह्र
स्वादित्यत्रांगाक्षेपाभावेन हे कतरदित्यसिद्धिः महासंज्ञाकरणं तु सम्यगवुद्धिर्लोके यस्य

न्तर्यंबोधनद्वारा कश्चिद्विप्रयोगानुरोधेन संबोधनविभक्तेरभावबोधनाय तेन त्यदादीनां संबोधनं ना
स्तीति सिद्धमित्याहुः संबुध्याक्षिप्तेति आक्षेपो ग्रहणमात्रं स्पष्टं चेदमंगस्येति सूत्रे कैयटे तत्र हि परस्परं व
त्यंगप्रत्ययसंज्ञाभावादिति भाष्यमुपादाय प्रकृतिमंतरेण प्रत्ययस्याभावात्तद्विधौ निमित्तत्वेनाक्षेपणा
च्च प्रकृतिः प्रकृत्याश्रयनिमित्तं प्रत्यये परतोंगसंज्ञाविधानादंगं प्रत्ययापेक्षं तत्रान्यतरस्मिन्नुपादीयमा
नेऽव्यभिचारादितराक्षेप इत्युक्तं परं त्विदं प्रकृते नोपयुक्तं चरमानुपस्थिततया शाब्देऽन्वयासंभवात् त
स्मात्कार्यकालपक्षे प्रत्ययग्रहणे यस्मात्स विहितस्तदादीत्यस्योपस्थितस्योद्देश्यसमर्पकत्वेन त
स्यैव चांगपदार्थत्वेन तद्विशेषणत्वमेतदादीनां स्वयमेव चाक्षेपपदार्थः नदतां शाब्दस्तु न संबुद्धेर्हल्वि।
शेषणत्वेपि अंगविशेषणत्वाभावात् प्रत्ययविधौ चार्थे च म्यासत्यनेन नेदृशो विषयेन तदंतविधिनिषेधा
त् इदमेव सूचयितुमंगसंज्ञासूत्रानुपन्यासः एतेन तानेत्यादौ पूर्वत्वे कृते उभयत आश्रयणेंतादिव।
त्त्वाभावेनांगसंज्ञाप्राप्तौ कार्यकालपक्षे मलोपासिद्धिरित्यपास्तं हे कतरदिति प्रकृत्यकारस्य टिलोपेना
पृक्तत्वादिति भावः नन्वंगान्तरस्याः संबुद्धेरवयवस्य हलो लोपः स्यैव व्याख्यातुमुचितम् नन्वंगात्परं ह
लुप्यते त्वं उडेश्चेदिति संबुध्याक्षिप्तस्य संबुध्यैवान्वयस्योचितत्वादत आह कृतेनीति यत्र परत्वांतरंगत्वा
त्पूर्वं रूपे कृते उभयत आश्रयणेंतादिवद्भावविरहात् अंगात्पर संबुद्धेरभावान्मलोपो न स्यादिति
भावः नच संबुद्धिसंज्ञायाः सकारमात्रनिष्ठितया ल्विधित्वेनामः संबुद्धित्वाभावे कथमस्य संबुध्यव
यवयवत्वमिति वाच्यं सुप्संज्ञाया उकारविशिष्टसत्वेन तदुपस्थाप्यस्य ज्ञायमानेकवचनसंज्ञाया।

प्रा॰ शे॰ विशिष्टरूपत्वेन संज्ञायामप्रकारविशिष्ट एव सत्त्वात् अन्यादृशस्यापि संबुद्धिसंबंधस्य ग्रहणे बाधका
त्व एतेनाऽऽदेशेनैव नपुंसकत्वाभिव्यक्तौ क्लिनीति व्यर्थमिति परास्तं एवं च लक्ष्यानुरोधादन्या
ह्लित्र स्यात्र अन्यत्रान्वय इति भावः एङ्ग्रहणं किमिति हे विष्णो इत्यादौ लोपो व्योर्वलीति सूत्रे
लोपपदस्य पूर्वं निर्देशेन कार्यांतरापेक्षया पूर्वं लोपप्रवृत्ते र्बोधितत्वेनार्थाधिकारात्तस्याह चर्या।
त्वास्यापि कार्यांतरात् पूर्वमेव प्रवृत्ते र्गुणात्पूर्वं ह्रस्वांतत्वादेव सिद्धिः न च इना सह्हिलः सेसत्त्वसं
बोधने लोपानापत्तिः एङ्ग्रहणेनैव सिद्धे प्रत्याहारग्रहणस्य लक्ष्यार्थत्वादिति भ्रमः इदमेव ध्व
नयितुं प्रत्युदाहरणांतरमाह विष्णो इति नित्यत्वादिति एवं चाकृतव्यूहपरिभाषया गुणात्पूर्व।
मपि न स्यादिति भावः एतेन गुणे कृते संनिपातपरिभाषया लोपो न स्यात् अव्ययलक्षणेन नु
न संनिपातः अप्राप्तत्वीयत्वादिति परास्तम् प्रत्याहारग्रहणस्यैवैयर्थ्यापत्तेः गुणात्संबुद्धेरिति वक्तव्ये
एङ्ग्रहणमर्थात् अत्र तत्परिभाषा अप्रवृत्तेः अत एव हे लक्ष्मि इत्यादौ लोपसिद्धिरिति दिक् अ
मावीति अन्नादावमीत्यर्थः उत्तरार्थमनुवृत्तस्यान्यग्रहणस्यापरत्वं कत्वया व्यन्वयसंभवे सर्वथात्यागे
मानाभावादिति भावः आदेशात्स्वादेः परस्येत्यनेनादेरेवेति बोध्यं पदादेरिति निर्देशात् एतादृशेषु
अचो विशेष्यमेवेति मते यथाश्रुतमेव मूलं सम्यक् तत्रावयविनश्चाधारत्वविवक्षायां वहेरा खेति
वत्वमेसीति सत्त्वमीएकः पूर्वपरयोरित्यधिकृतपरयोर्वेन विशेष्यत्वादत्रैव गृह्यते इति बोध्यं स्पष्टं

वेदं प्रत्ययलक्षणसूत्रे भाष्येण तु पूर्वसवर्णोऽप्यनुवृत्त्यैव सिद्धे पूर्वग्रहणं व्यर्थमिति चेन्न नरा-
इति वदन्ति अन्ये तु पूर्वादिभ्यो नवभ्यो वेति सूत्रस्य प्रीत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयं एवं
चाष्टाध्याय्यां त्रिसूत्रीन कार्या व्यवस्थायामित्यादि तु पाठविशेषणमेवेत्याहुः न वद्रुः अयं हि
न समासे कृते निषेधः अन्वर्थसंज्ञयैव सिद्धेः न चैकद्वार इति बहुव्रीहावुभयपदार्थप्रधाने संख्या
व्ययेति सूत्रकृते उपसर्जनत्वाभावेन तत्र सर्वनामत्वनिषेधार्थं सूत्रं समासावयवसमासांते
कृते विशिष्टस्य सर्वाद्यन्तत्वाभावात् समासान्तानामुत्तरपदावदावयवत्वं तु न सार्वत्रिकमिति
वक्ष्यते अतो बहुव्रीहिशास्त्रस्य तदर्थविग्रहवाक्ये लक्षणे चिकीर्षितपदाध्यारोपे वेहीति ध्वनि कृ
तः अत एव बहुव्रीहाविति गुरुभूतसप्तमीनिर्देशः अन्यथा न बहुव्रीहिरित्येव वदेदित्याशये
न व्याचष्टे चिकीर्षित इति प्रक्रियावाक्ये इति अलौकिकस्यार्थः न चालौकिकवाक्ये समा

सादिश्चत्वमेकार्थीभावस्यापि तत्रैवाविकल्पनात् उपसर्जनत्वादेव निषेधसिद्धिर्वाच्या अलौकिकविग्र
हवाक्ये एकार्थीभावकल्पनात् पूर्वमनिभक्तकानित्यत्रैव प्राप्तस्यावन्त्योः भावार्थं संज्ञानिषेधसू
त्रतात्पर्यात् एतेन त्वं पितायस्येति विग्रहवाक्ये प्रमाणमन्ज्ञानिषिध्यत इत्यपास्तं तस्यालौकि
वा कत्वात् प्रक्रियाकार्यं निषेधो न तु लौकिक इति कैयटविरोधात् एतदर्थके प्रक्रियावाक्ये इति
व्याख्यानं तु क्लिष्टं ननु स्तु तत्राकृतत्वमाह स चेति श्रुतिक्रान्त इति इदं च समासार्थकथनम्
मुकस्याग्निविषयीभूतेन तु एतन्मूलमलौकिकं बोध्यं तस्य प्रयोगानर्हत्वात्पर समस्य प्रयोगः
यद्वा पूर्वोक्तस्य लौकिकवाक्यस्य समासस्य दृष्टान्तत्वं यमनेनोच्यत इति न दोषः अकृतव्यू
हपरिभाषा त्वनित्यत्वान्न प्रवर्तते न त्वचेदमेव सूत्रं ज्ञापकं फलं त्वनिभक्तकानिति अन्तरङ्गो
नपि विधानेति न्यायोऽप्यकृतव्यूहपरिभाषान्तर्गत एवेति सोऽपि न प्रवर्तते लुकस्यानिभूत
प्रत्ययनिमित्तकार्यस्यैव तेन वाधाश्चेत्याहुः भाष्यकारस्त्विति अकचूचरौ तु कर्तव्यौ प्र
त्यंगं मुक्तसंज्ञायाविति भाष्योक्तेरिति भावः नचैवं स्मृतिहयप्रामाण्यापत्तिविकल्पोऽस्तु कथं
नवहुव्रीहाविन्यस्य प्रत्याख्यानमिति वाच्यं भाष्यस्यासंदिग्धत्वेन संदिग्धार्थस्य सूत्र
स्यान्यथाव्याख्यापाउचितत्वात् इतिहासपुराणाद्यैर्वेदार्थवद्वार्त्तिकभाष्यादिग्रंथैः
सूत्रार्थस्य वर्णयितुं युक्तत्वाच्च नदेत ध्वनयन्नाह यथोत्तरमिति एतेन नेदमुदासीनायाः
श्रुतेः स्मृतेर्वा वाक्यं येन प्रमाणं स्यादित्यपास्तं किंच यथाऽसूत्रकारेण स्वेडिन प्राचीन त्र

प्रा॰ शे॰ षिकाव्यानामश्रामाएवैकल्पतेनतथासत्त्वकारवचः स्वेदित्तुपवचन्नभाष्यवार्त्तिकवचनश्रामा।
एवान्नुनदंशोसत्त्वकारवचसोप्यश्रामाएवैकल्पमेवोचितं एवंचमहासंज्ञयैवसिद्धेसूत्रेव
हुव्रीहिपदमुपसर्जनोपलक्षणंतेनउपसर्जनत्वेज्ञातएवनिषेधः ननुततः श्रागप्यकृत्वव्यू
हपरिभाषयातदभावश्रुत्येनदोषनदोषानिमवकानितिरूपसिध्यर्थप्रत्याचख्याविति स्वस्य
चद्वन्निकारायकार्थकतयाप्रत्याचख्याविपिस्वर्थइतिनकश्चिद्दोषः अन्येतुच्छोः शूडितिसूत्रे
सत्तुक्कायग्रहणान्नअकृतव्यूहपरिभाषाउनित्यातद्धिप्रवृत्त्यादावंतरंगत्वाज्जनस्यलु
कः श्रवणं एवंमाभूदितिक्विपने नचसत्तुकनिर्देशोपि श्रंत्यस्यस्यात् अनर्थकेलोंत्य
स्यनिषेधात्सत्तुक्कानिर्देशसामर्थ्याच्च नचवांकादेः क्विपितुग्रहितेशादेशनिवृत्त्य
र्थसत्तुकनिर्देशइतिवाच्यं तत्रशादेशयोग्यप्रत्ययपरत्वस्यैवाभावात् अतएवतत्सू
त्रेसत्तुक्कानिर्देशमुक्त्वा अलोंत्यस्येत्याशंकासंनिपातग्रहणसामर्थ्यात्सर्वेस्यभविष्य
तीत्याशयेवंवोचकतेरप्रत्ययः वानुवांश्रोवांशइतिनसिध्यति यथालक्षणमप्रयुक्तेर
तिभाष्यंसंगच्छते अप्रयुक्तत्वेनलक्षणायमविषयइतितदर्थः राज्ञोपद्यतिसूत्रेलुत
नध्यास्वेतिनत्वनिषेधात्लिंगात्नमूर्त्तौचनरइत्यादिनिर्देशाच्चकेवलस्यैवकस्यानुवृत्तिः
एतेनककारांतरंपश्लिष्यसमाहारद्वंद्वगर्भद्वंद्वंचाश्रित्यादेशोपिप्राहयंपश्लिष्यपथा
संख्यमाश्रित्यवांचकते॰ क्विपिशादेशाभवत्येवेतिहरदत्तोक्तमपास्तं भाष्यविरोधात्।

इति वदन्ति परे तु कं संघातयतीत्यादौ कृतलुकि त्रिमित्रकादेशनिवृत्त्यै क्रियमाणं प्रवृत्ति
प्रत्ययापत्तिवचनं तदनित्यत्वज्ञापकमिति वदन्ति तन्नित्यं तत्र संतत्र सन्नियोगशिष्टपरि
भाषाप्राप्त्या तदनित्यत्वज्ञापनस्य तेनोचितत्वापि एतदनित्यत्वज्ञापने मानाभावात् नच
सन्नियोगशिष्टपरिभाषा एतदर्थमस्त्वेव मानाभावात् किंच पंचेन्द्र इत्यादौ प्रकृते च प्रत्ययल
क्षणेन प्रत्ययसत्वात् कृतव्यूहा इत्यस्याप्रवृत्तेः ननु मतेति निषेधस्तु न प्रत्यये परतो ज्ञाय।
मानपूर्वकार्य एव तत्स्वरवृत्तेः वस्तुतस्तु पुष्ययोगं जानाति पुष्येण योजयति इत्येतत्स पक
पुष्ययोगे ज्ञीति वचने भाष्यकारस्कृत प्रत्यापत्यनुवृत्तिस्तदनित्यत्वज्ञापिका वोध्या
एतेन बहुव्रीहौ सर्वनामतानां प्रियविश्वाय सूत्रमते बहुव्रीहौ न सर्वनामता भाष्यम
ते गणत्वमात्रे त्वत्कपितृको मत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनाम
त्वादनेगकार्यत्वेनाकच्प्राप्त समाभूत्कएवयथास्यात् इत्यर्थं सूत्रमिति न्यासकृन्मतमि
त्यपास्तं बहुव्रीह्यवयवानामुपसर्जनतया सर्वादिबहिर्भावेन तदंस्यतदवयवस्य चाप्राप्त्या
सूत्रमते इत्यादेरसंगतत्वात् तस्य हि बहुव्रीहेस्तदवयवानां वेति द्वैधाप्याख्यानसंभवः
अन्वर्थसंज्ञायोगेन प्रतिषेधस्य सूत्रसंमततया वचनारंभेण वार्त्तिकसंमततया च विशि
ष्टभाष्यमतेरन्यस्यासंगतत्वाच्च एतेन समासावयवयोः सर्वनामत्वादित्याद्यपास्तं स्वार्थ
विशिष्टविशिष्टान्यपदार्थवृत्तित्वेन गौणत्वात् एतेन समुदायो हि विशेषवचनतिष्ठते पूर्वप

शा॰ शे॰ दं तु सर्वार्थत्वात्तेनैतन्मेव समुदाये एकार्थीभावांगीकारे एतत्समुदायस्य क्वापि नावयवार्थोपसर्जन
त्वेपि अवयवस्य तत्त्वे मानाभावादित्यपास्तं समुदायस्य प्रत्येकानतिरिक्तत्वात् अत एवा अवयवाना
नेकस्तु वनस्यान्यपदार्थवृत्तित्वाद्बहुव्रीहिः संगच्छते अवयवार्थस्याप्यन्यपदार्थविशे मपि तत्वाव
षणतयैवोपस्थित्योपसर्जनत्वात् तेनस्त्र इतरार्थाविशेषणत्वानोपस्थितिविषयत्वस्यैवोप रूपकत्वात्
सर्जनपदार्थत्वात् अन्यपदार्थैकार्थीभूतेनेति वृत्त्या तात्पर्यविवक्षायाः कर्तुमशक्यत्वेन
समासस्य केनेवाचः प्रादयभावात् किंचैवं तुल्यरीत्योत्तरपदस्यापि सर्वार्थत्वात्तेनापायेन सर्व
नामत्वादस्ति सर्वायेत्यत्र स्मायादेशो दृश्येद्दिशोर्वा रः सर्वनामसंज्ञायां तदंतग्रहणात् न चोत्त
ग्राह रपदे एकलक्षणापूर्वपदं तात्पर्यकमिति मते पूर्वपदे सर्वार्थवाचकत्वमस्ति नोत्तरपदे इ
तिनायं दोष इति वाच्यं तन्मते पूर्वपदं निरर्थकं स्वार्थे प्रतिपादकं वा नाद्यः नैरर्थक्येन सर्वा
र्थवाचकत्वाभावादेवाप्राप्तेः नांत्यः पूर्वपदे विशेषणान्वयापत्तेः पूर्वपदं तात्पर्यग्राहक
मित्युक्तेः संगततात्पर्येश्च जहत्स्वार्थायां वृत्तौ तदसंभवेनेष्टापत्तिः कर्तुमशक्या विनि
गमनाविरहेण पदद्वयेपि लक्षणायायुक्तत्वाच्चेति समासवादे मंजूषायां विस्तरेण प्रति
पादितं एकार्थीभावभावादिभिस्तस्याव्यक्तुमयोग्यत्वाच्च एवं च न तत्र घटकावयवानाम
पि सर्वनामत्वाभाव एवोचितः अनयैव दिशान्येपि तदीयात्वामाख्या निराकार्याः एते
नवयवानां समुदायार्थप्रत्युपसर्जनत्वेन समुदायनिष्ठसंज्ञायामनिमित्तत्वेपि अवयवा

नां स्वार्थमात्रप्रधानत्वेन स्वार्थं प्रत्यनुपसर्जनतया तन्मात्रनिष्ठासंज्ञाभवत्येव इति।
सर्वादयेत्यत्र तु सर्वनाम्नो पाठ्यविधानेनावयवस्य सत्यपि सर्वनामत्वे दोषाभावः इ.नि
रूपितांगस्या सर्वनामत्वात्. इदमेव ध्वनयितुमनंगकार्यत्वादित्युक्तमित्यपास्तं इ
दृष्टार्थस्य संज्ञाप्रवृत्तावनिमित्तत्वात्. न चार्थान्तरसंक्रमात्[illegible] प्रवृत्तासंज्ञा ऽर्थान्त
रोपक्रमे सति गताश्वनानानि सर्वादये त्यादौ दोषः अति सर्वपाठे समायाद्यर्थे पुनः
संज्ञा तु दुर्लभा संज्ञोपसर्जनानां तन्निषेधात्. पाठान्यथे दोसेन तदंतग्रहणे नापि न।
संज्ञा अर्थान्तरसंक्रमात्पूर्वमनुसमभावस्य नैवप्रवृत्तिः अकच् प्रवृत्तिस्तु तन्त्रागस्त्ये
वेति तन्निवृत्तये ऽक्षतव्यूह परिभाषाऽनित्यत्वबोधनद्वारा इदं सत्त्वं सार्थमित्या
शय इति वाच्यं अनंगकार्यत्वेनेति हेतूपन्यासवैयर्थ्यापत्तेः तस्यहि पूर्वापरन्या
सग्रंथपर्यालोचनया गसंज्ञानपेक्षत्वेनेत्यर्थो लभ्यते स्तेप्रभृतीनां मंगकार्यत्वात्
विष्वादिशब्दानामनंगत्वादित्यादिर्हि न्यासग्रंथो मनोरमायां इ एव्वः एतेनांगं प्रधानं बाध्यं न
ह हि रूप्यमनंगं बाधकं एवं च कथमन्यथा यथा दन्त्वादकज्जित्यनंगकार्यत्वेनेत्यस्यार्थ इत्यपास्त
मिति दिक्. तदनुगुणानामिति पाठान्तरं सर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवत्वे
न बोधकमहासंज्ञया सर्वार्थोपस्थापकसर्वादीनामनुकरणावरूपकत्वेनेतरेषामनुकर
णमानाभावः तत्र संज्ञाया तत्त्वाभावः स्पष्ट एव उपसर्जनस्यापि तद्वाचकत्वं नामपर्यायस्य

र

प्रा॰शे॰ तत्प्राधान्येन तद्रूपस्थापकत्वस्यैव लाभात् उपसर्जनं हीनं तद्विशेषणं तेनैव स्वार्थोपस्थाप
कं विशेषणं न यावत्स्थितं तस्याप्यर्थस्य महासंज्ञाकरणैर्ह्यतोऽपृथग्ग्रहणादानादितराननुपसर्जनी
भूतप्रसिद्धप्रवृत्तिनिमित्तकार्थबोधकानामनुकरणेच स्वरूपकत्वेनेतरेषामनुकरणेमानाभा
वेन तेषामेव गणेनुकरणादित्यर्थः अत्र च प्रमाणं पाठात्पर्युदासः संज्ञोपसर्जनेनेव विशेषव
न्निष्टेतरस्यादिभाष्यमेव विशेषस्योपसर्जनेनोच्छ्वविशेषणेऽप्रधानेरित्यर्थः अत एव भूत
पूर्वेष्वाढ्यः आढ्यपूर्वे इत्यत्रापि पूर्वत्वस्याढ्यविशेषणत्वेनोपसर्जनत्वात् स्पष्टं चेदं तद्बहु
व्रीहाविति सूत्रे भाष्यकैयटयोः सर्वादिसूत्रस्यायमर्थः सर्वादीनि तदन्तानि च सर्वार्थवा
समानाधिकरण चकत्वविशिष्टसर्वनामपदवन्तीत्यर्थः वैशिष्ट्यं च सर्वाद्यंशे सामानाधिकरण्येन तदं
तांशेस्वाश्रयघटितत्वरूपसंबन्धेन ननु यत्रापि सामानाधिकरण्येन तत्र प्रज्ञाप्राज्ञवि
वेकन्यायेन सर्वनामपदवत्त्वांशेऽव्यवधिः सर्वार्थवाचकत्वस्य लोकतः सिद्धत्वात् पा
ठान्तरं सर्वार्थवाचकत्वं च प्राधान्येन बुद्धिस्थत्वाद्यननुगतीकृतानेकधर्मवत्त्वबोधकत्वं दि
ग्देशकालाद्यनेकबोधकत्वात्पूर्वादिष्वपीदमक्षतमेव सर्वाद्यंते त्ववयवनिष्ठसर्वार्थ
वाचकत्वस्य समुदायेऽप्यारोपेण तत्सिद्धिस्तत्फलं तु यपरमभवकानित्यादिसिद्धिः अतिस
र्वायेत्यादौ त्ववयवस्योक्तसर्वार्थवाचकत्वाभावात्समुदायेतदारोपइति न दोषः येषां तु
क्तसर्वार्थवाचकत्वासंभवस्तेषामपि तादृशसर्वादिसाहचर्यात्संज्ञोपसर्जनभिन्नानाम

वानुकरणमिति न दोषः एतेनान्वर्थसंज्ञात्वेन सर्वार्थवाचकत्वस्य विशेषणतया सर्वादीनी
त्यस्य नहि विशेषणत्वात् तदंतविधिरित्यपास्तं एकपदोपस्थाप्ययोरर्थयोः परस्परमुद्देश्यविधे
यभावेनान्वयस्यायुक्तत्वात् प्रदेशे एतच्छब्दोपस्थितसर्वार्थवाचकत्वं प्रयोगार्थो विशे
षणीभूतसर्वाद्यंशस्यैवान्वेति सुतिष्ठवहूद्वेचेति सार्थकं एतेन सर्वाद्यंतस्य वर्णाश्रमेतराणा
मित्यादौ सर्वार्थवाचकत्वाभावादेवाप्राप्तौ द्वंद्वे चेत्यादीनां वैयर्थ्यमित्यपास्तं सन्निवेशादिति
तदनुमानादित्यर्थः अत्र हेतुं महासंज्ञाकरणेनेति महासंज्ञाफलेनान्वर्थत्वानुमानेऽति
रिक्तार्थानुकरणमानाभावादिति भावः अत्रोपसर्जनपदेन कृत्रिममकृत्रिमं च गृह्यते महा
संज्ञामात्रित्य भाष्ये वार्त्तिकप्रत्याख्यानात् अत एव तत्पुरुषे तत्समासस्य पूर्वपदार्थप्राधान्ये
ऽसत्त्वाद्यत्वसत्त्वयोरनापत्तिराकरेऽक्तासंगच्छते एतेन दोषः सावितिसरेऽतत्त्वयो
रिति नव तत्त्वे एवं वक्ष्यामि न दोषः सोऽततत्सुटसः सुटसच्छदकारस्य सो भवतीति इदमिदा
नीं किमर्थं नियमार्थमदस एवदकारस्य नान्यस्य दकारस्येति यदि नियमः क्रियते हीपते
त्वन्त्ययं इति शास्त्रोतीति स्वरितिचेष्यते यथालक्षणमप्रयुक्ते इति भाष्यात् कृत्रिमोपसर्जनए
वनिषेधः अन्यथा सिद्धांते प्युपसर्जनत्वादत्वसत्त्वयोरप्राप्तौ ऽऽष्यत इन्मुक्तिरसंगतेवस्यादि
तिपराकत्वमूस्त्रार्थप्रतिपिपादयिषया प्रकृते न पूर्वभाष्ये लासेप्तकदेशपक्तित्ववोधनात्
सर्वनामसंज्ञासूत्रादावतिसर्वापातितद्दित्याद्युदाहरणपरिभाष्यत्व संज्ञाकार्यमिति
सर्वनामत्वप्रयुक्तं स्मायादिकमित्यर्थः अंतरंगाणीति अड्डडतरादिभ्यः त्यदादीनामः त

श्रा॰ शे॰ दोसः सावित्यादिमित्यर्थः अतिसर्वायेति न च सर्वनामसंज्ञाविषये ऽकच् तत्र ह्युह परिभाषा
५ यामर्थवत्त्वेनैः सर्वमुक्तत्वात् अत्रापि पूर्वं सर्वशब्दे सर्वनामसंज्ञायाः प्रवृत्तेस्तदन्तविधिनास्मा
145 यादिकं दुर्वारमिति वाच्यं सर्वनाम्नो विहितस्येति विहितविशेषणाश्रयणात् समुदाय
स्य तु न सर्वनामत्वं अनुपसर्जनसर्वार्थवाचकत्वाभावात् एवं च कार्याभावादपि न पू
र्वं संज्ञायाः प्रवृत्तिरित्याहुः तृतीयासमासे अर्थमपि सर्वार्थं तत्तृतीयासमासस्यैव निषे
धेनावयवानां सर्वादित्वाक्तेः ननु तृतीययेत्येव सूत्रमस्तु पूर्वोक्तसाहचर्यात् स
मास एव ग्रहीष्यते एकदेशानुवृत्त्यादिकसमासस्य स्पष्टत्वं समासग्रहणमनुवर्त्यैवा एवं च स
मासे इति व्यर्थमिति चेत्सत्यम् समासे इति योगविभागार्थत्वात् तत्र च सामर्थ्यात्समासार्थं
कं वाक्यं गृह्यते न त्वनालौकिकं अदन्तकाकचोरविशेषणात् समासस्वरेणापि ह्रस्वस्य वा
धाश्च हलन्तेनेतत्सूत्रप्रवृत्तिरित्यनुपदमेव व्यक्तत्वात्याभिप्रेत्याह तृतीयासमासार्थे
ति तृतीयासमासार्थात्र पूर्वसदृशेति पूर्वघटितवाक्यविहित एव गृह्यते यस्य नाम सर्व दन्तत्वमा दाय
संज्ञाप्राप्तिस्तमुद्दार्यविहितत्वेन तृतीयापदमुद्दार्यं च विहितत्वेन प्रतिपदोक्तत्वात्
वाक्यमपि तत्संबन्ध्येव प्रत्यासत्तिन्यायात् धनितं चेदमत्र भाष्ये तत्करोतीति द्वारा साम
र्थ्ये मासेन कृतः पूर्वो मासपूर्वस्तस्मै मासपूर्वस्मै इति समासे तत्संबन्धिनि मासकृता
य पूर्वस्मै इति वाक्ये च निषेधात् पूर्वसदृशेत्यनुसूत्रं तत्र हेत्वादि तृतीयायां परस्परान्वये

र्थीरितार्थ्येन करोतिनिहारके सामर्थ्येन प्रवर्त्तते तृतीयान्तन्तु तेनित्युक्तं तन्नग्रहणे सर्वसमर्थान
करोतिनिहारसामर्थ्यप्रवर्त्तनं इतिसमासेनित्यपि व्यासः सर्वके एसर्वस्यापि न यस्य
सर्वनामसंज्ञानमुख्यार्थो विहितत्वात् समासस्यैवानेन निषेधेनास्य च समासस्य सर्वार्थ
तत्वाकभावेन नञ्समासाभावाच्च तदर्थवाक्येपि न प्रत्यासत्त्यात्र समासे निषेधस्तदर्थे
वाक्य एव प्रवृत्त्यंगीकारात् एतेनकर्त्तृकरणे इति समासे तृयकात्कृतमित्यत्र नेतिप्रतिप
दोक्त समासग्रहणफलं वदंतः परास्ताः नचपूर्वैः समासग्रहणमेवस्तु समस्तेति वाच्यं मा
सावयायेत्यादौ निषेधानापत्तेर्नत्वद्यवरस्योपसंख्यानमिति प्रतिपदोक्तः समासइति दि
क् द्वंद्वे अयं निषेधइतरेतरयोग एव नसमाहारे तत्र समाहारस्य विशेष्यत्वेनोपसर्ज्जन
त्वादेवाप्राप्तेः अतएव तत्क्षतिविग्रहे वृत्तेन रमित्यादावदन्तेत्याहुः समुदायस्येति अत्र
पदकृत्यं तत्सर्वादिरिपुत्रवाक्तं सनत्कुमारमिति वर्णाश्रमेतराणामित्यादावपीतिभावः न
चनिषेधसामर्थ्यं अनंगत्वं तत्सिलादिष्वादृत्याचारितार्थ्यात् तत्साधारमिति तत्सइत्ते
सिलस्मिन्नित्यर्थे सौत्रः सप्तम्यालुक्रूइत्यर्थे इतिभावः तद्वातसीत्याधारसप्तमीप्रत्य
उप पिष्टीभावेन तत्सपदत्वं तस्याप्यैचारिकमाधारत्वमितिभावः नाकज्ञिति समुदायनिष
कृत्त्वाबाधकाकज्ञित्यर्थः अवयवस्य तु सर्वनामत्वेप्यकार्थीभूतस्य कुत्सादिभिर्निष्कृष्य
संबंधो वक्तुमशक्य इतिभावः यदा तु वर्णाश्रमश्चेतरकश्चेति द्वंद्वः क्रियते तदावर्णा

शा० शे० 146

श्रमेन रक्ता इति भवत्येव प्रथम अच्छस्त्रेणेति न संबध्यते प्रथमादिषु शास्त्राभावात् नेम प्राक्ति नि
न्यत्रात्रेतनेषु शास्त्रेऽप्यत्र विभाषेयमुक्तसीत्यर्थाधिकारात्तमाधरे शीभावे एवायं विकल्प इ
त्याशयेनाह जस इत्यादि कार्यं प्राप्नोति न प्रत्ययलक्षणेति संख्यायाश्च यवेन प्रविशति नदं नाइति प्रत्यत्रेहेतुः
प्रागुक्त एव द्वितीयत्वे तीयशाद्वा है स्तीय इत्ये संप्रसारणं चेति साधु द्वंद्वे च वार्त्तिकमन्यत्र त्यर्थांते
न प्रवर्तते तीयश्च हस्वलात लौकत्वात् तेन द्वितीयायाय भागा येऽन्ये बाधादात्तस्य अनभावेत
सम्भवत्येव अयं विकल्पः विभाषा जसीति साहचर्यात्तत्रैवोपसंख्यानत्वात्तुदि त्यत्र त्यपकार्थ
एव नत्वकचीत्याह जराया अश्च प्रत्ययाश्च इत्यत्रोविभक्तावित्यनुवृत्तेस्तस्याचिर श्रुतेश्च तो
नुवृत्तेनाचीत्यनने विशेषणात्तदादि विधिरित्याशयेनाह अजादाविति तेन जराभ्यां जरा
यार इदं जारमित्यादौ न नचजरसा वित्यादौ जरसादेशा प्रसंगः विभक्तेरजूपत्वेनाजादि
त्वाभावादित्वाभावादिति वाच्यं येन विधिरित्यत्र तदहि तमिति वर्तते तेनच बहुत्वा विपरिणाम
ने एवं चन तदपवाद अनादायां यस्मिन्विधिरित्यस्यां न त्व अत्र पठितायां तदन्तवत्त्वेव सिद्धेः व्य
पदेशिवद्भावेन सिद्धेश्च एवं चाद्यन्तवत्त्वं न कार्यं इदमेव ध्वनयितुमिह तदनुपन्यासः
न च जराया अस्तु इडे वास्तु किमनेन जरसादेशविधानेनेति वाच्यं जराशब्दान्तत्तरोतीति
रायं तावदृललोप च किपि णिलोपे एकदेशविकृतन्यायेन जराशब्दत्वाद्दोषापत्ते णिलोपस्य
स्थानिवत्वेन न टिलोपत्वमिति निषेधात् अत्र चासस्याश्रयत्वेऽभिव्यक्तपदार्थाये इत्यसा

नाश्च यणो ञ्जरस्मादेशकरणमेव प्रमाणं स्यादुः इति पञ्जिलाघवानुरोधेनार्थमात्रा ला
घवेनाभिमितिनिर्देशः कृतः तेन न्यायपदांगाधिकार इति पदमंगाधिकारे विशेषणं विशेषणेन च तदंतवि
धिरिति भावः अत्र च सूत्रे समासग्रहणं ज्ञापकम् येन विधिरित्यस्यायं प्रपञ्च इति येन वि
८ धिरित्यत्रैव भाष्ये स्पष्टं अतैव न तदुत्तरपदस्यापि पाठेऽपि तदुत्तरपदशब्दो न रूढः किंतु योगिकः
तेन परमातिमहान्नुवकुञ्जरसाधित्वादि सिद्धिरित्याहुः अत्र पदशब्देनोत्तरपदाधिकारो
गृह्यते तत्रैव भाष्ये उदाहरणादिति कैयटः केवलपदाधिकारोपीत्यन्ये तदमपि न सूत्र शो
भाष्येऽध्वनितत्वे पठेन च स्पष्टमुक्तं न न्यूनत्वेकाल्प्लाद्युपसर्गविशिष्टस्य ञ्जरसादेशास्या
दिति तस्याह निर्दिश्यमानस्येति षष्ठीस्थानेयोगेति सूत्रमावर्त्तते द्वितीयस्यायमर्थः षष्ठ्यं
तमुच्चार्यमाणमेव स्थानेन युज्यते न प्रतीयमानमिति नेदं सिद्धमिति भावः न च येन विधि ते
रिति शास्त्रबलात्तदंतस्य चतुष्पात्पस्थिन तत्वेपि तद्रारूपांगस्य स्थानेऽस्य न्यर्थमुपजीव्यैव त
स्य प्रवृत्त्या तदविरोधेनाव्यवहारानिर्ज्जरादीनां स्थानित्वकल्पनेनापि तदुपपत्त्याऽधिक
स्य स्थानित्वे मानाभावश्चेति न्यायसिद्धमिदमिति वाच्यं एवं स्त्रियामतिन्याटोऽत्तंता
स्याति पदिकादित्यर्थमुपजीव्यैव पाञ्जेनादित्यर्थस्य प्रवृत्त्यानत्राप्यव्यवहारवत्तं +
तां तस्य प्रकृतित्वापत्त्यो ए तंत स्यापि प्रकृतित्वात् व्यवच्छेशीत्यस्यापाव्यापत्तेः न त्वयं
ञ्जरशब्दो न ञ्जराशब्दो तस्याह एकदेशेति अनन्तर्याद्याशिति किंत्वपूर्वके शकृनिश्चत्व वत +

५०

147

स्था॰ प्रो॰ क्विन्नेकदेशोक्तेस्वकत्ववत्व अत्रापि जराशब्दत्वमितिभावः स्थानिवत्सूत्रं नु यत्रा
र्धे विकृतं न तो ऽप्यधिकं संपूर्णो वा न तत्र जातिव्यंजकम् यावयवदर्शनाभावेन नत्वाषत्री ता
वाचोपेण कार्यसिद्ध्यर्थं विकृतावयवत्वप्रतीत्यर्थं च एकदेशमकृत्य न चिन्नु मननस्य वृत्वार्दिव ति
निघटितेनोक्तं वतियटिनपादेपि ष्वन्यावन्नेत्यर्थः तस्मादप्रनिषेधेन तत्वस्तवर्थानिद्ध
इति वाच्यं ननु एकदेशविकृतन्यायेन जराशब्दत्वे विजरशब्दस्य निर्दिश्यमानत्वाभावात्
र्थमादेशा इति चेन्न स्थानिवत्सूत्रेणैव कार्यप्रवृत्त्या निर्दिश्यमानस्येति परिभाषाबाधाभावात्
येन विधिस्तदंतस्येत्यस्य तु संज्ञासूत्रत्वात् सूत्रस्य जराशब्दो जराशब्दांतयोरपीत्यर्थपू
र्व एवं च तदंते ऽप्यादेशप्रवृत्तौ परिभाषाविरोधः स्पष्ट एव श्रूयमाणवर्णातिरिक्तवर्णा।
स्थानित्वबोधकशास्त्रसहकृतलक्ष्यसंस्कारकवाक्यो स्थानित्वेन बोधितस्य श्रूयमाणा
तिरिक्तवर्णस्यादेशेन निवृत्त्यभावप्रसक्त्यर्थस्य तेन बोधनात् अत एव यदागमा इति बोध
नवर्णस्याप्यादेशेन निवृत्त्यभावः एतन्न्यायबलात् अत एव पचेपुरित्यादौ न पररूपं अत्र
त एव कृष्णमल्पम् इति येऽकृदिह्रीत्यादो निर्दिश्यमानस्येति परिभाषया भाष्यकारैर्निवारणे
कृते न च स्थानिगमवधायकमिति न्यायेन इकाररहितहेरादेशात् उर्वारः तन्मायेमाना
भावात् आगमविशिष्टस्य तद्ग्रहणेन ग्रहस्येव तद्धीनत्वाच्च नचास्य त्वाविनादोदीर्घ।

अदीनां

दीनामादेशानापत्तिः तेषां निर्दिश्यमानत्वाभावात् उक्तनियाच्यं ज्ञानिपत्ते दोषाभावात्
न च स्त्रियोरिति निषेधेन गृह्णके शास्त्र गृहीतानां निर्दिश्यमानकार्यबोधनात्त्र दोषः
किं च रीङृतः रुत्वादौ रीङ्त्वकरणेन अस्याप्यनित्यतया कचित्तत्र णेर्गृहणेऽप्रवृत्तेस्तत्र
वगम्यते शास्त्रान्तस्य चिगम्नीय तरुत्वादौ विकारादेशासिद्धिः एतेन गुणगमेन षण्णां तु प्रसिद्धौ
विकारादेशविधानं व्यर्थमित्यपास्तं अत एव परनेकाचरन्ति पण्डीयांते प्रध्यावुक्त्वा वित्वादा
वपिसिध्यति यण्नुज्ञिस्त्वतुः चिकानुरित्यादौ चरितार्थः अत एव हृयवरट् सूत्रे ऽयोगव
हानामुपदेशो लोंपविधिः प्रयोजनं च तत्सूत्रे नेत्तदस्ति प्रयोजनं निर्दिश्यमानस्यैव
सिद्धमित्युक्तं संगच्छते अनयासह स्वस्थानिमित्तसंनिधापि तानां अलोन्त्यस्य त्यादीनां
समावेश एव न बाध्यकभावः विरोधाभावात् नाप्यङ्गाङ्गिभावः उभयोरपि परार्थ
त्वेन तदयोगात् यत्वादेः परस्यालोन्त्यस्येत्यतावेतद्बाधकाविति तत्र उदस्यान्तसूत्रे भा
ष्यकारैरस्याः संचारितत्वात् बाधकत्वे मानाभावाच्च निर्दिष्टस्य तदवयवस्य चानिर्दि
ष्टावयवयोः निर्दिष्टावयवयोर्वेत्याकांक्षासत्त्वेन समावेशस्यैवोचितत्वाच्च भाष्ये तयोरि
यं बाधिका एतयोर्निर्विषयत्वप्रसंगादिति विंशतीतिसूत्रे कैयटः उपचावयवप
ष्ठीविषयेपि प्रवृत्तेः अत एव तदोः सः सावितिसत्वमपि स्यदन्यत्रोपसंगतकारस्य नेति
स्पष्टं पोदः पूर्वदिति सूत्रे भाष्ये अनेकाल्सूत्रे सर्वस्येति तत्परिभाषाबाधित एव गृह्यते अ
विरोधे समभवति विरोधस्यान्याय्यत्वात् रतिदिक एतेनैतित्वरसादेशाभाव एवेतरत्स्यर्थः
त्रिचतुर्युष्मदस्म त्यदादिविकारेषु च प्रयोजनमिति वार्त्तिके

पूर्वविप्रतिषेधेनेति विप्रतिषेधेपरमित्यत्र परशब्दस्य इष्टवाचित्वादिति भावः नेत्याशिषीति
प्रसिद्धत्वे ऐत्त्वकरणं संनिपातपरिभाषाऽनित्यत्वे मूलमिति तद्भावः एवमिनात्रोरिका
रदीर्घोच्चारणमपि बोध्यं तदनुस्वारिमिरिति एकसूत्रोपात्तत्वात्पूर्वविप्रतिषेधवाक्ये स्यादे
शोपि गृहीतस्तु चितइति तद्भावः निर्जरस्येत्येवेति पूर्वविप्रतिषेधेन स्यादेशोऽस्त्वादित्वा
ज्जरसादेशाभाव इति भावः भाष्येतिनेत्याच पक्षेनस्तत्र एव भगवान्भाष्यकारः अनिज
रे इति मविनक्यं सनिपातपरिभाषयेति पूर्वविप्रतिषेधस्य निर्मूलत्वाच्च एसे सोरुच्चारणे
लाघवाभावात् नचैरित्याद्यर्थवत्त्वं ऊढसीत्यत्रैव सम्भावनापकत्वाच्च नन्विनादेशो र
कारोच्चारणमेव मूलं अन्यथानादेशं विधायपश्चाड्डि-चायरस्पर्धे ङि-चेतियोगविभागे
नातरस्य नुट्स्येत्वविधानेनैव सिद्धो किंतेन अनेनेत्यादिनुअनाप्यकइतिनकारश्लेषे
णनकारे परतोपिश्रुत्विधानाद्धलिलोपरस्य बाधेन सिद्धं तत्रेवच अ इतिनांतस्य नपुंसक
निर्देशइतिचेन्न नापरत्वाल्लादेशात्पूर्वमेत्वापत्तेर्नादेशविधायकस्यवैयर्थ्यापत्तेः तत्सा
मर्थ्यात्पूर्वविप्रतिषेधाश्रयणेविपरीतंगौरवं भाष्ये इकारस्य प्रत्याख्यानाच्च प्रत्याख्याने
नेनचेदमेव धर्मा ने इकारस्य फलांतरकल्पनेनाभिनिवेष्टव्यं किंत्वेनन्नत्क्लेशपरिहारार्थं
एवेकार इति आदेशोऽनु आदिरिति केद एव सूत्रतात्पर्यं भाष्यानुरोधात् वृत्तिकारास्तु परह
णवारणाय सामर्थ्यानुसरणक्लेशमसहमाना आदिरिति छेदमाहुः एतेनाप्येनाप्येस

आख्यानवृत्तिरिति क्रमेण विभक्त्यादेशो नाटादिभ्यः परत्वाज्जरसित्यसंगतं पाठान्तरं
त्वादेशानामंतरंगत्वात् अधिकविभक्तित्वमात्रसापेक्षत्वेन जरसादेशस्य बहिरंग
त्वात् इनादीनां प्रत्ययविशेषापेक्षत्वमित्यपि अस्य प्रवृत्तिनिविशेषापेक्षत्वेन समस्तवै-
स्थानिकत्वेन जरसोऽन्तरंगत्वान्नित्यत्वमित्यपि न पूर्वनिमित्तकत्वेनादेशानामपि तत्त्वा
त् इत्थं च जरसादेशस्य विभक्तिसंज्ञासापेक्षत्वेन बहिरंगत्वे इनादीनां च तन्निरपेक्षत्वे
नान्तरंगत्वात् न चेनादीनां प्रत्ययविशेषापेक्षत्वेन बहिरंगत्वं विशेषापेक्षं बहिरंग
मिति वचनं किं तु विशेषधर्मापेक्षया सामान्यधर्मस्य प्रथमोपस्थितत्वेन तन्निमित्तक
स्य पूर्वं प्रवृत्तिरिति हि तद्बीजं तन्निमित्तसमुदायापेक्षयाधिकविशेषधर्मनिमित्तकत्वं वा
एवं च यद्विशेषधर्मस्य सामान्यधर्मज्ञानं विना न ज्ञानं तादृशविशेषापेक्षस्यास्तु बा-
हिरंगत्वं यथा कृष्णश्रि पचम्परलीटो वेत्ति न सार्वधातुकत्वज्ञानं धातुविहितप्रत्ययत्वज्ञानज्ञा नम
नसापेक्षमिति पूर्वं तज्ज्ञानमावश्यकमिति यासुटः सार्वधातुकज्ञाननिरपेक्षतमाप्रव
त्यान्तरंगत्वं युक्तं न चैवं प्रकृते विभक्तित्वज्ञानोत्तरप्रवृत्तिकजरसः प्रागेव टा इत्याद्याकार
कस्वरूपज्ञानमात्रापेक्षेनादीनां प्रवृत्तेः तेषामेवान्तरंगत्वात् एतेन पूर्वं पूर्वमन्तरंगमि
ति सर्वतो जरसादेशोऽन्तरंग इत्यपास्तं युगपत्प्राप्तावेव तदन्तरंगत्वप्रवृत्तेः अत एव ज
रायाइति सूत्रेऽजरां सीमित्यत्र जरसोऽविप्रतिषेधेन जरसि निभाष्योक्तं संगच्छते अन्यथा

१५९

शा॰ शो॰ 149 त्वद्रीत्या शिभावात्पूर्वमेव जरसः प्रवृत्तौ तदा च सर्वनामस्थानत्वान्नुमा विप्रतिषेधविचारा
संगतिः स्पष्टैव ममत्वं तु रंगत्वाज्जरसः पूर्वं शिभावे प्रवृत्ते नुमा विप्रतिषेधविचारस्य
नासंगतिः न च शि सर्वनामस्थानमित्यत्र शिपदस्य लक्षणया शिस्थानपरत्वेन जश्श
सोरेव सर्वनामस्थानत्वमिति तज्ज्ञाप्याप्रायः लक्षणायां मानाभावात् मुख्यार्थबाधा
भावाच्च अत एव टाङसीति सूत्रे कैयटेनोक्तं भाष्यकारस्तु संनिपातपरिभाषया जरसादे
शमनभ्युपयन् अतिजरेणातिजरादिति भाष्यं नत्वतिजरसिनातिजरसादितीति म
त्वा गौरवमुद्भावितवानिति भवद्रीत्या पूर्वं जरसादेशे कृते अश्वाशप्राप्त्या तद्भाव पदे च तस्या
प्राप्त्या संनिपातपरिभाषयानभ्युपयन्निति संगतिः स्पष्टैव न च जरसादेशस्य वहिरं
गतयाऽसिद्धत्वेन तद्विषये कथं संनिपातपरिभाषाप्रवृत्तिः असिद्धस्यापि तद्विघातक
स्यानया निवृत्तिरित्यर्थे स्पष्टत्वेनैतत्सूत्रभाष्यसंमतिपूर्वकमग्रे तु प्रत्युपपादयिष्य
माणत्वात् एवं च टाङसिङसामस्तु विभक्तिनिमित्तकार्ये कृते जरस भवत्येव
क्वचित्संनिपातपरिभाषाविरोधात् क्वचिदजादित्वविघातात् एवं जराशब्दे स्त्रीलिंगे
औङ ङसिङसां पुङिषु नञोपः पाऽपः ह्रस्वनद्याप इत्येतेषु कृतेषु क्वचित्संनिपातप
रिभाषाविरोधात् क्वचिदजादित्वविघातात् टौसोस्त्वाङि चापर इत्येतेषु कृतेषु विसर्गा
निवृत्तेन भवत्येव जरसः नपुंसके निर्जरे पादे अजसः शसः औसः निवृत्ते जरसः नाम्

त्र यद्यपि टाङसिङसाम्न्यद्बुह्लिंगवन्तु सोरमि च संनिपातपरिभाषया तदभावेपि द्वितीयेक
वचनेन तदभावेन मानेन न्यापितस्याप्यंतरंगत्वात् तोमिम मिसंनिपातपरिभाषया तदप्राप्तिः न चा
तत्र नकारांतसंनिपातकृतमेवाजादित्वं किंतु तदभावेपि संनिपातपरिभाषा तु संनिपात
लक्षणविधिं विना न यस्य प्रवृत्तियोग्यता तत्रैवेति भवत्येवात्र जरसित्ति युक्तमानाभावात् ड
ङसोर्लिस्त्रस्यात् इति जरे एतेषु उपमिति प्रागुक्तो घटविधानं एतेन परत्वान्नित्यत्वाद्वाम्भा
वं बाधित्वाज्जरसि लिपराक्तं अत एव जरा या घोरत्ति सूत्रे स्पष्टमेवेतत्संगृहीतं मतिजरमतिजरेरि
ति प्रथमाद्वितीया सा धारणेनेवोक्तं तस्मादयं त्वंगसंतानपक्षत्वे नौड्स्याप इत्यादि प्रवृ
त्तेः प्रागेव भवंति तेषु कृतेषु स्यानिवद्भावेनावंतत्वमादाय प्राप्ता अपि ते विधाय आकार प्रश्ले
षात्त्रभवंतीति कर्कौमुघामेवेस्त्रीलिंगस्पष्टं न चैवं निस्यणामित्यादावंतरंगत्वात्त्रपादेप्रा
पत्तिः स्वरदेप्राप्यविभक्तिनिमित्तकत्वेन वहिरंगत्वादिति वाच्यं नुमनुटोः पूर्वविप्रतिपरत्वा
त्रिके नेरशांतरंगत्वस्य क्वचिदनाश्रयणपूर्वकं प्रतिषेधे पारमित्यस्य प्रवृत्तेज्ञापनेनात्वदो
षात् इति मात्सर्यमुत्सार्य सुधियो विभावयंत्विति प्राहुः पदन्नो अत्र रैप्रास प्रभृतयो निमि
त्ततयोपात्तास्ते पदादयः प्रस्त्वार्थबोधनसमर्थानुस्वसदृशावर्णवंतश्च स्यानिनस्थानं
तीत्याह पादन्नेति एवं चास्मिन्नस्थानिनावेव प्रास प्रभृतिषु इति विशेषणमिति भावः अ
नुदात्तस्य च ईपधस्येत्यतोन्यतरस्यामित्यनुवर्तते तरस्या प्रायेनाह प्रासादौ वेति यद्यपि

शा·शे· वाग्रहणं नानुवर्त्तते लोके शासापादादीनां प्रयोगोऽसाधुरेव अत एव ये च तद्धित इति सूत्रस्य
वा केशौचिति वार्त्तिके वाग्रहणं चरितार्थं मंडूकानुवृत्तौ मानवाभावाद्भाष्येनुक्तत्वाच्च छंदा-
सि सर्वे विधीनां वैकल्पिकत्वेन वेदे पादादीन्साधयता कैयटेन हरिणा च तदनुवृत्त्यभावस्ये
व ध्वनितत्वादिति विवहवस्तथापि न्यासस्य सूत्रादिभाष्येऽस्य पादेनोपहतं मात्येन पू-
र्ण्येत्यादि प्रयोगदर्शनेन हृदयस्य प्रियं इत्यादि सोऽत्र प्रयोगेण चास्य वैकल्पिकत्वमावश्य-
कं कैयटादयस्त्विंत्याप्युत्तवार्त्तिके वाग्रहणंत्व अस्यव्यवस्थितविभाषात्वबोधकमिति भा-
वः ननु अत्र छंदसीत्यनुवर्त्तत इति प्राचः तत्कथमस्यात्रोपन्यास इति चेत् अत्राहुः छं-
दसीति नानुवर्त्तते भाष्येनुक्तः ये च तद्धित इति सूत्रे छंदस्य तद्धिते त्वादौ शीर्षभावो व
क्तव्य इत्यत्र छंदोग्रहणेन शीर्षन् छंदसीत्यत्र छंदसीत्यस्य स्वरितत्वाभावबोधनात्तु
अत एव मासश्छंदसीत्यत्र छंदोग्रहणं चरितार्थं इत्थं च लोकेपि वहुशः प्रयोगा इति
दिक् निशाशब्दस्य निशप्रकृतिकत्वेनायो वैकल्पिकत्वेन च वाक्यवाचेत्युभयवत् निश
निशयोरुभयोर्यद्यपि सूत्रं विनापि सिद्धिस्तथापि स्फुटिहलं तस्याः साधुत्वबोधनायात्र ग्रह
णं प्रमादिकमेवेति आस्तोरकस्य चिह्नन्निकामभीके हव्यान्नूत्नान आसनीत्यादौ मुखादि
त्यायर्थेस्य वृद्धभाष्य उक्तत्वादिति भावः प्रत्याहार इति ओट एकारेणेति भावः टाटकारेणेत
न प्रत्यासत्तिन्यायात् ओटः ङस्यानन्यार्थत्वाच्च टाटकारस्तु टाङसीत्यादौ विशेषणार्थः

नुडागमस्य तु नग्रहणं प्रत्यया प्रत्यययोः प्रत्ययस्यैव ग्रहणात् सर्वनामस्थाने चेत्यत्रासं
बुद्धाविति पर्युदासाश्रयणात्त्वमित्यभिप्रेत्याह स्वादिष्वचेति अक्लीबस्येति एतेन पर्युदासत्वं ध्वनय-
ति क्वाक्वभेदात् असमर्थसमासायत्ता प्रसज्यप्रतिषेधस्य गुरुत्वात् यत्तु सूत्रे स्त्रीपुंसयोरिति
वक्तव्ये नपुंसकस्येत्युक्तिः प्रसज्यप्रतिषेधमसामर्थ्ये समासं च ज्ञापयतीति केचित् तत्र
विपरीतं न वेत्यर्थाभीत्रागोरवान् इत्याहुः ध्वनितं चेदं भाष्ये यत्तु ब्रजे धृतिसूत्रे अनपुंसक
स्येति असमर्थसमास उदाहरणं भाष्ये इत्तं तद्देवे तत्सूत्रे प्रसज्यप्रतिषेधव्याख्यानात् मता
भिप्रायेणेति न तद्विरोधः स्वादिषु सुपत्र प्रथमैकवचनम् ननु सप्तमीबहुवचनम् प्रथमो
पस्थितत्वात् असर्वनामस्थान इति पर्युदासात्र श्वादिग्रहणसामर्थ्यान्न सुप्युच्यतेति रि
क्तानामपि ग्रहणम् अन्यथा यासमपीत्येव वदेत् नेचाविशेषाभावात्सैवेपिकर्वनाइत्याशयेना
हकयू[illegible]यावधीति यच्चिभम् पुचश्चात्रेति समाहारद्वन्द्वः समासान्तविधेरनित्यत्वान्न टच् प
चीत्यनेन स्वादेर्विशेषणाद्यस्मिन्विधिस्तदादावल्ग्रहण इति तदादिविधिः असर्वनामेति
तेन कुपादाविल्यादौ पादः पदित्यादिपदादेशादयो न अर्थे च पर्युदासो नाश्रयणात् यत्तु प्रस
ज्यप्रतिषेधे राजेत्यादौ सुप्तिङ् नमितिपदत्वस्यापि निषेधापत्तौ न लोपासिद्धिरिति तन्न असं
तरस्येति न्यायविरोधात् अकड प्राक्कडारात्समास इति तु नावधिः व्याप्तिन्यायात् ननु गु-
णाद्विगुश्चेति लिंगात्र समाकेणार्थेहित[illegible]मभिप्रेत्याह कडाराः कर्मधारय इति आचार्या
न्य

श्रा शे 151 टित्वकरणं युक्तं नहि चार्थे द्वंद्व इत्यतः परमप्यस्योपयोगोस्ति वस्तुत एकसंज्ञेत्यधिकारादेव
सिद्धावव्ययुपादानं निरर्थकमेव अन्यत्रैवात्रापि तदुपादानं विनैव तन्निवृत्तिसिद्धेः राजदंता
न दिषु परमित्यादावन्वयात्तु तत्र तानन्वृत्तिसिद्धेश्च इदमेव ध्वनयन्नन्वत्याति एकसंज्ञाधिका
रात्सिद्धे शेषग्रहणं स्पष्टार्थमिति शेषो घ्यसखीति सूत्रे यथान्यासे तत्पारार्थ्यं सामान्यपरिभा
षया मधिकारशब्दो बोध्यः ध्वनितं चेदं ह्रीस्थाने इति सूत्रे भाष्यकैयटयोः एवमेके इति स्त्रीलिं
गनिर्देशात्प्रकरणात्त्र संज्ञालाभे संज्ञाग्रहणमपि चिंत्यप्रयोजनमिति दिक् एके वेति
संख्यावाचक शब्दोपादानादवधारणं संपद्यत इति भावः यद्यपि परत्वानवकाशत्वा
भ्यां बाधकत्वेनापि इति सिध्यति तथापि संज्ञानां विरोधाभावात् विप्रतिषेधाप्रवृत्तिः +
भिन्नफलत्वेन सामान्यविशेषभावाभावान्नापवादत्वं किंच एकसंज्ञाधिकारादन्यत्र सं
ज्ञानां परस्परं बाध्यबाधकभावाभावज्ञापकं नार्थमिदं तेन तत्वादीनां कृत्कृत्यप्रत्यय
संज्ञादयः सिध्यंतीति बोध्यं पावरेति द्वयोः सावकाशयोः परानिरवकाशत्वं तु सैवेति
विवेकर्तेनेति अनवकाशत्वेनेत्यर्थः परोदाहरणं तु अपादानमुत्तराणि कारकाणि
बाधते इत्याद्याकारे स्पष्टं औपगव इत्यादौ स्वुप्तिङंतमिति पदसंज्ञायां भसंज्ञा बाधश्च पर
त्वेन बोध्यः तेन राजन्यत्य इत्यादौ न नलोप इति बोध्यं तथांगसंज्ञापि भपदसंज्ञाभ्यां बाध्ये
ते निवाच्यं पदसंज्ञाविधावंगमित्यनुवृत्तेनादंगसंत्यदं भवति भवतीत्याद्यर्थांगीका

ए

रेण समावेशस्वीकारात् नच पर्यायः स्यात् एवं चान्तर्वृत्तिरपि चरितार्था नियमबाधश्चेति
वाच्यं क्वचित्तद्धिते च तद्धिते ष्वचामादेरित्याद्यंगकार्यविधानेन समावेशज्ञापनात् अंगभक
रणे भस्येत्यस्य पाठाद्गुरुघसंज्ञापरस्मैपदसंज्ञयोरपि णलुत्तमो वेति ज्ञापकात् समावेशः
अन्यत्रेत्युक्तसमावेशस्थाने च पाणिनिनाकृतमेवेति ध्येयं गुरुलघुसंज्ञे वर्णस्य नदीघिसंज्ञे
तदंतस्येति विभिन्नावधिकत्वात् समाविशतः तयोरपि वर्णसंज्ञात्वमिति चेत् विद्धस्वं तद्धि
त्वत्रयिपदमनुवर्त्य गुरुसंज्ञाविधायकेन नदीपदं चानुवर्त्य वाक्यभेदेन तत्संज्ञकयोस्ते संज्ञे
विधीयेते इति समावेशः पर्यायस्तु पूर्वदेशे च पदानुवृत्त्यापि सिद्ध इतिदिक् न चैतानि स
ज्ञानि निर्ज्ञेरशब्द एव वक्तुं युक्तानि नच फलाभावः पदान्तत्वप्रयुक्तरुत्वादरेणेन संज्ञा
कसत्वादिति पदसंज्ञापाक्षकरणेनापि तस्य तुल्यभत्वात् इह तुदद्भ्यामित्यादौ जस्त्वा
पपदत्वस्यावश्यकत्वेदतर इत्यादौ तद्धारणाय भत्वमप्यावश्यकं न च दतर इत्यादौ स्वादि
ष्विति पदत्वाज्जस्त्वं दुर्वारं न च भत्वेन बाधः कार्याभावेन तदप्रवृत्तेरिति वाच्यं पदत्वप्रति
बंधस्यैव कार्यस्य सत्वात् न चेदमशास्त्रीयं न पदान्तेति सूत्रस्थभाष्यप्रामाण्येनाशास्त्री
यत्वेतत्प्रवृत्त्यंगीकारात् इत्याहुरितिदिक् यलोप इति हलि सर्वेषामिति लोपः शाकल्य
स्येति वेत्यर्थः अंगात्सिप्तस्य भसंज्ञाविधिन्नस्य चैकत्वं एवमेतत् सूत्रप्रवृत्तिः प्रत्यासत्तिन्याया
दित्याशयेनाह यजादिस्वादिपर इति एतेन भत्वस्य वर्षवत्त्वप्रयोरित्यादौ अप्रवृत्त्यपि+

152

श० शे०

विधानाङ्गत्वेन न प्रत्ययाद्येपरनिषयत्वं अंगसाचिव्येन संभवात् नान्विदमसंगतं भत्वेनांग
निष्टयज्ञादिस्वादिपरत्वाद्धेयविशेषणवनिष्टस्य न स्याद्देपिमानाभावात् यचिभमित्यत्र
यस्मात्प्रत्ययविधिरित्यनुवृत्त्यैवांगस्यैव तद्धि धानानु संज्ञाविधिरस्यैकवाक्यत्वे विशेष्य
यस्मांगांशेऽस्थितत्वाकांक्षत्वेन नत्रैवान्वयस्यौचित्यात् किंचानोविशेषणे प्यनवस्तत्से त्वा।
दोदोषोऽर्थः विधौ परिभाषो पतिष्ठते नानुवाद इति परिभाषयानिर्दिष्ट परिभाषानुप+
स्थितेः अनंत्यविकार इति परिभाषात्तु नास्त्येव सन्त्येतु यज्ञादिस्वादिप्रत्ययस्यान्विशेष
णत्वे फलाभावः अनन्तत्वात्यनदेवहि नन्फलमाहुरितितदत्राहुः कार्यकालपक्षे पदे
ववाक्यतायाः सर्व समं तत्त्वेनोपस्थितपदानां यथेष्टमभिसंबंधांगीकारात् अयंभा
वः तत्त्वत्तेयचिभमित्यादेरयमर्थः यत्रभसंज्ञा ततत्र यचीत्युपस्थितं भवति यस्मात्प्रत्यय
विधिस्तदादिप्रत्ययेऽनुवर्तमानं च तत्र यस्मात्प्रत्ययविधिस्तदादीत्युपस्थाप्यांशस्योप
स्थापकसमानविभक्तिकत्वं यचिप्रत्यय इत्यादीनां संज्ञासूत्रेऽपात्तविभक्त्यंतत्वेन स
प्तम्यंतादिपाठस्यैवेयर्थ्यापत्तेः प्रथमायास्तु साधुत्वार्थत्वेनाप्युपपत्तेः तत्रउपस्थितत्व
प्तमांत पदोपस्थाप्यार्थस्योपस्थाप्यकार्थएवान्वयः सप्तम्यंतस्यत्वन्येनापि अत एव
प्रकृतसूत्रे यस्मात्प्रत्ययविधिस्तदादीत्यंशस्य भसंज्ञान्वयमभिप्रेत्यांगावयव इति
व्याख्यातं यचीत्यंशस्तु यज्ञादिस्वादिपरो यानि त्यनु विशेषणं तया व्याख्यानो यचिभ

ण

कं

मित्यादिं तत्र इको गुणवृद्धीति वृद्ध्युपस्थापकमेव उपस्थाप्यस्योपस्थापकेन प्रदेशेषु इत्या
बाधनात्स्वं संज्ञा सूत्रव्यवहारः इत्याबाधकत्वमपि सामानाधिकरण्यादवसीयते इको गु
णवृद्धीत्यादौ तु नैवमिति स्पष्टमेव न च यथोद्देशपक्षेपि भत्वांगत्वयोः प्रत्ययनिमित्तत्वान्न व्य
भिचारि इह तु नाप्यजादि प्रत्ययपरत्वानुमानं भविष्यतीति किं विशिष्य कार्यकालप
क्षोपादानेनेति वाच्यं तथा सत्याक्षेपकविशेषणत्वस्यैव न्याय्यत्वेनानोविशेषणत्वाना
पत्तेः अनुमित्युपस्थितत्वस्य चरमत्वात्तु पस्थितत्वेन शाब्दत्वान्वयानापत्तेश्च धूमायज्वलतीतिव
तू अनुवर्त्यमाणं एवं तर्हि कार्यकालं संज्ञा परिभाषं यत्र कार्यं तत्रोपस्थितमिदं द्रष्टव्यं भस्ये
ति उपस्थितमिदं भवति यचिभमिति तत्र यजादिपरत्वापत्त्याकारं विशेषयिष्याम अनाकारं
यजादि स्वादिपरस्यानोयोऽकार इति तेनानस्त्वलोपत्याद्याबाधाकारादेर्न लोप इति ष्यङः सं
प्रसारणमिति सूत्रस्थं भाष्यमेव अगारंनूनामतेनिवेशः इति न्यायेनानन्तरत्वस्योत्तरं पचीन
स्योपस्थितौ सन्निधानेन नतु हि शेषत्वस्यैव न्याय्यत्वाच्च एवं चाभाति विज्ञः प्रत्ययविशेषो
गेच नि ह्रयमनोविशेषणं अनूत्त्वकारस्यानिनोऽन्त्यदोषः विधौ परिभाषेति न्यायस्तु नास्त्ये
व तज्ज्ञापकमन्तस्थाने ग्रहणेन परिभाषाणामनित्यत्वमात्रकल्पनात् अत एवोदात्त
स्वरितयोर्यणः इत्यादावुदात्तस्वरितस्थानिकस्य यण इति व्याख्यानफलं संगच्छते सत्वव्य
नित्यत्वाच्च षष्ठीस्थाने इति सूत्रं निर्दिश्यमानस्येति परिभाषापरं स्थानसंबंधलाभ

स्त्वर्थं नरं गत्वादिना स्थानिवद्भावे दीर्घ इति ज्ञापकेनैवेति भाष्यमते स्थानसंबंधस्य प
रिभाषालभ्यत्वाभावेन ज्ञापकस्यैवासंभावाद्वृद्धिः क्व तपरकरणं किं अतिनेः क्विपि स्वा
नइत्यादौ लोपो माभूदिति अनुत्वं त्वत्रैकदेशविकृतन्यायेन बोध्यं न च लोपस्यासंभावित
त्वेनाकृतव्यूह परिभाषयाऽनुनासिकस्य क्वीति दीर्घप्राप्तेर्लोपे रूपासिद्धिरिति वाच्यं
तस्या अनित्यत्वात् इदमप्यनित्यत्वे ज्ञापकमित्यन्यदेतत् रषाभ्यां निमित्तनिमित्तिनो
रपदस्थयोरसंभवात् पदे इत्यनेन सामर्थ्यादेकपदत्वेन वा समानग्रहणमयं उत्वलाभा
र्थे तेन समासेन रामनामेति अरेवं उत्वं चात्र निमित्तानधिकरणनिमित्तिमत्पदादिति त्वम
मातृभागीणेत्यादौ णत्वसिद्धिः केवलभागीनेत्यस्य प्रत्ययमात्रस्य वा पदत्वाभावात्
लोकेर्थबोधकत्वाभावाच्च अत एवाचार्यादणत्वं चेति सार्थकं पदशब्देन चात्र लोकेर्थ
प्रतीतिकृदुच्यते पठ्यते बोध्यते इति वृत्यन्तेर्लक्षणया वा गंधर्वगानमित्यादौ गतिकारको
पपदानामिति सुबुत्पत्तेः पूर्वं समासविणत्वं न भवत्येव अत एव अक्षसाणिमानयनीति
विग्रहे वक्षसाणीत्यादौ पूर्वपदात्संज्ञायामिति णत्वमुक्तं मनोरमायायाम् न चैवं वृत्रादि
षु नृनमन शब्दपाठो व्यर्थः सत्ताभूतानां उत्वार्थे तस्यावश्यकत्वात् न च तत्र कंदस्य
दवग्रहादित्यनेन प्राप्तिः इदृशो विषयावग्रहाभावात् अत एव वर्णैकदेशानां वर्ण
ग्रहणेनाग्रहणमिति पदेन्नमन शब्दपाठोऽरवर्णान्तरस्य णत्वे ज्ञापक उक्त एव ॥

ङ.ओ चुस्त्त्वयोर्भाष्ये पृषोमंडविशेषणः स्वज्ञामत्नकपृषत्कभेदीदीपनपाचन इति दर्शनात् ना
चष्टुत्वे नैव सिद्धे रस्योहोपन्यासो व्यर्थः अत एव षग्रहणमुत्तरार्थमिकरणमिति वाच्यं पुष्टर
त्वादौ चरितार्थस्य ष्टुत्वस्यासिद्धत्वपाऽस्येव प्रवृत्तिः स्यात् आकरेपि इह षग्रहणं विनापि लक्ष्य
सिद्धिरुक्तीत्य नावतीतात्पर्यमिति दिक् पूर्वस्मादपि विधौ पूर्वस्मान्निमित्तत्वेनाश्रिताद् इत्यर्थः
अत एव हे गौरि इत्यत्र गकारात्परस्यैत्त्वस्यादिति संबुद्धिलोपप्राप्ते विधौ स्थानिवद्भावान
श्च: परस्मिन्निति सत्त्वे पूर्वस्येति संबंधसामान्यार्थकषष्ठ्यन्तेन कर्मकित्प्रत्ययान्तविधिष्टा
हस्यसमाश्रयणादयमर्थो लभ्यत इति भावः पूर्वस्यैवेति नन्वारुचिर्वेधापि ना नहीनंतुष
ष्ठाः संबंधसामान्यार्थकत्वेपि निमित्तनिमित्तिभावः संबंधार्थकत्वाश्रयणे फलाभावः न
चैवमियते यङ्नाञ्चि उपजननिष्ठमाणो प्रापवादइति न्यायेन निषेधविषयाभावस्यापि
निमित्तत्वेनाऽक्लृप्तत्वाद्दूरपरिभावयावा एवमिड्भावेऽल्लोपे यल्लोपे एकाच उपदेश इति नि
षेधाद्दिटा न स्यात् पंचमीसमासेत्वल्लोपस्य स्थानिवत्वान्निषेधाप्रवृत्तावि ष्टसत्त्वं भ इति वाच्यं
एकाच उपदेशइत्यत्र विहितविशेषणाश्रयणाद्दल्लोपेपि निषेधाप्रवृत्तेः स्पष्टं चेदमेकाचेष्ठ
इति सूत्रे भाष्ये न च हिपड्लोपे वेभिदितेत्यत्र यङ्नातृन्चि इट्प्रतिषेधमाशंक्यैकाचोंग
दितिव्याख्यानेन परिहृतं प्रत्ययविधानावधेरेकाचः परस्येति व्याख्येमित्यर्थः प्रत्ययविधा
नावधेरेव प्रायेणांगत्वात् एवं च विहितविशेषणत्वं फलितं उपदेशग्रहणं चैकाजंशेन संबं

न एवंविहितनविशेषणेनैव विभिन्नतीत्यादावदोषात् किंच तद्ज्ञापकस्य पथ्यास्तु नत्वे विभक्तनीया
दोदोषवारणायोपदेशग्रहणस्यैकाजं त्रोपि संबन्धे विभिद्दिते त्यादावपि परिहारासंभवेन तद्ज्ञा
पकस्य विहितनविशेषणत्वे तात्पर्यमावश्यकं तत्परिभाष्यप्रदीपोद्योते द्रष्टव्यं वसत्यादीनामनुदा।
त्तपाठसामर्थ्यात्तत्त्वारंभसामर्थ्याच्च धातुस्वरेणोदात्तत्वे प्राप्तस्वरत्तौ सिद्धायामुपदेशग्रहणं न
कार्यमित्यपरं लाघवमत्र फलं बोध्यं एतेन गोधुक शब्दादाचारक्विबन्तात्तादो विहितत्वविशेषणत्वे
तुणिनबधोनस्यादित्यपास्तं परविशेषणेपि तुड्विहितस्याङ्गत्वाभावेनाप्राप्तेरित्यलं नचैवमपि मथितं
पण्यमस्येति विग्रहे ठकादेशस्येति लोपे तस्य तस्य क्रान्तादिति कादेशमाश्रित्य कत्वासिद्धिः पंचमी
समासे तु लोपस्य स्थानिवत्त्वान्न दोष इति वाच्यं संनिपातपरिभाषयावारणात् टस्येकत्वत्र स्था
निवकारस्योच्चारणार्थत्वेन ठस्याभावाच्च स्थानिवत्त्वं तु अल्विधित्वान्न आदेशे तु अकारोविव
क्षितः प्रत्ययेषु च सर्वत्राविवक्षितः एवं हि लाघवं भवति अदस्यच नानिप्रसंगः ठस्यांगसंज्ञानिमि
त्तत्वाभावात् एतेनादेशोप्यकारोऽविवक्षित इत्यपास्तं बहुषु प्रत्ययेषु विवक्षितत्वकल्पना
न पेक्षया एकत्रादेश एव विवक्षितत्वकल्पने लाघवात् किंचैवं निषादकर्षू शब्दादादेशादिति ठविधान
नमात्रस्य व्यंजनत्वपकादेशो कर्षूशब्दस्य लात्त्वाकान्यात्केन इति ह्रस्वानापत्तिः स्पष्टं चेदं तत्र
इयान्नु तु सूत्रे भाष्यकैयटयोः स्थान्यादेशयोरिति मनोरमायां स्थानिपदेन ठकादेन ठका
देशस्य स्थानित्वं नाधिगमादयः आदेशपदेन च न हि धायकं सूत्रमिति न दोषः ध्वनितं चैतत्तुसमाथा

नह्यस्य समुच्चयेत्वंटकहस्त्रोश्चेतिवार्त्तिके भाष्ये नन्वेवमप्यपीयचनित्यत्वण्णलोपस्य चुङ्न्यका
रयोरेकादेशे च स्थानिवद्भावानापत्तौ श्चेतेः सिज्ञस्येत्तिज्ञसापत्तिरिति चेन्न यस्यविभाषा।
य विन्नोभागस्यान्ययोरिति सूत्रस्थ कैयटोक्तरीत्या परसाहचर्यस्य बलवत्वेन विदिसाहचर्या।
दभ्यस्तादपि लङ् एव सेर्लुक्स्यिधानात् परत्वादंचित्वं विप्रतिषेधसूत्रे कार्यशब्देन शास्त्री
यस्यैव ग्रहीतुमुचितत्वेन तदंशाच्चेः नित्यः परपणादेशः परश्चासौ व्यवस्थया युगपत्संभ
वो नास्ति वहिरंगेणासिध्यतीत्यचः परस्मिन्निति सूत्रभाष्योक्तरीत्या पूर्वसाहचर्यस्यांतरंग
त्वेन तस्यैव ग्रहीतुमुचितत्वाच्च विभाषागमहनविदविशामित्यत्र लुग्विकरणपरिभाषानुग्र
हाय परसाहचर्यस्यैवाश्रयणमिति बोध्यं नुदविदोंदत्रेत्यत्रापि विदलृलाभ इत्यस्य नोदादि
कस्यैव भोगस्यान्ययोर्वृत्तिसंभवेन तस्य विन्नोभागेति सूत्रे ग्रहणेन तत्र कौंडिन्यन्यायेनात्र
तस्याग्रहणे परसाहचर्येण रोधादिकस्यैव ग्रहणमिति बोध्यं वस्तुतस्तु पूर्वोत्तरसाहचर्येण।
भ्यस्तादपि परस्मानादिष्टस्यैव ग्रहणेन दोषाभावात् सुट्तिथोरितिवत् सेर्लुक्सिप्यत्रेका
रस्योच्चारणार्थत्वेन रुमात्रस्य स्थानित्वेनाल्विधौ स्थानिनिषेधादंते रुत्वाभावेनादोषादि
त्यन्ये तन्नेतीयत्रेडागमस्तु न वहिरंगतया यणोऽसिद्धत्वात् इति बोध्यं अत एव विधिग्र
हणं किमर्थं पूर्वस्माद्विधिरित्यर्थलाभार्थमित्यादिना संप्रपंचेन तत्प्रयोजनानि व्याख्याय पू
र्वस्येति संबंधसामान्यार्थषष्ठ्येव सिद्धे पुनर्विधिग्रहणं व्यर्थमित्याशंक्य विधिमात्रे शास्त्री
येऽशास्त्रीये च स्थानिवद्भावाय यथा स्यात् वाद्यौतो पोद्धोर्वलीति लोपो माभूदित्युक्त्वाऽस्ति प्र

155

शा॰घो॰

योजनमनन्त किं तर्हीति अपरविधाविति न वक्तव्यं । किंप्रयोजनमत्वविधावपि स्थानिवद्भावो+
यथा स्यात् कानि पुनः स्वविधौ स्थानिवद्भावस्य प्रयोजनानि आपन्नामसन्निति भाष्योक्तं संगच्छते अन्य
थावेभिदिते इत्यादीनामसिद्धत्वात्सेऽसिद्धत्वेनासंगतिः स्पष्टैव अस्मदुक्तरीत्या साधने तु पंचमीस
मासाश्रयणं व्यर्थमेव नच निमित्तापेक्षया परत्वविज्ञानान्न तत्सिद्धिः अकारलोपादेर्निमित्तं ह्या
र्धधातुकादि न च तस्मात्परस्य विधिः किंतु तस्यैवेति कैयटोक्तरीत्या निर्वाह इति वाच्यं तर्हि वक्त
व्यं न वक्तव्यं पूर्वविधाविति एव सिद्धं कथं पूर्वग्रहणेन नादेशाभिसंबध्यते कुतः पूर्वस्मादादेशादि
ति किं तर्हि निमित्तमभिसंबध्यत इत्युत्तरभाष्येणावधित्वेनादेशस्यैव संबंध इत्यभिप्रायेणैव न्यासां
तरं प्रवृत्तिरित्यर्थः स्पष्टतयाऽभिधानात् निमित्तस्यावधित्वेनाश्रयणे यणाद्यादेशनिमित्तान्या
देः पूर्वस्य धात्वादेराडादिरूपे कार्ये कर्तव्ये स्थानिवद्भावस्य पूर्वविधाविति न्यासेपि सिद्धत्वेन न्या+
सांतरेऽप्रवृत्त्यापत्तेश्च किं चापरविधाविति न्यासे निमित्तापेक्षया परत्वविज्ञाने वाभ्रवीय इत्यादौ हल
स्तद्धितस्येति यलोपेऽवादेशस्य स्थानिवत्त्वापत्तिः न च न पदांतेति निषेधः स्वरदीर्घयलोपेषु लो
पाजादेशस्यैव स्थानिवत्त्वनिषेधात् अभावातिदेशस्यानुपदमेव विधिग्रहणेन सिद्धांतितत्वात्
स्थानिनि सति पदांतत्वादादेशेऽपि तदभावातिदेशाकारात् योऽत्राश्रीयते नासावादेशः यश्चादेशो ना
सावाश्रीयत इति भाष्योक्तरीत्या न निर्वाहः अत एव पटयतीत्यादौ वृद्ध्यभावसिद्धिः न चापरविधा
विति न्यासे अजादेशापेक्षया परत्वविज्ञाने नैनेय इत्यसिद्धिः आल्लोपस्य स्थानिवत्त्वेन ह्यच इति

हणानापत्तेः नह्यत्र यमादेशापेक्षया परस्य कस्यचिद्विधिरितिवाच्यं निमित्तापेक्षया परत्वविज्ञाने
विशेषस्य तदवस्थत्वात् परदेशे जायमानत्वेन परसंबंधिविधित्वमिति तु उभयोः समम् एतेन मध्ये
तमाचष्टे मध्ये तु न घकिकादेशाभावार्थं पंचमीसमासस्य वरयकद्भुतिनिरस्तं अपरविधावि
ति न्यासे ऽस्यादेशस्य निमित्तस्य वावधित्वे पि लोपात्तन्निमित्तभूतणिच एव वा परस्य विधिसत्वेन स्था+
प निवद्भावानापत्या कादेशस्य निमित्तस्यैव भाष्यकृतत्र पूर्वत्वानुमानात् किंच पूर्वस्येति संबंधसामा
न्यषष्ठ्या स्थानित्व निमित्तत्व संबंधवत् कर्मत्वस्यापि ग्रहणे पूर्वकर्मकविधावित्यर्थेनापनित्यादी
नां सिद्धौ वार्त्तिकारंभस्यैवासंगतत्वापत्तिः किंच पंचमीसमासांगीकारे पूर्वविगणत्वे इत्यादौ अल्लोपस्य
स्थानिवत्वात् यादेशो न स्यात् वचनसामर्थ्यात्तस्य स्थानिवद्भावकृतव्यवधाने प्रवृत्तिरिति चेत् न शब्द
मप्येत्यादौ चारितार्थ्यात् ननु निष्ठायां सेटीति सेट्ग्रहणात्तदनित्यं तथाहि तत्र सेटीति पदं नानिड
व्यावृत्यर्थं णिज्जंतात्तदसंभवात् न च तत्फलेः सनीवंतर्धेति इट्विकल्पात् संज्ञपितः इत्यादौ यस्य विभाषेति
णिनिषेधः संभवतीतिवाच्यं यस्य विभाषेत्यत्रैकाच इत्यनुवृत्तेः अन्यथा ततनियतिदरिद्रातीतिसनि
विकल्पितेट्त्वेन दरिद्रितः इति रूपे न स्यात् वादांत सूत्रे तत्ग्रहणात् इति निपातनेनेड्भावस्येव णिलोपस्या
पि निपातनाच्च तस्मात्तत्कालावधारणार्थं अर्थं णिकृते णिलोपो न तु ततः प्रागिति अन्यथा कारितमि
त्यादौ णिलोपे एकाच उपदेश इति निषेधः स्यात् पूर्वस्माद्विधौ स्थानिवत्वे तु श्रावत्वेव निषेधः णि
चा व्यवधानात् तस्मात् सेट्ग्रहणमनित्यत्वं ज्ञापयतीति चेन्न सेड्ग्रहणेन लाघवात्तद्भावस्यैव
ज्ञापयितुमुचितत्वात् अपि च सूत्रे पूर्वग्रहणे वैयर्थ्यापत्तिः षष्ठीसमासेन पूर्वस्य पंचमीसमासेन
ण

प्रा॰ शे॰ स्वस्य परस्य च विधौ स्थानिवद्भावस्य प्राप्तत्वेन विधाविति व्यर्थमसिद्धेः पूर्वशास्त्रस्य व्यवहिताव्यवहि
तसाधारणत्वाच्चापि प्रवृत्तिप्रसंगस्य नित्यत्वेन त्वयैव मयापि समुपरिहर इति दिक्। वस्तुतस्तु एत
काच उपदेशे इत्यत्र विहितविशेषणपक्षे सेटीति चिन्त्यप्रयोजनमेवेति बोध्यं पूर्वत्रासिद्धे नेति
अतिदेशाद इत्यात्रिपाद्याम् असिद्धत्वेनाप्यसिद्धमिदं न स्पदोषः इति न मुने इत्यत्र नेति योगवि
भागेन तदपि न स्थेति भावः संयोगादिलोपेति न हि रहिभ्यां एवं ताभ्यां क्विपि लोपाभावार्थे
नत्वे निगाल्यते न चात्र णिलोपात्पूर्वं मनं गत्वाल्लत्वं अकृतव्यूह परिभाषया प्रवृत्तेः न च
स्थानिवदादेशः अल्विधित्वात् प्रत्ययलक्षणं तु नियमार्थं ज्ञायत इत्यप्युपसर्गस्यायति
विशेषणत्वे फलं बोध्यं णत्वे माषवपनी ङीबुत्पत्तेः शाकसमासोत्र कर्त्तव्यः अन्यथा समा
कं सन्नपि प्रातिपदिकान्तत्वाभावस्तत्त्वेन णत्वं न स्यात् इह यस्येति लोपस्य स्थानिवत्त्वेन नकारस्य
प्रातिपदिकान्तत्वाभावात् णत्वं न वस्तुतो णत्वग्रहणं व्यर्थं वहिरंगतया लोपस्यासिद्धत्वा
त् इदं चानिलेरंन इत्यत्र भाष्ये ध्वनितमिति शब्दकौस्तुभे स्पष्टं इति दिक्। नलोपः विशेष्यमंन।
स्येत्यस्यानेत्यनंतदविभक्तिकं तथैव प्रातिपदिकेत्यनेन पदविशेषणमित्याशयेनाह प्रातिपदिके
त्यादि सौत्रत्वाल्लोपः नत्रु षष्ठीतत्पुरुषयोः पूर्वपदे असामर्थ्येन समासासंभवात् तदंतस्ये
ति षष्ठीतत्पुरुषः यदि तु नेत्यनेन पदं विशेष्यते तदा विशेषणेन तदंतविधौ लब्धे तद्ग्रहणस्या
र्थ्य पदस्येत्यस्य वैयधिकरण्येनान्वये तात्पर्यग्राहकमिति भाष्यकृत इति हलेति निरूपयि

ध्यामः विभाषादि नपुंसकान्तेति विहितः शीरहस्त्रह्यते न तु जस्पूर्वोः श्रिः तस्य सर्वनामस्थान
त्वेन तस्मिन् असत्वासंभवात् प्रकारार्थत्वे प्रमाणमाह भाष्येऽति तत्र हि शास्त्रप्रभृतिषु प्रतिउच्यते स्व
शास्त्रभृतिष्वपि दृश्यते शालादोषणीकुकुटोषणीर्नेन महादेवरत्नमुक्तं अथास्याग्निमुखे वपद्य
मानस्य शलाकारे दोषणीत्यर्थः छांदसः कलोपः एतेन दोषरत्यकारान्तस्य हूपणवाचिनो
दोषन्नादेशरूत्यपास्तं तेन पदद्र्धिरिति सि ॱॱ मू नच कोशास्थपदादीनां पादाद्यादेशत्वे पादा
दिभ्यः पृथक्पाद्यादिवचनं तत्र व्यर्थं नहि स्थान्यादेशयोः पृथगुपादाने प्रयोजनमस्ति स्था
न्युपादानेनैव तदर्थाभिधानसमर्थादेशस्यापि अर्थबोधनेन तदनुपादानेपि तत्प्रभावात् अत
एव नसाद्यादेशादीनां कोशेनुपन्यास इति वाच्यं भिन्नत्वेपि तत्र क्वोर्पूरितिवत् व्यवस्थार्थमस्याव
श्यकत्वेन सोपरतो हृदादीनां प्रयोगार्थं प्रकारार्थत्वस्यावश्यकत्वात् स्पष्टं चेदं समासकौमुद्यां
वाशोकष्यञ्रोगेष्विति सूत्रे यत्तु कोशे पदादयः शब्दपराः वाच्यवाचकयोरभेदोपचारात्तथा
भेदान्वयः अर्थपरत्वं तु न संभवति इतः पूर्वं शक्तिग्रहाभावात् यस्य यः प्रसिद्धस्तत एव तस्या
र्थोपस्थितिः एवं चैकशब्दप्राप्तिरेव न अभेदस्य वाच्यवाचकभावमादाय पर्यवस्यतीति कोशा
देः शक्तिग्राहकतापि संगच्छते यद्दात तत्पदमात्रप्रकारकार्थबोधकाः सूत्रं चाभिव्यक्तेतित्या
५ येन हृदयत्वादिना हृदयार्थकानामेव व्यवस्थापकं तथा च प्रकारार्थत्वस्य कल्पमेतस्य योज
नमिति तत्र तस्य न्यायस्य विशिष्टरूपोपादानविषयत्वेन पदकार्यविषयत्वेन चात्राप्राप्ते

मित्याह ः भाष्यादिति कव्यादेर्षणी निपूर्वोक्ताद्देवेत्यर्थः नचात्र प्राणि गत्वादितरेतरयोगाभावे
न समाहारद्वन्द्वे एकशेषे च कृते भाष्यं संयोज्यमेवेतस्य केवलस्य न पुंस्कत्वाभावे पीति वाच्यं अ
स्याप्युत्तरत्वेन दोः शब्दस्य पूर्वनिपातापत्तेः नस्मादिति पूर्वकपदं ध्वनितं चैतत्कैयटेन कक्वादित्ये
तदुहिते दोषणी याचते इति प्रतीकं गृहीत्वा दति एं दोरिति मानमुपाददवदुयमेव निपूर्वपादघटको
यमेव एतेनेन क्रमेणयान्वेति दोषंतमेति दोषं हस्तं हूषणं च भजन्त इति तदर्थः दोर्दोषा च भुजो वा
द्रुरिति निघण्टौ दर्शनात् स्त्रियामपि भागुरि मते टावित्याह ः द्वयोरन्होरिति तद्धितार्थेति समा
सः कालाद्रुजू द्विगोर्लुगिति लुक् राजाहः इति टच् अन्हादेशः संख्यावि सायेभ्य इति वक्ष्यो
पूर्वग्रहणमुत्तरपदं इत्यस्याधिकृतस्य षष्ठ्यंतत्वलाभाय पूर्वे प्रात्यो हिभी मो भीमसेन इतिव
त् पूर्वे पदार्थेकः तदेतधन यत्तु दाहरति द्व्यह्नीति एतेनोत्तरपदाधिकारबाधेमानाभावात्
ननु मतेत्यनित्यत्वस्य ल्लक्षणत्वात्त द्व्यह्नि स्थितो द्व्यहस्त्येवैतद्रुदाहरणमिति द्व्यह्नीत्युदाहर
णं चिंत्यमिति परास्तं अहः सायइति स्यतेर्घञि अवसानवचनः सायशब्दः संख्याविसायेति
ज्ञापकादेकदेशि समासः विषयादइति विष्यपातीतिश्रातोनुपसर्गे इति के प्राप्ते वासरूपन्याये।
नञिपू दीर्घाज्जसिच चकारादिचीत्यनुवृत्तिः यत्तु दीर्घाज्जसीत्यवस्त्वतां दीर्घाज्जस्येवेति
च नियमः एवं च चकारेण नकारेण कार्यः नेति च नानुवर्त्तनीयमिति महल्लाघवं इति तन्न दी
र्घादेव शसीति विपरितनियमापत्तेः नन्वच्दोषस्यापि ताकारादीनामरात्स्त्वेन नेर एदि

स्त्र्वबलाद्दीर्घादीनामुपस्थानेपि तेषामकृदोत्तरषष्ठ्यास्थानित्वबोधेमानाभावः प्रत्ययानाश्र
कृतिवृत्त्युपस्थाप्यैवान्वयात् सवर्णानांग्रहणत्वाकाग्र···· पदजन्यपदार्थोपस्थितिविषय
त्वाभावेन शाब्दबोधविषयत्वस्यावक्तुमशक्यत्वात् तथावाणदित्यत्रैभाष्ये ऋगित्युक्ते संपा
ठमात्रेगम्यतइति ग्रस्यभावः ऋचंवद ऋक्कुपदान्तमित्यादौ शब्दानुपूर्वीरूपाया अग्निमीलेइ
त्यादिकाया ऋचएवकर्मत्वंप्रतीयते नतुतदर्थस्येति नचद्विरेफमानयेत्यादौ द्विरेफपदोप
स्थितत्वभ्रमरपदेनोपस्थितषट्पदस्य द्विरेफपदोत्तरद्वितीययाकर्मत्वेनबोधवदत्रापिभविष्य
तीतिवाच्यं अन्ययैवानुपपत्त्यात्र द्विरेफपदेन स्वशक्यवाच्यत्वसंबंधेन षट्पदबोधेन षट्पदस्ये
वोपस्थितेर्नैयायिकैरंगीकारात् नचैवंह्रस्वादीनां तथाचदीर्घप्लुतान्तरेवाभावाद्ग्राह्यो निषेधइतिचे
न्न अस्मादेवज्ञापकात्प्रत्याहारपदानां तद्वाच्यवाच्ये लक्षणांगीकारात् नचैवंह्रस्वादीनांश
क्त्यादीर्घाणांलक्षणयोपस्थितौ युगपद्वृत्तिद्वयविरोधइतिवाच्यं तस्यादोषत्वात् अतएवगंगा
टी यांमीनघोषावित्यादितात्पर्यबोधः ह्रस्वानामपि तद्वाच्यवाच्यत्वेन लक्ष्यतावच्छेदकाक्रान्तत्वाच्च
नचह्रस्वस्य ह्रस्ववाच्यता कथं अभेदे तदयोगात् इतिवाच्यं गुरुलघुभेदादिनाभेदमादाय सवर्णत्ववत्त
स्याप्युपपत्तेः यत्तु स्ववाच्यसवर्णत्वेन लक्ष्यतावच्छेदकमिति तन्न गुणानमित्यादौ गुणः स्वरूपमपरइ
त्याद्यापत्तेः वार्तिककृता तत्कालानामनुपपत्त्यैव जातिग्रहणमाश्रित्य ऋदित्यत्रेऽराग्रहणं प्रत्याख्या
तमितिदिक् न्याय्यत्वादिति परत्वेनेत्यर्थः परत्वंचावकाशयोरेकत्र प्रवृत्तिमात्रविरोध इति म
तेनेदं धातोः किहाहानिति गंधर्वविशेषवाच्यमुत्पन्नं प्रातिपदिकं यदिवाहाइति शोकव्यंजक

१६८

158

प्रौ॰ याहं न हानीति हाहा हरत्यय मपि च्छिवं तो विज्ञं नो वा क्रियाया शाहू स्तदाकारेण सह वर्त्तेन रूति साक्ला
न्सानिति प्रत्युदाहरणे बोध्यं अपरे तु स्वाऽस्यर त्यादि सिध्यर्थं अतो नापरूति वक्तव्य मिति वार्त्तिक
कृतोक्तं भाष्यकृता च न न हलः अरत्यादि निपातनेन न योग विभागेन वा न सिद्धिमाश्रित्य प्रत्याख्या
तं एवं च साधा हादेर्यद्यभिधानं तदा योगविभागेन लोपः सूत्र कान र ए एवे त्येव युक्तं सूत्रे यान्तुग्र
हणं त्वहा र त्यायावं न निवृत्यर्थमेव भाष्यवार्त्तिकृ कतो रतान कल्पनापेक्षया रेट्र प्रार्थ्ये कल्पने पे
वोचित्यात् अत एव हाधा हू स्वा ब्युत्पन्नत्वेपि योगविभागे नालो लोप र त्युक्तं मृकुटेन अयं न प्रकृति
का चारक्षिवं नेभ्यः वार्त्ते क्षि त्यु न भिधाना न्न भवतीति भाष्य प्रदीपोद्योते निरूपितं अत एव प्रथमयो
रिति सूत्रस्य भाष्यां संगकृते परं रूपं वाधसामान्य चिंतया दीर्घमात्रस्य वाधक मिति पक्षे रामानि
त्यादि सिध्यर्थं म तो दीर्घ इति सुपि चेति चानुवर्तमाने व क्तव्ये म त्या दि ति सूत्रे व क्तव्य र ति यो
गविभागेन पररूप वाधक दीर्घविधाय रामाणामित्यादावने न दीर्घ पर त्वा कृते ग्नीनामित्यादौ साव
काशस्य नुटो ऽ प्राप्तिमाशंक्य क्रमवत्पर इति सूत्रे ऽ स्य कसेरित्यत्र आकृष्ट णा नु र त्यु त्सा माधाय की
लालपामित्यादौ नुड्विधायके ऽ प्राप्तो रित्य त्र वर्णलोपेन नुड्बाधनेन समाहितं नुड्विधायके ऽ प्रापू
ग्रहणं च न कार्यमिति तदाशयः अथात्वं य य वाकारां तहाहादीनां लोपाभावे तु न तत्संगतिः सप्ते
वेत्याहुः क ः अ र ति क्वार ट्स्नः प्रास्यत्वमित्यादि प्रयोगस्यानुदाहरणन्यत्र एतेनाचारक्षिवं
त. तां कतीरिक्षिपावुयोगाणामुपपन्नो योगविभागो व्यर्थ र ति परास्तं क्ता प्रत्ययस्य डित्त्वर्थे सा

धुत्वान्नाख्योनायनदीत्वप्रसक्तत्वात् शेषोघ्यसखीत्यत्र व्याख्यानमित्यनेनोक्तं निष्कृष्य ह्रस्वत्वेनोक्तस्य ह्रस्वस्य निरा
कृतत्वेन विभक्तिविपरिणामेनान्वयः शेषग्रहणस्य प्रयोजनमाह अनदीत्यादि तदंतमिति अनुवर्तनयुक्तां
शेषस्य विशेषणं तदंतलाभ इति भावः सखिवर्जमिति सखिभिन्नावयववति निवर्णसंज्ञापदेन
तु सख्यवयवभिन्नावितिते नातिसखिनेत्यादिसिद्धिः सखिभिन्नाविति तदंतपक्षे न चाद्युक्तं सख्यै
तिवाक्यं संज्ञापत्तिः पर्युदासे नञिवयुक्तशास्ति पदिकांत्यवर्णस्यैव ग्रहणादिति भावः पर्युदस्यमान
समर्पकसखिशब्देन तदंतविधिरनुकूलं भः विशेष्यासंनिधानात् शब्दरूपविशेष्यमादाय तदंतवि
धिस्तु न नियामकाभावात् तस्यातिप्रसक्तत्वाच्च कार्यकालपक्षे ङ्गरूपविशेष्यविधानेपि तत्रै+
कार्थीभावापन्नस्य निष्कृष्य तदंतयोवक्तुमशक्यः अत एव च सुसखेरित्याक्षिसिध्यति इति ध्येयं
ननु यस्येति चेति लस्य ह्रस्वत्र्वणस्येति किमुदाहरणमिन्दु क्लादालीर इत्यादीनां सवर्णदीर्घेणान्यथा+
सिद्धिरित्युक्तं नहि अतिसखरागच्छति अत्र पदलोपो न स्यात् नद्युपसर्जनह्रस्वत्वेनापि
दीर्घस्य पूर्वतिवद्भावेन सखिशब्दत्वादसखीति घिसंज्ञाप्रतिषेधः प्रसज्येत लोपे तु लक्षणप्रति
पदोक्तपरिभाषया न दोष इत्युक्तं भाष्ये तत्कथं पर्युदासो व्याख्यायते तस्मिन् हि विशिष्टस्य स
खिभिन्नत्वेन घिसंज्ञानिर्बाधैवेति भाष्यमसंगतं स्यात् यद्वा पर्युदासेपि प्रकृतस्य तदपवेल्लक्षणा+
माश्रित्य सख्यवयवभिन्नावित्यर्थो वाच्यः घिसंज्ञायां वर्णसंज्ञापक्ष एव युक्तः अत एव घ्यंता+
दत्राद्यदंतं विप्रतिषेधेनेति वार्त्तिकव्यवहारः एवं च शोभनस्य सख्युः सुसखेरिति विग्रहमाणं युक्तं

प॰ शे॰ न चैकादेशो विधिर्लिंगविशिष्टपरिभाषया दोषः कार्यकालपक्षे घिङितीत्यादिभिरेकवाक्यतया वि
भक्तौ लिंगविशिष्टाग्रहणात् दृश्यत्यादिति सूत्रे किमर्थं विकृतनिर्देशः न सखिपतिभ्यामित्येवोच्ये
त गरीयांश्चैव निर्देशः स्यात् इह च स्यादतिसख्येरागच्छतीत्यत्र इत्युक्तप्रकृतिकप्रयोगार्थं लक्षण
प्रतिपदोक्तपरिभाषामनाश्रित्येदं विहितविशेषणानाश्रयणेवत् तदाश्रयेणतु वक्ष्यमाणेस
ख्युर्लुप्तुरित्यादावव्याप्तिरेव दोषः भूपतेरित्यादावतिव्याप्तिरपीति न तद्विरोधोऽस्य भाष्यस्य ।
यत्तु विहितविशेषणाश्रयणात् भूपतेरित्यादौ न दोष इति कैयटः तन्न सिद्धान्ते फलाभावात्
तदंतसंज्ञापक्षे व्यंगाच्छे प्रामाण्यात्सखिशब्दस्य तदंते लक्षणमाश्रित्य तत्पक्षे व्यतिसखे
रित्यादौ लोपाभावे दोषः यद्वा तत्पक्षे व्यसखीति घोरेव विशेषणं अवान्तरवाक्यार्थबोधो
त्तरमेव तदंतविधिप्रवृत्तेः तद्व सख्युरवयवभिन्नत्वमेवेति सत्यं प्रकृतसूत्रस्थहरदत्तग्रंथा
नुरोधेन मूलस्य सत्वात् अत्र तत्वं महद्भिर्निर्णेयं मत्वेति नचानवकाशत्वान्नदीसंज्ञैव भ
विष्यतीति वाच्यं आकडारात्परं कार्यमिति पाठे समावेशासंभवात् तद्धि पूर्वयाऽनवकाशया
बाधे प्राप्ते परस्या विधानार्थं नतु पूर्वबाधनार्थं एवं च यत्र परानवकाशतासमावेश इष्टस्तत्र
विपरीतपाठेन निर्वाहः कार्यपक्षे त्वत्तें कार्यं चात्र प्रकरणात् संज्ञैव परा संज्ञेति वक्तव्ये परं कार्य
मित्युक्तिस्तु विप्रतिषेधे परमित्युक्तरसूत्रार्था अत एव वर्णयोर्नदीसंज्ञेति पक्षे हे श्रियवात्सीके त्य
त्र ककपुरुषोरनन्तर इति ल्लुप्ता सिध्यति अत एव विश्वतावचविनरौलावाच हेविनयति प्रविन

प्यगत इत्यादौ ल्पयि लघुपूर्वात् हेहेघीति सूत्राभ्यामयादेशापूर्वनिपातनसिद्धिः इदमेव चास्मि
न्प्रकरणे संज्ञानां बाध्यबाधकभावस्य ज्ञापकं तेनानवकाशया सावकाशा बाध्यते इयो
स्तु सावकाशयोर्विप्रतिषेधपरयापूर्वे निबोध्यं तथा च नदीत्वादाडागमे घित्वाच्च गुणे
मत्यै इति स्यादिति भावः नन्वेकासंज्ञेत्येव पाठो युक्तः पूर्वपाठे पार्श्वमित्यस्यासिद्ध्यापत्तेः
पार्श्वाणामसमितत्वापवादतया सितिचेति पदत्वे प्राप्ते पुनरनेन भत्वापत्तौ तो गुणापत्तेः पदत्वं।
तु लोपः शाकल्यस्येति लोपप्रवृत्त्या चरितार्थमितिमभिप्रेत्याह एकसंज्ञेति तथा चानका
शत्वाल्लियां ङि ति नदीसंज्ञैव भविष्यतीति भावः यत्तु परं कार्यमिति पाठे विशेषग्रहणं
व्यर्थमेव नदीसंज्ञावचनसामर्थ्यैघिसंज्ञाबाधात् ह्रस्वलक्षणनदीसंज्ञायाः प्रत्यया।
पेक्षत्वेन बहिरंगत्वादतरंगायां घिसंज्ञायां सत्यां घेर्ङितीति गुणे ह्रस्वाभावान्नदीसंज्ञा
निर्विषया स्यादिति तन्न भूतपूर्वगत्याश्रयणेन चारितार्थ्यसंभवात् एकासंज्ञेति पाठेन
फलेक्याद्यबाधकल्पनमेवोचितमित्यन्ये श्रयिकारादिति सूत्रयद्वक्तव्यं तदुक्तमाकडारस्त्रेस्य
ष्टार्थमिति अत्र सूत्रेकरणस्य स्पष्टार्थत्वं तदंतस संज्ञेति भाष्यनयेस्य तु तमात तदंतविधिलाभार्थमित्यर्थः
पत्तिः समास इत्येतदर्थमावश्यकमिति तत्रैव निरूपयिष्यामः मात्रे इति न च न नोङीति निय।
मात् गुणाभावेन दोष इति वाच्यं पित्रे त्यादौ नाभावस्य दुर्वारत्वात् पूर्वग्रहणानुवृत्त्यावेव तात्पर्य
ग्राहकत्वाच्च आङो ना ऊरुपाद्व लयेत्यादौ प्रकृतिविशेषस्य पूर्वविशेषसापेक्षत्वयांतरंगत्वात्

160

शा॰शे॰ वैरूप्यं नत्वतुगिति यादेशः कृते नादेशो न भ्रष्टावसरत्वात् इत्याद्युक्तं । पुंसीति लुनो न्नकं भ्रमुनाकुले
नेत्यसिद्धापत्तेः न च नुमाः इष्टसिद्धिः मुत्वस्यासिद्धत्वेन नुमोऽप्राप्तेः नादेशो न मुत्वं नासिद्धं न रु
ति निषेधात् न च टाङो ना इ पुंसि नुमाङि पुंसीति वा स्त्रत्वं कार्यं न मुन इत्यस्य च भ्रकारस्योच्चारणा
र्थत्वेन यान कारे कृतल्व्या इत्यादिरर्थः न च न पुंसके मुने त्याद्यसिद्धिः इकोऽचीति नुमेव सिद्धेः न च प्रिय
त्रि शब्दे नाभावे हलादि विभक्तित्वात् त्वद् त्रि च तुर्भ्य इति विभक्तेरुदात्तत्वं प्राप्नोतीति नुमि नुनेति क
र्यं नुमाङि पुंसीति न्यासः कथं वा नपुंसके नुमा इष्टसिद्धिरिति वाच्यं तस्यार्गेणैः प्रवृत्तेः स्पष्टं चेदं
चतुरः प्रासीति सूत्रे भाष्ये न च मुत्वस्यासिद्धत्वेन नादेशो गुणो नुमोऽप्राप्तिः नकारविषये तं प्रति प्र
त्वं प्रति च मुत्वासिद्धत्वाभावस्य न मुन इत्यनेन बोधनात् अत एव न मुन इति सूत्रे चरितार्थम् । प
यान्यासे चामुने त्यादिसिद्धिः अन्यथा इनादेशो गुणे अप्रसिद्धिः स्पष्टैव नैवेव मपि इनादेश गुणयोः
संभावितत्वेनाङादि विभक्तिपरेगं तां गनूप निमित्तविनाशासंभावनेन पुंसि च घ्यं तन्नूप निमित्त+
विनाशासंभावनेनामुने त्यसिद्धिरिति वाच्यं घ्यान्यासे पि दोषात् न मुन इति सूत्रारंभसामर्थ्या
त्परिभाषाऽप्रवृत्तेरिति तिन्नू भयोः समानमिति चेन्न अमुष्यै कुलाया अमुयोर मुकुले इत्याद्यसिद्ध्याप
त्तेः न मुन इति सूत्र विषये पूर्वविभक्ति निमित्तकार्याप्रवृत्तेर्मुत्वे तस्य नकारविषये कमपि प्रत्य।
सिद्धत्वाभावेन विभक्त्यादेशः प्रत्यसिद्धत्वे विवासंभावात् परत्वेन नुमापत्तेः अनयोरण्येत्वस्याप्र
वृत्तेर्मुत्वे नुमि चानिष्टं स्पष्टमेवेति दिक् । आङितीति ङकारविशिष्टासंज्ञा नत्वस्य ङस्येवि

अत एव हरि सोत्यादौ न गुणः एवमोङः आपदस्तत्रापि बोध्यं होर्ड् इति अत्रेत्संज्ञकङकाराद्दा
वित्यर्थे रुत्योङ आ पद इति सूत्रस्य भाष्ये स्पष्टं सुपां लुगिति सूत्रभाष्ये तु आङ याजयारामुपसं
ख्यानमिति विभक्तेराङजादेशो प्रवाह एवत्यत्र गुणाद्युपन्यस्तमिति बोध्यं न नु घेर्ङीत्येव सूत्रमस्तु ङ
कारादावित्यर्थेनादोषात् आङजादेशास्तु ङस्त्येव वक्तुं शक्याः न चाग्ने घ्याइत्यादौ षष्ठ्यर्थत
याविपरिणामेन यस्मिन् विधिरित्यस्याप्रवृत्तौ अर्थासंगत्यापत्तिः तस्य प्रवृत्तौ स्वरूपतः सन्निध्याए
व निमित्तत्वमित्यर्थे स्पोङ आप इति सूत्रे भाष्ये ध्वनितत्वात् इति चेन्न बहुश्रेयस्यामित्यादावा
मिश्राणेन घ्याइत्यस्यानापत्तेः ङकारादित्वस्य लिङ्विधित्वेन स्थानिवत्त्वायोगात् तथा च नुडा
पत्तिः इत्युपहसितं अनुबंधकार्यत्वात् स्थानिवत्त्वं स्पष्टमेवेति दिक् ङसिङसोः एङो ह्रस्वेपि य
थासंख्येन न अस्वरितत्वात् ङसोरित्येव सिद्धेः ङसिग्रहणं चिंत्यप्रयोजनं अत्रबोधः इदुद्भ्या-
मिति ङ इति औदिति च पदत्रयमनुवर्त्तत इत्याशयेनाह इदुद्भ्यामित्यादि घेरुन्नरस्येति तु नो
क्तं आच्छत्तौ मानाभावेन तस्य षष्ठ्यन्तत्वे नवतत्याद्यपासंभवात् इदुद्भ्यामिति किं ङेरेवाकारो
माभूदिति यत्तु ङित्युद्धेरित्येव सूत्रं कार्यं ङितीतिटिलोपेन रूपसिद्धेरिति तन्न विश्वानौ तिलोपाप
त्तेः औत् सत्कार उच्चारणार्थः नस्वरितत्वात्पूर्वः स्त्रीरीणां बहिर्भिन्नसमाधाने ग्रावित्यादौ स्वरितत्वा
दर्शनात् नचौतः स्वरितत्वेपि नाग्रावित्यत्र स्वरितत्वश्रवणं सुप्रिश्याप्रसूस्यां नोदात्तत्वे नोदात्तत्वस्य त्वने
नोदात्तत्वादिति चेन्न वृद्धौ अनुदात्तस्येत्यस्य तत्रानुवर्त्तित्वात् अनुदात्तं पदमेकवर्जमिति प
तेः

ङेराम्नद्यामिति
न्यासे दोषाभाव
वाचित्यमेतत्

रिभाषया ओकारस्वरितत्वमादाय आशिशानूस्य सर्वोनुदात्तत्वाच्च । अत एवौपगवत्वमित्यादौ तत्वप्रत्य
योदात्तत्वं निमित्तीकृत्याणं तस्य निघात इति सूत्रभाष्यादौ । न च तस्य लोप इति सूत्रस्थभाष्यरीत्या
दिव ओत्सूत्रे उपयादपि प्रमाणस्मद्रीत्या चोच्चारणार्थानामपीत्संज्ञकत्वेन दोषः नच नविभ
क्तौ विती त्वनिषेधापत्तिः कल्पनालु इत्संज्ञाप्रवृत्तिकाले विभक्तित्वाभावादिति वाच्यं ओदित्यादे
स्तपरसूत्रवचनेन संज्ञात्वात् संज्ञायां नित्यं नच तत्र तत्र युक्तं कार्यं यत्र संज्ञिनि कार्यं न तत्र नित्यं ए
वं च नित्स्वरितमित्यस्य सामान्ये इति चारितार्थेनादेशोपवत्वेरदोषात् तिति प्रत्ययग्रहणं कर्तव्यमि
हमाभूत् घभिरिति तत्स्वरितमिति सूत्रस्थभाष्यं तु प्रत्ययग्रहणाभावे इत्संज्ञायाः परंपरया स्वरे
ण फलवत्वं स्यादिति कृत्वा चिंतान्यायेन नेयं प्रत्ययाप्रत्ययपरिभाषानाश्रयणे नैवेतदनाश्रये
णे नापि तत्प्रवृत्तिरिति वा बोध्यं किंच संज्ञापि तत्कारानंतरिकैव ननु तित संज्ञाया इवतस्यापि
प्रयोगासमवायित्वेन इत्संज्ञायां मानाभावात्फलाभावाच्च तस्य लोप इति सूत्रस्थं भाष्यं तु प्रौ
त्वो ढ्यावादत्याहुः यदित्यादि त्यादौ फलाभावान्न परसूत्राप्रवृत्त्या नास्य संज्ञात्वमित्युक्तमेतेतदा प्रत्यया
प्रत्यययोरिव सिद्धे पुनः प्रत्ययग्रहणं कर्तव्यमिति वार्त्तिके नौपदेशिकप्रत्ययत्वस्य त्यवतस्य
त्वानात्र प्रवृत्तिरिति इत्संज्ञकत्वेपि न दोषः किंचादेशोभ्युतकारस्य दकारस्थाने च त्वे निष्पन्ने त
यादित्वस्यैव सत्वेन नस्वरप्राप्तिरित्याहुः अदिति तपरत्वमप्येवं न च वृद्धाविन्यादौ टापूर्णिवस्य
र्थेसंनिपातपरिभाषया तद्वारणस्य कृतमेतेन तत्सूत्रभाष्यादौ कृतत्वात् किंच भिन्नकालत्वा ।

इत्यर्थेन तपरत्वेन भाव्यं दीर्घत्वात्तेरिव टावभावस्य वाच्यत्वात्सोपापादनं प्राक् एवं च तपरक
रणाद्धाप सह दीर्घा मा भूत् टाप्तु स्यादेव न च ह्रो विदर्थस्येति प्रकरणेन समासबाधद्वानेन
टापोपि बाधइति वाच्यं प्रतिपदविधानात् षष्ठीन समस्यत इति वार्त्तिकानुरोधेन तत्र तथाकल्प
नेपि इह तथाकल्पने मानाभावादित्यग्रे निरूपयिष्यामः अत एव भाष्ये औकारं डितमाश्रि
त्यादित्युपत्याख्यातं अथवा डिटौकारः करिष्यते औडित्त्व घरिति ग्रंथेन अत एव तन्त्र्या
सप्रदर्शनं भाष्ये औदित्ति नकारानुस्वारणं न च डित्त्वे विंशतोस्ति लोपापत्तिः टौडिति ति
विंशतेस्तद्धिते नः अङ्क एवकारवत्तिन्यासदोषाभावात् इत्याहुः अन उ सो सोडित्य वसिद्धे
अनङ्ग्धान फलं हलंतत्वोच्चारणस्य प्राक् निरूपयिष्यामः सर्वविभक्तिन सप्तमीबहुवचनं
असंबुद्धाविति पर्युदासात् उकारोत्पादेशार्थं नकाराकारस्त्वनुस्वारणार्थः अलोन्त्यात् अव
यववधिमतोः सान्नात्यमभिप्रेत्याह पूर्वो वर्णोऽस्ति अत एव विशिष्ट इत्यादौ विशाङ्इति समुदाय
स्य विशास इत्यस्य न पंचम्यंतानुग्रहणाद्व शास्यन सर्वनामस्थाने नोपधाया इत्यस्य।
ढलोप इत्यतो दीर्घपदस्य चानुवृत्तिमभिप्रेत्याह नोत्त्वस्येत्यादि अष्टका। एकशब्दः सहा
यवाची संख्यावाची वा अभेत्सीदित्यत्र सिचो लोपस्तु न स्तनीतिसाहचर्यात् विभक्तेरेव
तत्र ग्रहणात् अतिस्यकत्त्व विवक्षायैव सिद्धे एकग्रहणं वर्णग्रहणे जातिग्रहणज्ञापना
र्थं तेनधिक्षतीत्यादि सिद्धिरिति मूल एव स्फटीभविष्यति न च ज्ञापितेपि कथमेकग्रह

शा.शे. णंचरितार्थमुयावता ऽल्ग्रहणसामर्थ्यात् संज्ञाविधानसामर्थ्याद्वैकग्रहणाभावेप्यल्रूपस्यैव
भविष्यतीतिवाच्यं सामर्थ्येन समुदायस्यैव संज्ञानात् रूपस्येत्यर्थस्याविकल्पयितुमशक्यत्वात्
क्विवादेश्च संज्ञाव्यावृत्तिः फलं हलं ङ्याप्सूत्रे सो ऽपृक्तमिति विशेषणं न संबध्यतेव सामर्थ्यात्
त्तिस्यो हल्मात्रस्यापृक्तत्वं नुमस्थानिवत्वेन भविष्यति वेरपृक्तस्येति सूत्रेण दविरित्यादावेव भवि
ष्यतीति शंकावारणार्थेन चारितार्थ्यादात्तत्याहुः निपातएकेत्यनेनैतदर्थज्ञापनेन तस्य सूत्रस्या
तिग्रहणवारणायेदमावश्यकमेव अस्य ज्ञापकत्वेत्वनयेवरीत्यातदावश्यकमितिबोध्यम् अपृक्त
इत्यत्र पुंस्त्वमविवक्षितमत्र अत एवापृक्तं हलिति नपुंसकनिर्देशः संगच्छते अपृक्तपदे शेषु
हल्ग्रहणेनैव सिद्धे संज्ञाविधानं विस्पष्टार्थमित्याहुः हल्ङ्याब्भ्यो दीर्घादिति ङ्याबोरेव वि
शेषणं न तु हलो ऽसंभवात् सुतिसीति पृथक्पदं परामिति विहितविशेषणत्वे तु वक्षि
यसीति न सिध्येत् तत्र स्त्रीप्रत्ययस्योपसर्जनत्वेन तदादिनियमप्रवृत्तेः समुदायस्य ङ्यन्त
त्वासंभवात् अवयवस्य ङ्यन्तत्वेपि ततः सोर्विहितत्वाभावात् परत्वं त्ववयवङ्यन्तादस्त्येव
तस्मादतिमुन्नरस्योति ज्ञायते निर्दिष्टविहितविशेषणासंभवान्नेति भावः अत एव यस्येति सूत्रे गो
स्त्रियोरिति सूत्रे च भाष्ये ऽविभक्तिक बहुश्रेयसीति प्रयोगः संगच्छते तत्रत्यकैयटस्तु ग्रामा
दिकर्तृत्ववधेयं यासकैत्यादावव्याप्तेश्च नच हल्तेनाद्विहितत्वेन निर्वाहः यः स कर्त्रेत्यादा
वतिव्याप्त्यव्याप्तेरिति दिक् केचित्तु विशेष्यासंनिधानाद्धलः परे ङ्याप्श्च परमितिवृत्तिरन्ति

न्नाइत्याहुः हलिति तस्य सुतिसिद्धरूपत्वं स्थानिवद्भावेन बोध्यं लुप्यते इति अनुवर्त्तमानेल्लोप
शब्दस्याभावसाधनत्वेपि हलिति प्रथमांत सामानाधिकरण्यान्न कर्मसाधनत्वमिति भावः य
द्यपि तस्मादित्युत्तरस्येति परिभाषया नलोप संनतापि संभवति तथापि बहुषु पदेषु विभक्तिवि
परिणामकल्पनापेक्षया एकं लोपशब्द एवार्थं तरकल्पनमुचितमिति भावः सखेति
नानलक्षण उपधादीर्घः यद्यपि सख्यु रसंबुद्धाविति सावर्ण्येन परत्वेनानङ उपधाया इति
वृद्धिरुचिता एवं चात्रैव तल्लक्षण उचितः तथापि फलेविशेषाभावात्सुनामकप्रसंगित्वेन दीर्घ
स्यानित्यत्वाच्च सख्युरसंबुद्धाविति णिद्वद्भावमुपजीव्य प्रवृत्तत्वेन वृद्धेर्बहिरंगत्वाच्चेन।
दोष इत्याहुः हलङ्याप्भ्यः किमिति रामइत्यादौ दीर्घांतत्वाभावाददोष इति प्रश्नः दीर्घा
त्किमिति ङ्यापोर्दीर्घत्वाद्विशेषणं व्यर्थमिति प्रश्नः निष्कौशाम्बिरिति नच सुतिसीति प्रत्य
येगताहेयपानु उपसर्जनस्त्रीप्रत्ययेन्तदादिनियमसत्वाच्च अंगस्य ङ्यावं तत्वाभावे[illegible]ननाव
दोष इति वाच्यं आलोपेक्षया दिन्नस्य वा विशेष्यतया शब्दान्वयित्वे मानाभावात् किंचैकमपि
वक्ष्येयसीत्यादिसिध्यर्थं प्रत्ययग्रहणपरिभाषयांगस्य विशेष्यत्वेन यथेन विधिरिति परिभाष
याचटिदृण् इति सूत्रे एंनादिति वक्तुङ्यावं तांतादित्यस्यावश्यकत्वेन दीर्घग्रहणाभावेदो
षस्यस्पष्टत्वान् मालेत्यादौ तु व्यपदेशिवद्भावेन सिद्धिः अप्रातिपदिकेनेति निषेधस्तु प्रत्यय
विधिविषयः अवविष्टाक्रुजातः अविष्टइत्यत्र इत्यत्र तद्धितलुकि स्त्रीप्रत्ययलुकि च प्रत्यय

163

प्रा॰शे॰ नत्वेणेनाबंनत्वादतिव्याप्तिवारणार्थं दीर्घग्रहणस्यावश्यकत्वाच्च नच गंगीयतेः क्विपि गं
गीरित्यत्रैकारस्य स्थानिवद्भावेनाणुत्वाद्दीर्घत्वाभावादतिव्याप्तिः नत्याऽस्यत्वीर्ई दैवदत्तस्य ई
द्दैवदत्तेरित्यादावतिव्याप्तिरिति वाच्यं उञीर्ई आश्राविति प्रश्लिष्टदीर्घग्रहणस्य प्रत्याख्यानेना
दोषात् दीर्घग्रहणेनोपस्थितत्वादीकाररूपस्यैव दीर्घस्य ग्रहणाच्च अपृक्तं किमु विभक्ती
ति काचित्कोपपाठः विशिष्टस्याहल्त्वात् सुतिसिरूपं हल्तिति सामानाधिकरण्येनैव मूले
व्याख्यानात् एवं चापृक्तग्रहणं चिन्त्यप्रयोजनमेव स्पष्टं चेदं भाष्ये ननु सुरां सुनोतीति
सुरासुत् तमाचष्टे इति णेनालृ क्विपि सुराः सुरासाविन्यादौ सुनोत्यवयवसुलोपवार
णार्थं तत् नचणौ चङीति सूत्रस्य भाष्यप्रामाण्येनेगुपधेभ्यो णिच्ञास्तीति केयटादिभिः।
सिद्धान्तितत्वेन कथमत्र णिजिति वाच्यं तद्भाष्यस्यनेकांलुङि प्रयोगाभावमात्रकल्पनेनोपप
न्नेस्सर्वैर्थाणिजभावकल्पनस्य केयटायुक्तस्याप्रामाणिकत्वात् इति चेन्न प्रत्ययाप्रत्यय
योरिति परिभाषया परस्परसाहचर्येणानुनासिकोकारपाठेनच विभक्तेरेवसोर्ग्रहणेनादोषा
त् वस्तुतो गंगीरित्यादीनामभिधानेऽप्ररवानं चिंत्यं अचेदं चिंत्यं स्थापोरितिसोरेव विशेष
णम् नतु तिस्योः व्याख्यानात् तेनगंगाप्रावृटादावार क्विवंतात्लुङि ति सयोः शापि अगंगाता इ
त्यादौ कस्यस्त्रीकीनतः ह्नाश्राह्ना श्राचार क्विवंतात् यड्लुकि लङि अचेकेदनात्तादित्यादौ च लो
पोन नचागंगादित्यादौ शया व्यवधानं एकादेशस्य तस्य पूर्वांतत्वेन ग्रहणात् न च स्थानि
वद्भावः अपूर्वविधित्वात् नचैवंवृद्धावित्यादौ संनिपात परिभाषया टापूर्नेति भाष्योक्तं विरु

ध्माने इति वाच्यं दीर्घग्रहणं तु तरं स्त्रं नादिवन्नावप्रवृत्त्यापि टावन्त्यकालिकार्थं नं तर्यं विज्ञातस्य तेन वारयितुमश
क्यत्वात् केचित्तु अचेकेदित्यादौ ईकाररूपत्वाभावाद्भाष्यमतेन प्राप्तिः स्त्रमतेपि दीर्घग्रहणेन तदुप
स्थितत्वात् ईकाराकाररूपस्यैव दीर्घस्यैव ग्रहणान्न दोषः अत एव गंगामिच्छति गंगीरित्यादौ न त्सुलो
पः एवं चेकाररूपइंनान्तस्योः संभवेन तत्साहचर्यादापोपि सोरेव लुक् न च कीशब्दात् क्वन्नेनात +
क्विपि आचारक्विपि यङ्लुकि क्वौ लुप्तमित्यस्यासार्वत्रिकत्वात् स्थानिवत्वेन गुणप्रवृत्तौ ईकाररूप +
इंनान्तस्योः संभव इति वाच्यं यणो दुर्वारत्वात् आचारक्विवन्नाद्यङ्लुक् सत्वे मानाभावादित्याहुः अ
त एव यदि पुनरयमस्य क्नलोपः संयोगान्तलोपो विज्ञायेत हि हल्ग्रहणं तिस्योश्च ग्रहणं न कर्तव्यं
भवतीत्येतत्त्र उपक्रमस्य भाष्ये संगच्छते यदि ड्याब्ग्रहणं तिस्योरपि विशेषणं स्यात् [illegible] कथं ति +
स्योर्ग्रहणस्य कर्तव्यतां ब्रूयात् तदेतत्सर्वं यादृशानामभिधानसत्वे युक्तं न च हल्ग्रहणाभावे रा
ज्ञेत्यादौ सोः संयोगान्तलोपस्यासिद्धत्वात् न लोपो न स्यादिति वाच्यं न ङिसंबुद्ध्योरिति संबुद्धिग्रहणे
न विभक्तिलोपस्यासिद्धत्वाभावज्ञापनात् अत एव गोमानित्यादौ नलोपो न नलोपस्यासिद्धत्वा
द्बाधमानाभावात् लक्ष्यभेदात्त्र नत्रवारं वारं संयोगान्तलोपः न च सावपि पदमिति पक्षे तद्वारितार्थ्यं
तस्यज्ञात्वश्रयणे प्रकृतेपि न लोपसिद्धेः न च तस्य ज्ञाश्रयणे राजेत्यादौ संयोगान्तलोपस्यासिद्धत्वा
न्नलोपे सोरुत्वविसर्गौ स्यातामिति वाच्यं उक्तार्थज्ञापकेनादोषात् तथाहि न प्रीतिस्त्रे ङिसंबुद्ध्यो
रिति षष्ठ्याश्रयणात् अत एव ङौ न लोपनिषेधः सार्थकः अन्यथा ङेर्लुकान्तु त्ततया तत्परत्वं दुरूप

164

श·कौ· पादं स्यात् नच नलुमतेति निषेधान्नित्यत्वात्तत्रदोषः तदपेक्षयापि कृतं तन्त्रयाग्याख्यानस्यैव लघुत्वात् ए
वं च संबुध्यंतं प्रातिपदिकं वा स्यात् न तस्य लोपनिषेधोनेन नहि प्रथमं संयोगांतलोपं विना संबुध्यंतं प्रातिपदिकं
नांतं लभ्यते असिद्धत्वाभावं विना च प्रथमं संयोगांतलोपदुर्लभः नचहे ब्रह्मन्निति नपुंसके नलोपनिषे
धाय तदावश्यकं नत्रहि स्वमोरिति लुगिति वाच्यं संबुद्धौ वा नपुंसकानां नलोपो वाच्य इति वार्त्तिकस
त्वेन फलाभावात् नत्वङि·संबुध्योरित्यस्य वक्तुं तत्वपक्षे विकल्पार्थमावश्यकं नचवानपुंसका
नामित्येव भाष्ये पठितं संबुध्यग्रहणं च सूत्रादेव संबध्यत इति तदर्थं संबुद्धिग्रहणस्य चारितार्थ्या
त् कथं ज्ञापकत्वमिति वाच्यं अत्रपाटेनोक्तार्थज्ञापकत्वस्यापि संभावात् एतेन संबुद्धिग्रहणस्य
भाष्ये प्रत्याख्यातत्वेन ज्ञापकतानानयुक्तेति परास्तं सूत्रस्थङि·ग्रहणस्य ङि·संबुध्योरनुवर्तते वार्त्ति
कस्थसंबुद्धिग्रहणस्य च प्रत्याख्यानेपि सूत्रस्थस्य तस्याप्रत्याख्यानात् उत्तरग्रंथे निरूपयिष्यामः
। एवं च ज्ञापकं सूत्रस्थं एतेन राज्ञेत्यादौ सावयवपदत्वान्नलोपे कृते सोरुत्वविसर्गौ स्यातामित्यपास्तं
विभक्तिसंयोगांतलोपस्यासिद्धत्वाभावज्ञापनेन परत्वात्पूर्वं संयोगांतलोपस्यैव प्राप्तेः नहि प्रथमं
संयोगांतलोपं विना संबुध्यंतं प्रातिपदिकं नांतं लभ्यते ङि·संबुध्योरिति पर्युदासोक्तमेव एतेन रा
ज्ञेयतेत्र चाकाराज्ञां च क्रामत्र राज्ञा कतमित्यादौ वृद्धिद्गलोपदीर्घेयणनुगादिकं न स्यात्संयोगांत
लोपस्यासिद्धत्वात् इति परास्तं विभक्तिसंयोगांतलोपस्यासिद्धत्वाभावज्ञापनात् एतेन चाकारा
ज्ञामित्यादौ टुलोपदीर्घा न स्यात् अदभिमो बहुत्वात्त्वं च न स्यादित्यपास्तं संयोगांतलोपो रा

कृत्वेत्यत्र सिद्धकाण्डे पाठाच्च अत एव हरिशब्दान्मतुपं कृत्वा दसीयदिति वत्वे नुमि संयोगान्तलोपे मत्वसोरि
ति रुत्वे उत्वे गुणे हरिवो मेदिनं त्वेति सिद्धं संयोगान्तलोपो रो कृत्वे इत्यस्याविनिगमनाविरहान्न मुनेरित्यत्र वङ्ले
कृत्वेत्येकृते चेति व्याख्यानेनेङः पदान्तादिति पूर्वरूपे प्रसंयोगान्तलोपो नासिद्धः नन्वेवमपि रात्सस्येति नि
यमेनाविभभवादित्यत्र लोपानापत्तिः तत्र तकारस्यापि ग्रहणेनादोषः इत्यस्य भाष्ये एवोक्तत्वात्
कीर्त्तयतेर्यङि क्विप्सु चोस्त्तदा कीरित्येव तूपं एवं रत्नेर्यङ्लुकि क्विप् वर्वर्इत्येव कीर्त्तयतेः क्विपि क्विपावे।
वन स्तः वृत्वाधातोर्यङ्लुकिर्ईड्भावे तिपुम्सिपोः प्रयोग एव नास्तीति तत्त्वं तदुक्तं भाष्ये यथालक्षणम
प्रयुक्ते इति अप्रयुक्ते लक्षणप्रवृत्त्यभावस्य योग्यतेति तदर्थः नन्वेवं काष्ठतक्षागेव नास्तीति परेऽष्टयो
कयोरिति सूत्रस्थभाष्यप्रामाण्येन संयोगादिलोपप्राप्तियोग्यकान्तशब्दाभावेपि सुपीत्यादौ सं
योगादिलोपः स्यात् पदान्तसंयोगादिलोपस्य संयोगान्तलोपापवादत्वात् तथा च वर्वो रूपधाया इ।
ति दीर्घो न स्यात् तथा हर्यादिधातुभ्यो यङ्लुङिति सिपोः संयोगान्तलोपस्यासिद्धत्वेन लोपो व्यो।
रिति लोपापत्तिः यथान्यासे कृतव्यूह परिभाषया परत्वान्नित्यत्वाच्च हलङ्यादिलोपप्रवृत्तौ वल्पर
त्वाभावेन प्रवृत्तिः प्रत्ययलक्षणं तु न वर्णाश्रयत्वात् इति चेन्न तिप्त नस्त्वोः सिपि धातो रुर्वेति सूत्रा
भ्यां धातुसंबंधिपदान्तसस्य दत्वरुत्वविधायकाभ्यां कसाहचर्येण च प्रकृतिप्रत्ययसंबंधिवर्णसंयोग
माश्रित्य पदान्ते संयोगादिलोपाप्राप्तेर्ज्ञापनेन सुपीत्यादौ दोषाभावात् न च चकासादेः पंचाघ
ज्ञेनाद्याख्यानेण्यचि ततः कर्त्तरि क्विपि तत्त्वाचारक्विपि लङि अस्त्रोपाणिलोपयोः स्थानिवत्त्वात्

165

प्रा॰ प्रौ॰ संयोगादिलोपाभावे संयोगान्तलोपेऽपि गुञ्जस्त्वहूयं चरितार्थमिति वाच्यं शाणाव्यवधानेन संयोगादा
चात् लुक्कृन्तु लेभः लाहलौकिकत्वेनाद्विप्रभृतिभ्यत्वन्नेषामग्रहणात् धातुग्रहणसामर्थ्येन सि
पिपातोरित्यस्य नामधातुप्रवृत्तेश्च एतेनोस्वास्त्र दित्यादौ हत्वस्यासिद्धत्वात् संयोगादिलोपः स्यादिति
पास्तं सिद्धकांडे वस्वादिषु दत्वमिति पाठाद् हत्वे कृते नदृशाज्ञेश्च नन्वपदान्तत्वाद् हत्वं न स्यादिति चे
न्न सावपि पदमिति पक्षाश्रयणात् एवंपक्षस्य हलेन नपुंसके उपपादयिष्यते यङ्लुकः क्रांद
सत्वाद्धर्यादौ न दोषः किंच विभक्तिसंयोगान्तलोपस्यासिद्धत्वाभावज्ञापनात्तु दोषः न चकाष्टतीति न
काष्टतेङित्यादौ स्कोरिति कलोपे कृते सलोपो न स्यात् अपवादविषये उत्सर्गाप्रवृत्तेरिति वाच्यं अप
दस्याचारितार्थ्यं एव तदप्रवृत्तेः अपवादप्रवृत्त्युत्तरं तत्प्रवृत्तौ बाधकाभावाच्चेत्याहुः एवं च दीर्घा
नूङ्ग्रापः सोरिति सूत्रे यत्नमुचितं आकारेकारप्रश्लेषेण दीर्घग्रहणं व्यर्थ्याख्यानेन तु ङ्यापः +
सोरित्येवास्तु वस्तुतस्तु ज्ञापकसिद्धं तत्तदानुमानिकवचनकल्पनापेक्षया पाठ्यत्वात् समेत्य
चु किंच नङिसंबुद्ध्योरिति सूत्रमपि वयुक्ता ङिग्रहणसामर्थ्याच्च न लुमतेत्यस्य तद्विषयेऽनित्यत्वं
एवं च तदनित्यत्वे कलमेव वा नपुंसकानामिति वार्त्तिकं एकं च वस्तु नाद्यर्थे संबुद्धिग्रहणस्य वशपक
त्वेन ज्ञापकासंभवः अन्यथा एवं वचनकरणेन व्याख्यानेन तु नरमलीयं किंचैवं वस्वादिषु दत्वमिति नका
र्यमित्यपरे लाघवं अधातुग्रहणेन वदीर्घाभावसिद्धेः इदमेवाभिप्रेत्य सूत्र प्रोषे भाष्ये न स्मादृशां को
हलएकलोपः संयोगान्तलोपो घितानं नचेद्विज्ञापते हि हल एकत्यग्रहणं तिस्यो ञ्श्रग्रहणं कर्त्तव्य

मित्युक्तं सखेत्रियस्यापि अत्रैव संबुद्धावित्यादिना लउचितत्वस्यापि नांतनलक्षणादीर्घेनैव सिद्धेर
न उपधायाः स्त्वमेव लक्षणानित्यत्वेन नतस्येवोचित्याद्यात्रनेनैवं संबुद्धः इतोऽदित्यतोऽनुवर्त्तते सर्वनामस्था
ने इति अत्र संबुद्धावितिवर्गानोऽन्यादित्यतोऽनुवर्त्तनानादित्यनेन सामानाधिकरण्याय षष्ठ्यमस्याविप
रिणम्यते इत्याह संबुद्धिवर्जमिति यद्यप्यसंबुद्धिरिति वक्तुमुचितं अत्र नङ् सावित्यत्रैव सत्रस्याविप
रिणमः शाकः कर्तुं न त्वात् विविभिन्नविभक्तिकत्वात् सर्वनामस्थाने इत्यस्य निवृत्तिराशंक्येतेतिय
थान्यासमेवोचितं मृजेर्वृद्धिरित्यतो वृद्धिरित्यनुवर्त्तते अंगस्येति चाधिकृतमचो विशेषणमि
त्यभिप्रेत्याह अजंतेति वृद्धिरितिवचनेनार्ययात् एणनिर्देशान्न संदिग्धत्वादविशेषणलाभ योग्यग्रहण
मित्याह स्त्रि तीत्यादि अकारस्तत्र इह श्रवणार्थः ननु मुख्यायुस्त्यादिशब्दे कृदेशानुकरणेन स्व
र्थः यन्मुनेः संख्यायाः संवत्सरसंख्यस्य च आपत्यस्य चेतङ्इतेना तीत्यादिनिर्देशादितिभावः
एक पूर्वपरयोरित्येतदधिकारानिवृत्त्यर्थं परस्येति अत्राप्यतीत्यनुवर्त्तते ङसिङसोर्विशेषणस्य
कारान्तो ङसिङसोरिति आदेः परस्य तकारस्य ङसिङसोरततरिति फलितार्थकथनं यद्वावेयधि
करण्येनैवान्वय उकारानुवर्त्तेरिति नदीघिसंज्ञारहितस्य तस्याभावात् न च येङ्लुभ्यामव्यय
इत्याभ्यांवाधादितिभावः न च नदीसंज्ञकेषु परत्वादिति दंशाकां पूर्वसूत्रे उकारोच्चारणादेवैष पर्य्या
यत्नेः सखसखेति न ह्रस्वनादितिनिषेधाद्दान्नाहः सखिशब्द इति टत्र समुदायस्येति पर्युदासेसमु
दायस्य सखिभिन्नात्प्रसज्यप्रतिषेधेपि समुदायनिष्टं घित्वस्यावयवनिषेधेनाप्यनिवार्यत्वात् नच
पर्युदस्य मानसमर्थके सखिशब्दे न दंतग्रहणं शंकां विशेष्यासंनिधानादितिभावः अत्र यद्व

शौ॰ शा॰ क्तं तन्न घिसंज्ञासूत्रे एवोक्तं गोणान्नेपीति अस्याप्यनङ्गुदिति भावः अत एव येन विधिरित्यत्र पर
मसंख्यायाविति बहुव्रीहिः तत्पुरुषे हि टचाभाव इति कैयटः असमस्तं तु न तदंतविधेः अस्क
मात् अत एव बहुत्वं क्रोष्टुरिति सूत्रे निसखीनीत्युदाहृत्य एष्ठ्वंश्च भावः शास्त्रोरुथोत्वे निर्द्वेविशति
षेधात्रभवतीत्युक्तं भाष्ये नहि तत्समानाधिकरणे तत्पुरुषे मिश्रीवेसखाहृयोरितिकोशो नस
त्विग्राह्यस्यानपुंसकत्वबोधनात्रपुंसकत्वानापत्तेः अत एव भाष्येऽसमस्तमेव सखीनीति नोदा
हृतम् ब्राह्मणकुलानीति विशेष्यं चोदाहृतं अन्यादयश्चेति तत्पुरुषे बहुव्रीहौ वा गौणत्वं स्य
ष्टमेव अत एव चाद्वितीयाश्रितेति सूत्रे तत्पुरुषविषये बहुव्रीहिं नेच्छन्ति पक्षमप्युभयं स्वत्वपीष्यते
सोमसखो गवां सखिरिति भाष्यं संगच्छते पूर्वत्र बहुव्रीहित्वान्न टच् उत्तरत्र ष्यसाप्याकोशाद्
तिवक्ष्यामस्तु गिति दिक् पतिः समासे एवकारश्च तोवधारणार्थः अन्यथा समासे पतिरेवेत्यपि सं
भाव्येत धात्वादेरिति ज्ञापकाश्रयणेनैव प्रति पतिर्गोभवं स्यात् पति शब्दोत्र स्वामिपर्यायो गृह्यते प
सिद्धत्वात् नत्विकप्रत्ययान्तः पतधातुः तेन पतनाधायतुत्नेति सिद्धं नापि पतिरित्याख्यातः पतिः
लोपश्च तोपेश्च चश्चरित्यौणादिके प्रत्ययान्तस्य ग्रहणं लाक्षणिकत्वात् अत एव सीतायाः पतये
रि इत्यसिद्धं एतेन सखिनावानरेन्द्रेणेत्यादि व्याख्यातं आसाधव एवैते विशंकाद्यपयाज्ञपयान्तनादि
बन्नयोर्महात्मशालिनां मुनीनाम साधुप्रयोगोपि नातीव बाधक असदाद्दीनामिति स्वनिपुराणाध्य
न विधिबलात् ब्रुपांतपो माहात्म्यबलाच्च नदं तेर्गन्तव्या ठो न बाधकः स्यात् त्रोणेद्रूपांप्रयुक्तानामस्यमा
दायः प्रत्ययवत्येव नदीसंज्ञासूत्रस्थभाष्यकैयटहरदत्तैः एवं तत्र हि कृंदौ च तत्कवयः कुर्वंति

इतितन्त्रान्तरेष्वपिदृष्टत्वात्प्रतिपत्नीसुन्दरमित्यन्ये अत्रशेषोबहुव्रीहिर्नवर्तते तत्स्यचपतिरितिविशेषणं॰
तेनपतिशब्देनतत्पुरुषःसमासएवघिरित्यर्थः अतएवबहुव्रीहेर्बहुपत्न्येत्यादौघित्वंन
अतएवपतिरेकान्तावेवतिनासरत्रि पतिरितिप्रथमान्तदेनसंज्ञापदत्वेयुक्तेव वर्णसंज्ञापदे पत्न्यवयवत्वका
पत्न्यवयवेकारःसमासएवेत्यर्थः भूपत्यादेःसमासेविद्यमानत्वंतत्त्वापदेशिवद्भावेनस्वेप रान्तइत्यर्थः
तिशब्दस्यतदवयवेकारत्वात्तत्कः नचशेषोघ्यसखिपतीत्येवतस्यताम् सखासखिनेत्यादिव
लि त्सुपतिनेत्यादिसिद्धेरितिवाच्यं बहुपत्न्येस्यानापत्तेः किंचपतिगृहेपतिसखीस्यादौपूर्वनि
पातनियमानापत्तेः केवलपतिशब्दस्यघित्वाभावात् यथान्यासेतुकेवलत्वेस्यपतिशब्द॰
स्यैवघित्वमितिस्पष्टमेव अतएवपतिसखीसमासएवेतिनसूत्रितं गृहसख्योर्योसखिगृ
हेत्यत्रपूर्वनिपातनियमापत्तेः त्वदुक्तन्यासेकेवलस्यापिसखिशब्दस्यघित्वात् यथान्यासे
तुनेतिस्पष्टमेवेत्याहुः वस्तुतस्तुयस्येतिचेतिसूत्रस्थभाष्यरीत्यासुपतिनासुसख्येत्यादौ॰
छान्दसत्वात्यथान्यासःकर्तुमशक्यएवेतिबोध्यं नित्यंबहुवचनान्तत्रति किमःसंख्यापरिमा॰
णडत्यनेनकिंशब्दात्संख्यापरिमाणेवर्तमानाड्डतिःसंख्यावच्छिन्नेस्मिन्नभिधानात् अतएव
वकिमित्येतत्परिप्रश्नेवर्तते परिप्रश्नश्चानिर्ज्ञातेअनिर्ज्ञातंचबहुषुद्वयोःकयोःपुनर्निर्ज्ञातमेवेति
डतिसूत्रस्थभाष्यंसंगच्छतइतिभावः बहुगणः संख्याशब्देषुएतत्र्यायोपयोगस्तुअभ्यासा
म्रेडितादिसंज्ञाविषयेद्रष्टव्यः तन्त्रानुसारात्कर्मादिगोत्रादिसंज्ञाविवक्षापिप्रकरणानादरः

पाठांतरे नचानियतसंख्यावाचिनां चेद्बहुगणयोरेवेति नियमोस्तु अनेतंवाचिन्यान शब्दस्यानियतसंख्यावादिनः संख्याका
यीनापत्तेः ममतु न दोषः संख्यातिरिक्तार्थे

167

प्रा॰ शे॰ त्तिनत्वं कृत्रिमाकृत्रिमन्यायो न प्रवर्त्तेते संख्याया अतिशब्देनायाऽइति शब्देन पर्युदासात् तेन च
लडक्तन्यायं मूलस्य संज्ञाविशेषो क्रियमाणस्य संज्ञानिदमनिष्टस्य सामान्यापेक्षत्वस्यानाश्रय
णात् त्रिमांतरव्यावृत्तिरूपविशेषापेक्षत्वस्य चाश्रयणमिति बोध्यं अत एव पंचकृत्व इत्यादिसि
द्धिः नन्वेवं बहुगणग्रहणं व्यर्थं द्व्यादीनामिव लोके संख्यावाचकत्वादेव प्रदेशेषु ग्रहणसि
द्धेरिति चेन्न अर्थांतरवाचित्वे सति बहुत्ववाचिनश्चेत्संख्याकार्यं तर्हि बहुगणयोरेवेति नियमार्थं
त्वत् तेन भूयादीनां न तेषां वैपुल्याद्यर्थांतरवाचित्वात् अबहुत्ववाचिन एकशब्दस्य बहुत्वमात्र
वाचिनां त्र्यादीनामनेकवाचिनः शतशब्दस्यानियतसंख्यावाचिनोपि व्यावृत्तिः त्र्यादीनामर्थां
तरवाचित्वाभावात् एतेनानियतसंख्यावाचिनां चेद्बहुगणयोरेवेति नियमस्त्वायास्त्वं वत्
वृत्तिसामान्यं धनिर्देशाद्ब्राह्मणवदित्यादिव्याख्यानं निरस्तमिति दिक् संघवैपुल्यवाचकयोस्तु गणबहु
नेह ग्रहणं संख्यायते नयेति अन्वर्थसंज्ञाविज्ञानात् अत एव डतिस्तद्धित एव साहचर्यादित्याहुः
स्वांतावडित्यतः षडिति वर्त्तते संख्येति च प्रकृतं डतीत्यनेन विशेष्यत इत्याह डत्यंतेति ननु संज्ञा
विधौ तदंतग्रहणाभावात् डतेरेव संख्यासंज्ञत्वात् डत्यंतासंख्येत्यनुपपन्नं न च केवलस्य संज्ञायाः
प्रयोजनाभावः अंगाधिकारे तदंतविधेः सत्वेन षड्भ्यो लुक् एव प्रयोजनसत्त्वादिति चेन्न संख्येत्य
न्वर्थसंज्ञाविज्ञानात्संख्याप्रश्नविषयार्थवाचिन एव डतेर्ग्रहणात् तादृशार्थवाचकत्वं च न केवल
प्रत्ययस्येत्यवश्यमाश्रयणीयः संख्यासंज्ञायां तदंतविधिः अत एव कतिभिरित्यत्र षट्त्रिचतुर्भ्य इति

विभक्त्युदात्तत्वं भवतीति न किंचिदनुपपन्नं संख्येति किम् पतयः प्रत्ययस्य अनेकसंज्ञाकर
णं सामर्थ्यात् बाधाश्रयणेन तद्भाविनसंज्ञाश्रयणे मतेन संकरः तस्मिन्निति हेतीत्यादौ ष्णाचि
ति ह्नित्वादि स्यात् तदाह लुक्श्लुलुपस्त्रैरिति अदर्शनं लोप इत्यनो अदर्शनमित्यनुवर्तते प्र
देशेषु तु भाविसंज्ञाविज्ञानान्नान्योन्याश्रयः विशेषविहिताश्च एता लोपसंज्ञां न बाधन्ते ए
कसंज्ञाधिकारादन्यत्र संज्ञासमावेशस्योक्तत्वात् तेन प्रत्ययलक्षणसिद्धिः एते च विधीयमा
नाः सर्वादेशा एव क्सस्याचीति लोपे प्रकृतेऽलुग्वा दुहदिहेति लुक्प्रग्रहणात् प्रत्ययग्रहणं
प्रत्ययादर्शनस्यैवैताः संज्ञाः स्युरिति अत एवास्त्यर्कोऽपि न्यायेऽरित्यादौ प्रत्ययविशेषानुपा
दानेऽपि प्रत्ययस्यैव लुक् सिद्ध्यति तस्त्राषाय षट्शब्देन षट्संज्ञकः षान्तसान्तार्थसंख्याश्र
यस्तु उभयमपि विवक्षितं तेनैव कृत्वा इदं बहुवचनं तत्रार्थान्तरत्वं स्वगतं संख्यानुवादकत्वं
वेदं च षड्भ्यो लुक् जस्शसोः पञ्चासोऽस्मिरित्यत्र जश्शसोरित्यनुवर्तते बहुवचननिर्देशा
र्थप्राधान्यस्य च नार्थः षडर्थगतसंख्याभिधायिनोरिति फलितोऽर्थः निरूपयिष्यते चेदं हलेति
प्रत्ययलोपे इदं सूत्रं यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्रालविधौ विध्यर्थं तेनानन्तरेऽपि इत्यत्र ह
लादौ पिति सार्वधातुके विधीयमान ईट् भूमित्रशीरित्यादौ हलादौ किति विधीयमानमीत्वं सि च
ध्यति अहः प्रत्ययस्येत्यनुवृत्त्या सिद्धे पुनराद्यप्रत्ययग्रहणं मुख्यप्रत्ययलोपे एवं यथा
स्यात् अवयवलोपे माभूत् तेनाघ्नीयेत्यादौ नानुनासिकलोप इति भाष्ये स्पष्टं इदमेव प्रत्यय

108

प्र॰ द्वा॰

ग्रहणं ज्ञापयति अवयवेपि समुदायेहणः आहादेरित्यायेन प्रत्ययत्वप्रयुक्तकार्यस्येति तल्लक्षण
मित्येव सिद्धे द्वितीयप्रत्ययग्रहणं तु प्रत्ययस्य यत्र वर्णा विशेषणत्वेन रूपं प्राधान्येन तत्र यथा स्या
दित्यर्थं तेन प्राधान्येन यत्रालाश्रयणं तत्रैव विध्यर्थं किं न स्यादिति न शंक्यं नापि स्थानिवदि
त्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणग्रहणं किमर्थमिति शंक्यमिति वार्त्तिकमतं भाष्ये तु शासइत्
अङि अजादौ क्ङिति चेदङो वेति नियमात् अजादिव्यावृत्तो शासइदित्यत्र हल्ग्रहणाकर।
णेन स्थानिवद्भावादेव मित्र शीरित्यादिसिद्धिः आपत्त्वेतत्त्यादौ तु न शास अनुशिष्टावि।
त्यस्यैव तत्र ग्रहणात् आशीरिति तु आशासः क्वावित्येव सिद्धं क्विपाशीरिति निपातनाद्वा ल्लण
हरनिरस्तरेचि नेत्यनुवर्त्यतेऽणहानीत्यादिव्यावृत्तो हलीत्यनेनु … त्याऽन्त्ये … डित्यादिसिद्धमित्यादिरीत्या
विधिफलानामन्यथासिद्धिं निरूप्य स्थानिवत्सूत्रेणैव सिद्धे नियमार्थत्वमुक्तं द्वितीयप्रत्ययग्रहणं
तु नियमविशेषलाभाय यथाप्रत्ययस्याऽसाधारणं रूपं यत्राश्रीयते तदेव कार्यं प्रत्ययलोपे सति भव
ति न तु प्रत्ययाप्रत्ययसाधारणमिति तेनस्तु … सादइत्यत्रासोऽलुक्कुः स्थानिवत्त्वेनासत्त्वादसंतत
स्यार्थं समानग्रस्तत्वेपि … संनस्येति दीर्घो न नचानुसाहचर्यात् श्रूयमाणासं न एव दीर्घप्रवृत्तिः
सोमेनसीति … लोमेवसीति पर्युदासेनश्रूयमाणासंतस्यैग्रहणमिति नियमोपि व्यर्थ इति वाच्यं
पाठांतरं अनुसाहचर्येण प्रत्ययावयवस्यैवासो ग्रहणबाधतोरित्यस्यैवयथोपत्यानत्र साहचर्यस्या
श्रयितुमशक्यत्वात् किंचैवसति … नाइत्यादौ तु डागमेप्रत्ययावयवो यत्रासत्तत्रैव स्यात् न तु स

पयात्कृत्यादौ प्रत्ययो हृद्यन्नास्ति एवं सोर्मनसीत्यत्र पर्युदासे प्रत्ययोः संनद्धस्यैव ग्रहणं प्राप्नोति स्वरत्वादौ ॥
स्वरान्तात्प्राप्नोतीति भाष्याशयः अतः उपान्तस्य शाह्वात्तस्यावस्थानं एतत्तात्कत्वेऽभिविधिरिति भाष्ये नन्वमा
सेस्सोर्मनसीति स्वरस्य स्थानिवद्भावेन ह्रस्वस्यासिद्धत्वात्तानाह श्रावयेत्स्रुच्युत्तमं शाकेति भाष्या
शयात् तत्र हीह वद्भावादिलोपेनान्तलोपः न च तस्यानेन नियमेन वारणं प्रत्ययत्वात्तद्वशः
कतसिरित्युणादिसूत्रात् उणादीनामव्युत्पन्नत्वाच्चेति दिक् विधयश्चैते तु सूत्र ह्रद इत्यादौ स्वरा
डौरा स्थानिवद्भावस्यानिरुक्तेः न च वार्त्तिकमतेऽपि विधिसूत्रंकं चिन्त्यं तत्रोपत्वत्वं स्थित एव सिद्धे
ग्रहणात् तद्धि सामानाधिकरण्येनान्वयबोधनार्थं तस्याश्च काचित्क्वत्वं फलितं तत्सामर्थ्या
च्च स्थानिवत्त्वस्यापि प्रवृत्तिरनेन न दोष इति वाच्यं नन्वेकमतेनैतत्सूत्रस्यैव पर्याप्तेः नन्वेवं दा
धर्त्तीति सूत्रस्य भाष्यमसंगतं स्यात् तत्र हि तेति तः इति किं निपात्यते आत्मनेपदं नेनदत्विति त्र
नुदात्तङित इत्येव सिद्धं नियमार्थं तर्हि भविष्यति अत्रैव यङ्लुगन्तस्य नान्यत्रैव मित्यादीतीति निय
मस्य सन्नानीयस्यत्वात्क्रमादावात्मनेपदं भवत्येवेति च भाष्यकैयटयोरुक्तं तद्धीत्यायङो लुह
किश्रत्ययलक्षणेनात्मनेपदं दुर्लभं ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वादिति चेन्न नियमार्थं
तर्हि भविष्यतीति वदता भाष्यकारेण समाधानेऽनास्थायां बोधयतातस्य शेषे द्विवाद त्वबोधनात्
तदुक्तं यङ्लुगन्तमनोरमायां दाधर्त्तीति सूत्रस्य भाष्यं तु विधिपक्षाभिप्रायेणेति न च पत्रस्थ
त्यस्याभिप्रायोऽस्त्वेतत्रैवेति नियमशरीरमस्तु एवं चेदं भाष्यं मुख्यपक्षाभिप्रायकमेवास्तु

पा॰श्रो॰ 169

इति वाच्यं ङिदं तादात्मनेपदे विधानेन प्रत्ययस्याविशेष्यत्वाभावेन भाष्यासामंजस्यात् राजेत्या
दौ प्रत्ययत्वानापत्तेश्च अन्येत्वावत्यास्तु लक्षणार्थे ह्येतावत्यर्थे लत्वानुरोधाद्व्यवच्छेदस्येत्याहुः वा
र्त्तिककृन्मते वर्णाश्रयेन प्रत्ययलक्षणमिति वर्णप्राधान्यविषयकं वर्णैकप्राधान्यं चेतराविशेषा
णत्वरूपं प्रत्ययनिष्ठविशेषणतानिरूपितविशेष्यतावत्त्वं चेति न दोषः तेन गवे हितं गोहितमि
त्यत्राचुस्वपराद्धत्वात्र विसर्जनीयस्य सत्वं स्तुत्वडसीङ्त्यत्र त्वारिचेति चर्त्वे चित्रायां जाताचित्रेत्या
त्यादौ ऋणोडकारस्तदन्तात्प्रातिपदिकान्ङीविति ङीप्च न च गोहितमित्यत्र लुप्तमतां गस्येति नि
षेधात्राव: प्राप्तिरिति वाच्यं लुप्तप्रत्ययनिमित्तांगोद्देश्यककार्यमेव तन्निषेधात् अत एव राज्ञा
मित्यादौ क्रमः परस्मैपदेष्विति दीर्घसिद्धिः परस्मैपद परस्मिन्निरूपितांगस्य तेन न दीर्घविधानं एवं च
प्रकृतेऽवादेशो वर्णमात्रोद्देश्यको नांगोद्देश्यकश्चिद्दोषः अत एव तस्मिन्नित्यपहायांगग्रहणं चरि
तार्थमिति दिक् तस्मिन्निति न्यासे पि उपस्थित शब्दयाहितप्रकृत्युद्देश्यककार्य एव प्रवृत्तिरिति दि
क् न च प्रत्ययनिमित्त्येव सिद्धे लक्षणग्रहणं व्यर्थम् प्रत्ययनिमित्तकमेव न तु प्रत्ययस्थानिकमि
त्यर्थलाभार्थत्वात् तेन नत्वैर्भिन्नो नत्वमित्र्यादावेसादिकं न ध्वनितं चेदं सुप्तिङं तमिति सू
त्रे भाष्ये स्पष्टं च कैयटे कार्यमिति कार्यातिदेशोयमिति भावः नन्वेवं परिवीवीरित्यत्र नकु दीर्घोपर्याये
ण स्थानां कार्यातिदेशोऽनेनेवोभयोरपि विधानात् विप्रतिषेधे परमित्यस्यापश्चन्नेरिति चेन्न सति
प्रत्यये यत्कार्यं भवितुमर्हति तदेवातिदिश्यते इति परिवीयेत्यादाविव परिवीरित्यत्रापि दीर्घेण

व न्नगिनिन दोषः कार्यातिदेशोप्यतिदिश्यपकार्याणामुत्पत्तिदेशस्यैव देशान्तं कार्याएद्धान दोषः न
च प्रत्ययेसत्यपि अंगाधिकारस्थ दीर्घापेक्षया नकोंतरंगत्वेन स एवा प्राप्नोतीतिनिवाच्यं वार्णात्।
दांगस्य बलीयस्त्वादित्याहुः लक्ष्यानुरोधेनैव शोधुशास्त्रातिदेश एवेत्यन्ये तद्ध्वनयन्नाह शुनितः।
सिचनिन लुमता लुशारीं वर्तते यथा नेलुमंत स्तेके क्यांकां तायामाह लुकस्तलुपदृति श्रत
एव कार्यते नन्वत्र णिलापेपि रहितर्म वत्येव अंगकार्यमिति लुमशप्यये परतः पूर्वस्य वस्तुतो नि
र्दिष्टांगसंज्ञकस्य यत्कार्यं मांगमनांगं चेत्यर्थः अतएवांगग्रहणं चरितार्थं अन्यथा पूर्वस्य
त्यवनुयात् तेन पंचेत्यादौ स्तवंतमिति पदसंज्ञा भवति राजपुरुषइत्यादौ भसंज्ञा च न अंगाधि
कारनिर्देशादिसास्यादेव नचसंज्ञिगमिषेत्यत्रातोहेरिति लुकि गमरिट् परस्मैपदेष्विति इण
नस्यादितिवाच्यं ननत्वचि संज्ञिगमिषितेत्यादिसिध्यर्थं परस्मैपदशब्दस्य तङानयोरभावोप
लक्षणत्वेन दोषाभावात् किंच परस्मैपदग्रहणस्य परस्मैपदपरसार्वधातुकस्येति सादिवि
ए शेषणतया परस्मैपदमितांगसंज्ञकस्य कार्याभावात् न दोषः अंगसंज्ञा लुक्यपि भवति नह्यंग
संज्ञातु निर्देशांगसंगकस्य कार्यम् अतएव पंचभिः क्रोष्टीभिः क्रीतं कुलमिति तद्धितार्थेति समासे
ठको ध्यर्धेति लुकि लुक्तद्धितलुकीति स्त्रीप्रत्ययलुकि पंचक्रोष्ट्रवंग संज्ञानिमित्तत्वन्नद्भावः
सिद्धि इदमेवाभिप्रेत्य न च परनिमित्तमाश्रीयते अस्मिन्परतः क्रोष्टुस्तृज्वदिति किं तर्हि
अंगस्य क्रोष्टुस्तृज्वदिति संज्ञा च भवति प्रत्ययलक्षणेनेति भाष्यं तत्तृज्वत्क्रोष्टुरित्यत्र यथोद्देशे

प्रा॰ शे॰ इदं कार्यकाले तु प्रत्ययनिमित्तत्वं स्यात् यथा वृक्षाद्यादौ एवं च स्त्रियां चेति सूत्रेऽयथोद्देशपक्ष
एवाश्रीयते इति कैयटादयः अत्र पक्षे च कर्करीतीत्यादावुरदत्वं कथमिति चेन्न तिवादेः प्रत्यय+
स्य परस्य सत्वेनाहतेः अन्तर्धा इति भाष्यप्रयोगेण प्रत्यासत्त्यैन्तरेणाश्रयणात् एतेनाभ्या
सांगाश्चित्तयोरेकत्वमेव तन्त्रवृत्तिरित्यपास्तं केचित्तु अंगाक्षिप्तप्रत्ययनिमित्तकं कार्यं लु
प्यभवत्येव प्रकारान्तरेणापि लुप्तप्रत्ययस्य निमित्तत्वे पिंतु निषेधो भवत्येव यथा अग्रवेगवे
इत्यादौ त्रादेशेन असावित्यपत्ये दासेनापि प्रत्ययस्य निमित्तत्वात् इति वदन्ति अत्र पक्षे भु
वेद्दितं भूद्दितमित्यादावुवङ्भावचिंता त्रिषुसरूपा इति ङे प्रथमयोरिति सूत्रस्थेन युष्मानि
त्यादौ तस्मात् क्सो नर इत्युपन्यासपरभाष्येणाक्वमोर्नपुंसकादिति सूत्रे शि ग्रीनुमाद्विमिर्थे
ष्मदस्मादेशानां विप्रतिषेधवार्तिके नन्नजाष्येण च न षडिति निषेधेन च लिंगसत्त्वावोधने पि लिंग
वोधकप्रत्ययानुत्पत्त्या तद्रूपेण विशेषत्वमर्थः अत एवाव्ययानामत्राग्रहणं तेषां लिंगाभावात्
अव्ययीभावस्य क्लीवत्वेपि लिंगान्तराभावाच्च विभक्तिश्रुतिरूपाणां लिंगयोगे पि त्रिषु सारूप्याभा
वात् इदमेव ध्वनयितुं मनोरमायामव्ययानां श्रयेणालिंगत्वादित्युक्तं सामन्त्राकमिति सूत्रस्था
लिंगे युष्मदस्मदी इति भाष्यस्यतु पदान्तरसन्निधानं विनालिंगविशेषो युष्मदस्मदकं कमात्रात्प्र
तीयत इत्यर्थ इति दिक् त्रेस्त्रयः त्रयादेशान्तसानः नित्यं त्रयाणामिति निर्देशात् नैत्रत्रयडे च

पाठे अन्तर्धा इति
भाष्योदाहरणेन
प्रत्ययत्वेन प्रत्य
यनिमित्तकाभ्या
सकार्येन तन्मते
ति निषेधस्यानि
त्यत्वेन प्रवर्त्त
नीकारात् इति
बोध्यं

वक्तृतो नकृतत्वमिति वाच्यं आचार्यक्विबन्तात्कर्तरि क्विपि त्विति शाब्दे आभिचर्याणामित्यसिध्यापत्तेः न
चतस्य वर्णागमत्वेन समुदायानवयवत्वात् त्विशाब्देन ग्रहणाभावः अवयवावयवस्य समुदाया
वयवत्वात् पित्कृतार्थानुप्रकृत्या तेपाद्येति केचित् अयङ् पिक्विति अनङित्यादाविवाकारस्यो
च्चारणार्थत्वशंकावारणार्थं तथोक्तिरित्यन्ये केचिदिति आमि सर्वनाम्न इति साहचर्या
दिति भावः साहचर्यस्य वस्तुतिवक्तृवचनादेरर्थप्राधान्यद्योतकस्याभावादिति भावः
साहचर्यस्यासार्वत्रिकत्वात् सूत्रांतरस्य तदाश्रयणे दृढतरप्रमाणाभावाच्चेति बोध्यं नच
गौणमुख्यन्यायेनात्र नभविष्यतीति वाच्यं अप्रसिद्धत्वं गौणलाक्षणिकत्वं वा नत्र गौणत्वस्य
ध्रुवेदं सर्वनामसंज्ञासूत्रे कैयटे अत्र ह्यंगाधिकारात् त्रिशब्दांतत्वेन प्राप्तिः न त्र्येतत् घट
कीभूत त्रिशब्दस्त्रित्वसंख्यारूपमुख्यार्थप्रतिपादक एव इतरविशेषणीभूत इत्यस्मादेतत्
न हीतरविशेषणतामात्रेण प्रसिद्धत्वं गौणत्वं लाक्षणिकत्वं वा भवति अत एव प्रियत्रिसेत्यादौ
ध तितिस्त्रादि आदेशाप्याप्फदाहृताः संगच्छंते गौणमुख्यन्यायोन प्रातिपदिककार्ये किंतु उ
पात्तार्थोपस्थापकविशिष्टरूपकपदकार्य एवेति कैयटाद्यः परिनिष्ठितस्य पदस्य पदांतरसं
बंधे हि गौर्वाहीक इत्यादौ गौणत्वप्रतीतिर्न तु प्रातिपदिकसंस्कारवेलायामित्यंतरत्वाज्ञात।
संस्कारवाधायोगः प्रातिपदिककार्ये प्रवृत्त्यभावे वीजमिति तेषामाशयः अश्वमुरसद्दशास्या
पत्यमित्यर्थे घाश्वरिरित्यादौ वतद्गत्रः सिद्धयेउपात्तेत्यादि पाठांतरं नच प्रातिपदिकपदं ता
दृशांते न हि प्रातिपदिकशब्दत्वत्वेनार्थवत्कत्वेन वोपस्थितिरिति तस्य विशिष्टार्थोपस्थापक

प्रा॰ श॰

त्वाभावात् नियतपदं त्वचादित्वेनैवचादीनां मुपस्थापकमिति तदुक्ते पूपक कार्येत्र र्थोपस्थापकत्वा।
द्विनिमित्तत्वात् तत्र न दोषः पदशब्देन कार्यप्रवृत्तिवेलायां गोणार्थोपस्थापकं पदमुच्यते प्रायः
पदे एवं गोणार्थत्वदर्शनेन पदशब्देन तत्प्रवृत्तिवेलायां गोणार्थोपस्थापकमुच्यते अत एवा।
ग्नीषोमौ माणवकावित्यत्र प्रसिद्धदेवताद्वंद्ववाचि अग्निषोमपदस्य तत्सदृशपरत्वेपि इत्वषत्वे भवत
एव तत्प्रवृत्तिवेलायां गोणार्थोपस्थापकत्वाभावात् अग्निसोमौ माणवकावित्यत्र गोणमुख्यन्या
येन षत्ववारणपरं भाष्यं अग्निसोनाम कोपीत्यर्थकोदाहरणपरं एवमुमया सहितः सोमः तत्तु घ
टितद्वंद्वेपि न प्रसिद्धत्वद्रूपगोणत्वस्य तत्र सत्त्वात् स्पष्टं चेदमन्महत्सूत्रे कैयटविवरणयोः
एवं गोपाठयेत्यादौ मुख्यगोपदार्थस्य पाठनकर्मत्वासंभवेन विभक्त्युत्पत्तिवेलायामेव प्रयोक्तृभि
र्गौणार्थत्वप्रतीतावपि अपदस्य प्रयोगेणचाधुभिः सर्वत्र पदस्यैव गौणार्थकत्वग्रहणात्वं त्वं संप
द्यतत्र महान्महान्भूतः त्वङ्वतीत्यादिभाष्यप्रयोगे त्वायादेशदीर्घादीनां करणेन चास्य न्यायस्य
पदकार्यमात्रविषयत्वमिति तत्त्वं अन्यथा वाक्यसंस्कारपक्षे तेषु तदनापत्तिः किंच गामित्यादौ अ
त्वद्ध्यादिकं भवत्येव विशिष्टरूपोपदानाभावेन तद्विषये तन्न्यायाप्रवृत्तेः अर्थाश्रये एवं तद्देवभ
वति शब्दाश्रये च वृध्यात्वे इत्योदादिसूत्रस्थभाष्यस्यापि अर्थग्रहितवर्णरूपशब्दाश्रयत्वे वार्थः
गोत इत्यस्यापि डोकारोपलक्षणत्वात् ओतु इति सूत्रे यथार्थोपस्थिस्त्यानि रूपितं प्राक्गोत
इत्यत्राप्योकारोपिलक्षणतया तस्यापि वर्णाश्रयत्वात् पदकार्यत्वाभावाच्च ध्वनितं चेदं प्राति+

पदिकार्थे सूत्रे शेखे मनोरमायां च तत्परिभाषाफलं तु महद्भूतश्चन्द्रमा इत्यादावात्वाभावः संज्ञा
शब्दश्रुतादौ पदभावश्चेति ॥ एवमभिव्यक्तेति न्यायोपि पदकार्यविषयकः ध्वनितं चेदं सर्वादिसूत्रे
संज्ञाभूतानां प्रतिषेधमारभमाणेन वार्त्तिककृता शब्दोपदेशेति सूत्रे संज्ञायामिति वदता सूत्रकृता स्व
त्वर्थे संज्ञादिभिन्नत्वन्याय्यानङ्गीकृतं भाष्यकृता च शब्दपरे षु शास्त्रीयकार्यप्रवृत्तिर्न तदनावे
त्प यथालब्धं यन्नदेतेभ्य इत्यादिज्ञापकाद्भवतीति वोध्यं ॥ यत्तु लोकन्यायसिद्धी ‥ घापरिभा
षा साच लौकिकेनार्थेनार्थवद्विषयैव साचार्थवत्त्वालोके प्रयुज्यमानस्य पदस्यैव न हि प्रा
तिपदिकं लोके प्रयुज्यते अन्वयव्यतिरेकाभ्यां हि कल्पितानां तस्यार्थवत्ता न च गौणमुख्यन्या
भावादर्थमात्राश्रयकार्यप्रवर्त्तते तस्मिंश्च प्रवृत्ते लोकप्रयोगतः पश्चाज्ज्ञो गौणत्वमुख्यत्वग्र
ह इति गांपाठयश्च महान्भवतीत्यादौ न दोष इति तन्न महद्भूतश्चन्द्रमा इत्यादिघटकमहदादीनाम
पि शास्त्रप्रक्रियायां कल्पितैनैवार्थवत्त्वेति तत्रापि न्यायाप्रवृत्त्यापत्तेः तस्मात्कल्पितार्थ
वत्त्वमादायार्थवत्परिभाषाया इव कल्पितगौणमुख्यत्वमादाय गौणमुख्यन्यायस्यापि
प्रवृत्त्या लोकेपि दोषनादवस्थ्याद्धित्यत्वं त्यदादीनामिति अष्टनस्त्राविभक्तावित्यत्रोविभक्ता
वित्यनुवर्त्ततेतत्फलं तत्कृतं सोर्लुक्किश्रत्वेन दृष्टिरिति भाष्यकारस्येति शेषः वार्त्तिकमिद
मित्यन्ये हिएर्यमानानामिति किमिति युष्मदोरात्वयत्वलोपैर्विशेषविहितैरत्वस्य वाधात् +
किमः कादेशस्य विधानाच्चेति प्रश्नः नन्वाक्षिप्यते ऽत्व संतस्येति सूत्रे ऽस्याप्यतो रूपसिद्धि

शो॰ निरसामर्थ्यात्सौनत्यादीनामुकृत्यस्य शात्रिरित्यपि शंकास्पादनमाह भवंताविति तिङ्न्तोवाद इति तथा
चवकृवचनमात्रविषयोऽकारांतइकारांताङ्ङित्रएवेति ध्वनयति यद्यपि हरिणाष्ट्रनिरूपणेनेकारां
तान्पदस्तत्रङ्डितांतवदयमप्युपपन्नः स्तशापस्तथाप्यत्रनिरूपणमिकारांतस्यवकृत्वेऽकारांतत्वमि
तितरदनुसारिणां भ्रमनिरासार्थं यत्तु इत्यपितस्यवकृत्वेवद्धवरत्रः प्राच्यभरतेघ्वितिलुकित्रं
तवेलिविभक्त्यापदत्वेन नलोपसिद्धेरिदं व्यर्थं भसंज्ञा तु वर्णाश्रयत्वात् लुकालुप्तत्वाच्च प्रत्यय
लक्षणेननेति तत्रप्राच्यभरतेभ्योन्यत्रलुगभावात् स्वविधौ नलोपासिद्धत्वे नौङ्लोमेरित्यादि
सिध्यापत्तेश्च इतीदंताः ङौ तु सवर्णदीर्घ इति यथा चास्य ङौ प्रयोगेपि इहूनोचसप्रमाणार्थ इति
सूत्रस्यभाष्यविरोधान्नभवति तथा भाष्यप्रदीपोद्योतेस्पष्टं इहूतोचेत्यत्रापि ग्रंथे ध्वनितं च
शिवंतत्वानेति यत्तु मीङ् मानेइति ईकारांतात्क्विप् माङ् मानेइत्यस्मात्क्विपितीत्वं दुर्लभंत
स्यककारादौ प्रतिषेधात् अत एव शंस्थाशाह्रेइत्वं नेतिवक्ष्यामः किंच सत्यपीत्वे परत्वेनेकाचइ
तियण्दुर्लभः ईत्वविधायकनुवर्त्तमाने नासिद्धवदित्यनेन यणोसिद्धत्वादिति तत्र अव
कारादावित्यस्य भाष्ये प्रत्याख्यानात् शंस्थाशाह्रेतु भाष्यप्रयोगादेवत्वाभाव इति स्थः का
चेतिसूत्रेहरदत्तादयस्त्वग्रेनिरूपयिष्यामः असिद्धत्वं तु नशाङ्ग्रानित्याश्रयत्वात् अतएव।
प्रशामम्येत्यादावतोलोपोऽपादेशेनासिद्ध इति भाष्यसंगच्छते एवं च माङोपि नित्वाधं असूत्र
तामीङपीतिदिक् वातप्रमीरिति गृंगोमाङ्गाकृतिर्नेतु विशेषः वकुंअयसीति ईयसश्च

शेतीनिषेधात्कप् नच समासान्तविधौ लिङ्गविशिष्टपरिभाषाभावस्य ज्ञापकं प्रातिपदिकेति सूत्रे
भाष्ये उक्तत्वात् ईयसन्तो न रपदत्वाभावात् कथं निषेधः किं चेयसश्चेति निषेधो नद्यन्तस्येति न्या
येन शेषाद्विभाषेत्यस्यैव बाधकः स्यात् न तु नद्यृतश्चेत्यस्येति वाच्यं गोस्त्रियोरिति सूत्रे ईयसो बहुश्रेया
सीति भाष्योदाहरणात् समासान्तविधौ लिङ्गविशिष्टपरिभाषायाः प्रवृत्तावपि विहितनिषे
धविधौ न प्रवृत्तेः अन्तग्रहणं वा नन्तरस्येति न्यायोप्यत्र न प्रवर्तते इति बोध्यं ईयसो बहुव्रीहौ नेति निषे
धात् नोपसर्जनह्रस्वः ह्रस्व ह्रस्व इति दीर्घयोरेव ग्रहणं व्याख्यानात् ह्रस्वयोर्घिसंज्ञाविधाना
च्च इत्यत्र वाग्रहणं नदीत्यनेन दीर्घान्तत्वात् सीति निषेधस्य प्रापकत्वात् सूत्रे सवर्णदीर्घः प्रत्यया
प्रत्यययोः प्रत्ययस्यैवेति परिभाषा नोपतिष्ठते नेयङुवङिति निषेधात् लिङ्गात् वर्णग्र
हणे न तदप्रवृत्तेश्च तेन हे प्रधिः इत्यादौ नदीकार्यसिद्धिः भ्रूः किं माभ्रेमान् स्त्र्याख्यौ नद्याविति स्यात् स्त्रि
यमाचक्षाते स्त्र्याख्यौ मूलविभुजादित्वात् कः अत्र केचित् वर्णयोरेव संज्ञा स्त्र्याख्यौ नद्याविति।
स्त्र्याख्यानरसात् स्त्र्याख्यावितीतरे ईदूतोर्विशेषणं तयोः स्त्र्याख्यत्वं तु ङ्यादेरस्त्येव ततः मनोरमायां
ङ्यादिष्विति वक्तव्य वचनं तु प्रयोगभेदाभिप्रायेण क्वचित्तु स्त्रीवाचकवर्णसमुदायघटकत्वेन
प्रवेशात् शक्तिपर्याप्त्यधिकरणत्वस्याविवक्षितत्वात् वस्तुतो ङ्यादावपि स्त्रीबोधकवर्णस
मुदायघटकत्वेनैव स्त्र्याख्यानं बोध्यं तयोर्द्योतकत्वात् तेनू न च्यन्तादित्यादिव्यवहारो न विरु
ध्यते इति न च स्त्र्याख्यावित्यस्य तन्त्रीशब्दादिविषये नद्वाचकशब्दसमुदायघटकेऽलक्षणापत्तेः

श्रा·श्रे· अस्त्रीति पर्युदस्यमानसमर्पकस्त्रीशब्दस्य तदवयवेन लक्षणापत्तेश्च तस्मात् स्त्र्याख्याविति पर्युदस्या
पि तत्स्त्रीवाचकस्य विशेष्यत्वान्नेदं नदीविधिरित्यभिप्रेत्याह इदं तावदिति आण्नद्या इत्यादौ तु न
दीशब्दस्य तदवयवेन लक्षणापत्तेश्च बाधा अस्त्र्याग्रहणान्नित्यत्वलाभस्तदाह नित्यस्त्रीलि
गाविति तत्फलं तु ग्रामणीशब्दादिव्यावृत्तिः नित्यस्त्रीत्वं च लिङ्गान्तरानभिधायकत्वं स्त्रीविषया
वेवयोर्नित्यमिति भाष्यस्वरसतस्तथैव लाभात् नन्वेवं ज्ञतन्त्रीकुमार्यादिशब्दानामपि नदीत्वं न
स्यात् क्वचित् प्रियाणां निर्देशेन त्रिलिङ्गेन समानाकारतया नित्यस्त्रीत्वाभावादिति चेन्न प्रत्यासत्ति
न्यायेन स्त्र्याख्याविति विशेषणसामर्थ्येन च प्रवृत्तिनिमित्तैक्ये नित्यस्त्रीत्वस्याश्रयणात् नन्वे
वं बहुश्रेयसीशब्दस्य नदीत्वं न स्यात् अत आह प्रथमेति अर्थान्तरसंक्रमात्पूर्वं विद्यमाननित्य
स्त्रीत्वमादाय नदीत्वमर्थान्तरसंक्रमेऽपि कर्तव्यमित्यर्थः न च यथोद्देशपक्षे अकृतव्यूहपरि
भाषाप्रवृत्त्यभावबोधनेन चरितार्थत्वात् प्रकृष्टार्थस्येति विग्रहे प्रथमैवाक्रमणायेत्यत्र ने
यडिति निषेधस्याकृतव्यूहपरिभाषया निर्बाध्यं तत्रैतदप्रवृत्तौ मानाभावात् + यथो
द्देशपक्षे तु अन्तरङ्गत्वात्पूर्वं प्रवृत्तं नदीनदीसंज्ञे बहिरङ्गत्वात्समुदायकार्यसिद्ध्यर्थं इति न का
र्यं नदीसंज्ञायां च लक्ष्यानुरोधाद्यथोद्देशपक्ष एवाश्रयणीयः अत्राङ्गेऽयङ्उवङोः स्थितत्वभावा
च्च बहुव्रीहित्वेऽपि न षष्ठ्यन्त इति कप् न ऋकारसाहचर्येण यस्य वृत्तेः शब्दनदीत्वं नडन्तपदक
एव तत्प्रवृत्तेः प्रतिपदोक्तत्वगतिसमासाभावेऽपि यथायथं तथात्वेन निरूपयिष्यामः इदमेवा
भिप्रेत्य यथोद्देशे न्यायसिद्धमिति मनोरमा समुदायकार्यप्रवृत्तिस्तु नद्यन्तत्वाद्दोष्या

एतदभिप्रायेणैव चाग्रे व्याख्यास्यति नद्यृतश्चेत्यादि । इदं च सूत्रं नित्यस्त्रीविषयमेव न तु ङिति ह्रस्व
श्चेत्यत्र तद्विषयं अत एवानित्यस्त्रीविषयत्वेनात्र विकल्पो न महावललक्ष्म्योः स्त्रीत्वेन तत्र । संज्ञा
गविशेषणात् वस्तुतो वहिर्न लिंगांतरव्यावृत्तौ मानाभावेनावयवस्य नित्यस्त्रीत्वान्न्यूनत्वे ए
व सिद्धे वचनं व्यर्थमित्यभिप्रेत्य भगवता भाष्यकारेण प्रत्याख्यातं अवयवस्त्रीविषयत्वात्सि
द्धमिति अवयवशब्देन चात्र रत्निप्रकृतिभूतशब्दग्रहणं अत एव व्यनाद्येनेन दोषः हे वक्रु
भ्रूयसीति ह्रस्वे कृते गुणस्तु न प्रक्रियालाघवाय अंबार्थानां ह्रस्व नद्यो गुण इत्येव व
क्तव्ये ह्रस्वविधानसामर्थ्यात् न सिचेत्यत्र तु ह्रस्वग्रहणमेवानुवर्त्तते न दीर्घग्रहणमेकदेशो व्यारि
तत्वप्रतिज्ञानादिति भाष्यकृतः अंबार्थनद्योर्गुण इति तु नोक्तं अतः क्लीवे तले लोके मातृ सं
बद्धनयाहृ वोविलिरभरुद्वविष्वादिको धातुरुक्तस्य मातृपर्यायस्य अतः शब्दस्याम्बार्थक
त्वाणौ गुणापत्तेः ह्रस्वग्रहणे त्वच श्चेत्युपस्थितोम्बार्थनद्योर्गुण इति वक्तव्ये ह्रस्वविधानसाम
र्थ्यान्न गुण इति युक्तं अत्र तु नस्याम्बार्थकस्य ग्रहणान्न दोषः मातरितस्य नपुंसकत्वेपि हे वारे
इतिवद्ध्रस्वे गुणापत्तिरिति वाच्यं अत एवाम्बार्थनद्योरित्येव सूत्रयितुमुचितमित्यपास्तं
ह्रस्वस्याप्यन्तरस्येति न्यायात् ह्रस्वस्य ह्रस्वस्यैव बाधकत्वेन मातरित्यत्र ऋतो ङीति गुणो भव
त्येवेत्याहुः आपएनघाः अट्ठेवक्तृत्युक्तेः अनादीनामटा सिद्धमिति वत् परत्वेन तु न अप्रत्ये
ति पुनर्विधानार्थेन चैन पररूपबाधादित्याहुः तन्न तन्मते टस्येत्यत्र धानाचित्यपकर्षेण च्छधानाप
त्तेः अत एव तन्मते स्यपोह्सतीत्यत्र न दोषः आटश्च यघयपिरह्निरेचीति सिद्धं अत एव नमा ।

वह्रुः अम्बार्थनद्योर्ह्रस्वः अत्र ह्रस्वविधानात् गुणो न ह्रस्व
विधानसामर्थ्यात् उपाधिगुणः

श.शे. 174 उगोगदितिसूत्रभाष्यभाष्योक्तेश्चाटश्चैत्यासेनदोषः तथापिपरत्वेनव्याप्यत्वादुपन्यस्तमिदं ङे॰रा।
म्न ङेरितिसप्तम्येकवचनमुस्त्रियामित्यादिनिर्देशात् गृह्यपरत्वादितिसकृद्गतिन्यायाश्रयणा
दितिभावः अतएवस्त्रियामित्यादिनिर्देशाः संगच्छंते एतेननित्यत्वान्पूर्वमादिरमायामित्यादौ
पाद्रिचत्तेनव्यवधानादाम्दुर्लभः सामर्थ्येनतद्विशिष्टस्यवास्यादितिनुट्वाधेनमानमित्य।
पास्तं शाद्रांतरशाद्वोभयोरप्यनित्यत्वेनपरत्वादाम्एवप्रवृत्तेः इत्याहुः स्पष्टंचेदंह्रस्वनद्याप
इतिसूत्रेभाष्येनचनपुंसकग्रामणिशब्दात् ङेएकदेशविकृतन्यायेननीशब्दत्वादामितुडाप
त्तिरितिवाच्यं परस्यैत्वस्यप्रसंगाभावाद्दुर्लभत्वात् औत्वमपितुमाभूदितिविप्रतिषेधेनवाधितमित्यन्य
देनतन्नस्माद्ग्रामणिनीत्येवेतिवोध्यं पुंवत्त्वपक्षेतुह्रस्वस्याप्यभावाद्ग्रामण्यामित्येवेत्याहुः
नचयेननाप्राप्तिन्यायेननद्याम्स्याडपवादत्वात्कथंतद्विषयेस्याटः प्रवृत्तिरितिवाच्यं क्वचि
दपवादप्रवृत्तिविषयेप्युत्सर्गप्रवृत्त्यंगीकारादद्दोषः अत्रैवस्त्रियायामित्यादिनिर्देशालिंगं स्पष्टं
चेदंपादः पदितिसूत्रेकैयटे अङ्गांतत्वादिति लक्ष्येमुट्चेत्यौणादिकेप्रत्ययांतत्वादितिभावः अतए
वापसर्जनह्रस्वेन गोस्त्रियोरित्यत्रस्वरितत्वेनस्त्र्यधिकारोक्तस्यैवग्रहणात् कुमारीति ह्रस्ववि
धायकेशास्त्रीयोपसर्जनत्वग्रहणाडुपसर्जनह्रस्वेन अतिसु यद्यपिऊङ्चगमादीनामिति
वार्तिकेनक्विपि अनुनासिकलोपेऊङ्चनिष्पन्नभूशब्दस्यधातुत्वादेवसिद्धं तथापिचमेश्चूङ्
रित्युणादिनिष्पन्नचमूशब्दस्ययणभावार्थंग्रहणमित्याहुः युणऋतिवक्तव्ये + रितिव्याख्या

परिभाषाप्रवृत्तावपि सुधातोस्त्वच निषेधवारणाय यांगत्वेन प्रत्यये परतो निषेधांगीकारिको यणीति यणः निषेधार्थं सुधी ग्रहणं
स्य सार्थक्यास्थिं त्यसेतत् सिभुत्रनयोः प्रकृतिवदित्यतिदेशेन धातुत्वात् द्विहितप्रत्यये परत्वमस्त्येवेति कथं निर्देशात्तुणपत्तिरि
ति सएव प्रष्टव्यस्तस्यात्र भू सुधियो रिति निर्देशएव परिभाषायां प्रवृत्तौ लिंगम्

नत्वयुक्तमेव ङित्वस्य वैयर्थ्यापत्तेः शान्तादीनामंगस्य च स्थानि षष्ठ्या निर्देशाभावात् क्विपत्तिश्च यु
तदित्यादौ वियङापत्तिश्च द्विदिवतुरितिवैरनेकाच इति यणापत्तिश्च यण शास्त्रे इवर्णांतांगस्य
त्ववार्थांगीकारेतु तत्रापीयङापत्तिर्बाधा ध्वोरिति गुरुनिर्देशश्च्वादिरत्येनेत्यस्यानित्यत्वज्ञापना
र्थः तेनेणपरेणैवेत्याद्यर्थसिद्धिः इह ध्वोरिति धातोरेव विशेषणं नत्वन्ययोरव्यभिचारात् तदपि श्नुतोरिति पाठः
समानाधिकरणमेव श्रुप्रभृत्यांतांगावयवेवर्णोवर्णयोः × श्नुताद्रो प्रत्ययस्यांगविशेषणेन
यान्याय्यत्वेन तेन धोर्विशेषणात्तदोषइति न वाच्यं न चात्र लोपो व्योरिति लोपेन निर्वाहः प्रत्ययनि
मित्ते यङ्लुक्ङेरसिकत्वात् ऊपतुरित्यादावल्परेदोषाच्च वैयधिकरण्यापत्तिश्च सुधात्भुवा
मित्यस्याः स्थानषष्ठीत्वस्यैव युक्तत्वात्तदाह इवर्णांतधातोरिति इत्यतस्येति इत्येतद्दंतमेतत्त्वर्थः
तेन सुभ्रुवावित्यादिसिद्धिः ननु धातोरुच्यमानं कार्यं धातु प्रत्यये इति सूत्रे वृद्धिरिति सूत्रपठितप
रिभाषया सुधियङादीनामनापत्तिरिति चेन्न सुधीशब्दोपणेनैषधारंभसामर्थ्येनात्र प्रकरणे परि
भाषाप्रवृत्तिकल्पनात् क्विपादीर्घात् भुवः संज्ञांतरयोरित्यादिनिर्देशाच्च ध्वोः षट्त्रिंशत्वात्
यथासंख्याशङ्केराह श्वांतस्येति स्यात्तदित्तिभावः ध्वोरिति किमुवच्चे श्वयिकिम् युयात् एतने
श्च चिश्चिन्वत्यत एकदेशस्य विकृतत्व प्रतिज्ञाबलादनुवृत्तिः धातुग्रहणं चाव्रत्यासंयोगांगयोर्विशेषणं
व्याख्यानात्तल्लत्वानुसाराच्च एकदेशान्वयेपि सौत्रत्वाद्धृत्तिः अंगमात्रविशेषणत्वेतु लुक्जिस्व रि
तकेयङ्ङ्वङ्पदानुवृत्त्यैवेह शांगस्य यङादिविषये इत्यर्थेनाधातुव्यावृत्तिसिद्धौ धातु हण
स्य स्वरितत्वकल्पनपूर्वकमेकदेशानुवृत्तिर्व्यर्था स्यात् एवं च तदनुवृत्तिसामर्थ्यात् तयोर्विधेय

प्रा॰ शे॰ नान्यत्र न च शाब्दाभावाद्विधेयांतरं सत्त्वाच्च अन्तो विभक्तिपरिणामेनोक्त एवार्थः स्यात् एवं च तत्
दनुवृत्तिसामर्थ्यादेववृत्तिरेकैषोस्त्वयस्य नचोन्नावित्यादौ गुणाभावे दृष्टापत्तिरेवास्त्वस्वरश्चैवापद
पूर्वाचोपधायस्यैव वर्णस्य तस्य परिणामपर्यकस्यदृपदपूर्वोपधस्येति वार्त्तिकेन तत्र यणदृष्टत्वानुमानात्
उक्तोपायेन प्रत्याख्यानं च उत्तरीशाट्टादिभ्यः कर्तृंतेभ्यश्चाचारक्विवंतेभ्यो वा कर्त्तरि क्विन्नु न अनभिधाना
दिति न तत्र वार्त्तिकभाष्ययोः फलभेद केचित्तु भाष्यानुरोधेन वार्त्तिके पदपदेन धात्ववयवत्वान
धिकरणं पदमेवेति नाभिधानेपि फलभेदः उभयमतेपि यणभावादित्याहुरित्यभिप्रेत्याह धात्वव
यवेत्यादि अंगविशेषणफलं तु हरीरित्यादिष्वंगस्य धात्ववयवसंयोगपूर्वत्वं न भवति य इवर्ण
स्तदंतत्वात् न च धात्ववयवसंयोगपूर्वत्वस्य धात्ववयवे कार एव संभवेन संयोगवद्विशेषयो
गस्यापि विशेषावगतिहेतुतया तद्भिन्नस्यापि धात्ववयवस्यैव ग्रहणान्न दोष इति वाच्यं तत्रीरित्या
दौ धात्ववयवसंयोगपूर्वस्याधात्ववयवस्यापि संभवात् यद्यपि इकोगुणवृद्धी इति निर्देशेन पर्यस
त्याधात्ववयवसंयोगपूर्वभिन्नस्यैव वर्णस्य धात्ववयवस्यैव ग्रहणेन हरीरित्यादौ न दोषस्तस्यापि धातो
रित्यस्यानुवृत्तिरेवाश्रितेति दिक् उत्सर्गसमानदेशा अपवादा इति न्यायेन तु निर्वाहः अंगांशेन तदसं
बंधे हरिमित्यादावपि प्राप्त्याते न नयेन न प्राप्त्यभावेन तदपवादत्वस्यैवाभावात् ए: किं असंयो
गपूर्वग्रहणविशेषणं यथा स्यादंगविशेषणं माभूदिति तेन यवक्रियावित्यादौ नातिप्रसंगः
न च तदभावे लुवतुरित्यादावतिप्रसंगः ओः सुपीति नियमाश्रयणात् विपरीतनियमस्तु न सुधी

शब्दे उचि श्नुवियणोर्निषेधारंभात् इत्याहुः एरनेकाचोऽसंयोगादित्येव सूत्रं कार्यं धीरित्यनुवर्त्य
धात्ववयवसंयोगभिन्नात्परो यो धातुरिति तदंतस्येत्यर्थः ओः सुपीति उवर्णांतस्य चेत्यत्र ध्यवतीति नियमार्थम्
उन्नीलुवन्तुरित्यादौ न दोषः इति तन्न यवक्रियावित्यादावपि धात्ववयवसंयोगभिन्नरेफात्परत्वेना
तिप्रसंगात् सिद्धांते तु धात्ववयवसंयोगपूर्वभिन्नस्येत्यर्थान्न दोषः यदि त्वसंयोगादिति विशेष
णसामर्थ्याद्धात्ववयवसंयोगात्परस्य नेति व्याख्यायते तदा उदियावित्यादौ दोषः समन्तु पूर्वग्र
हणसामर्थ्येन पर्युदासवृत्त्या च तद्भिन्नस्य धात्ववयवपूर्वस्यैव ग्रहणान्न दोषः पर्युदासवृत्त्या च
तद्भिन्नस्य धात्ववयवपूर्वस्यैव प्रधीरिति प्रकृष्टं ध्यायतीति विग्रहः अत एव न दीत्वं ध्यानकर्तृ
त्वस्य लिंगत्रयसाधारणेन नित्यस्त्रीत्वाभावात् प्रकृष्टा धीर्यस्येति विग्रहे तु नदीत्वं भवत्येव कु
मार्याविति नः क्वेरिति पदत्वनिषेधादंतर्वर्तिविभक्त्या पदत्वमाश्रित्य शाकलेनेति बोध्यं सं
योगस्य धातुनाविशेषणे फलमाह उन्न्याविति ग्रामणीरिति क्विप् अग्र ग्रामाभ्यां नयतेरि
ति णत्वं गतिकारकपूर्वस्यैवेति भाष्ये पठ्यते तत्र नियमवाक्यानां निषेधमुखेन प्रवृत्तेर्गतिका
रकपूर्वपदेन तद्भिन्नं लक्ष्यते इष्यत इत्यनेन निषेधः यत्त्विदं वचनं यथाविधि नैकवाक्यतया+
न्वेति श्रुतानां नियामकत्वमिति तन्न एवकारस्यानन्वयापत्तेः निन्यतुरित्यसिध्यापत्तेश्च गति
कारकपूर्वभिन्नं च तत्सदृशं सपूर्वपदमेव गृह्यते तेन वक्रुंच पूर्वे निन्यतुरित्यादौ च यणः विधि
मुखेन प्रवृत्तावपि विधिसंकोचस्येत्यपूर्वपदेन रविषयत्वेनैव संकल्पनासाजात्यात् तदेतदाह
गतिकारकेतरेति शुद्धधियाविति शुद्धा धीर्यस्येति विग्रहः शुद्धं ध्यायतीति विग्रहे यणः

भिन्नार्थानामिति स्वत्वं तु हेतुत्वप्रकारकबोधे तृतीयाबाधनार्थं विभक्तिप्रकरणे तु न तथात्वं कारकत्वप्रयुक्तकार्याणामपि तेषां रि
तितात्पर्यं केचित्

श॰ शे॰ भवत्येव न चाद्यविग्रहे प्रपस्तीत्यध्याहारेणाकारकत्वमस्त्येवेति वाच्यम् अकारकपदे स्वरितत्वप्रति
ज्ञयाकाधिकारपठितबोधकस्यैव ग्रहणात् प्रथमा च न कर्तृत्वस्य बोधिकेति भावः वृत्तौ शुद्धधी।
पुरुषपरत्वेनाकारकत्वात् प्रध्यानस्याध्ययनस्यान्वयबोधकधात्वर्थकारकस्यैव ग्रहणाच्च कथं
तर्हीति दुर्ध्यायतीति दुष्टा धीर्यस्येति मित्रश्रिकाङ्गीरिति विग्रहाभिप्रायेण प्रश्नः यत्तु भाष्यवच
नेन गतिकारकपूर्वपदे तत्र प्रतिपदोक्तत्वात् गतिसमासस्य नित्याधिकारस्थस्यैव ग्रहणं न त्वाहच
र्यानुकारकांशेऽपि कर्तृकरणेत्यादेरेव एवं च प्रागुक्तविग्रहेऽपि न दोषः दुर्ध्यायतीति विग्रहे तु य
ण भवत्येवेति श्रीपतिदत्तादयस्तत्र भाष्ये पूर्वपदग्रहणाभावेन प्राद्युपयोगे समासोपस्थितेर
भावात् लक्षणप्रतिपदोक्तपरिभाषायाश्च विशिष्टरूपोपादानविषयत्वेन तस्य वृत्तौ मानाभावा
त् अत एव पूर्व्वाख्याविति स्वत्वस्थः प्रकृष्टा धीरिति विग्रहाभिप्रायकः प्रध्ये त्रास्तणेप इति भाष्य
प्रयोगः संगच्छते इत्याशयेनाह दुःस्थितेति न च प्रकृष्टा धीरिति विग्रहेऽपि प्रध्यमित्यत्र यणेन स्यात्
प्रशब्दस्य प्रकर्षे प्रति गतित्वेऽपि धीशब्दं प्रति तत्त्वाभावादिति वाच्यं प्रशब्दोपात्तप्रकर्षस्य धीशब्दो
पात्तधात्वर्थ एवान्वयात् प्रकृते दुःशब्दोपात्तदुष्टत्वस्य तु स्थितिक्रियायामन्वयेन वैषम्या
दित्याहुः यत्क्रियायुक्ता इति या चासौ क्रिया येति विग्रहः तं प्रतीति न ह्याचकं प्रतीत्यर्थः या
ह्य यस्य धातोर्वाच्यया क्रियया युक्ता इत्यर्थः अयं चार्थ उपसर्गाः क्रियायोगे इति सूत्रे योगग्रह
णान बोधित इत्यवोचाम नेह निलतश्च संबंधसामान्यषष्ठ्येव समास इति भावः केचित्तु ननु सु

त्रमतेभिन्नार्थानामितस्य षष्ठीबाधनार्थाबात्व सीदुर्लभाभाष्यदीन्यावृद्धिस्तानायायमाश्रित्य सूत्र श्रन्या
ख्याने पि फलभेदे प्रस्याख्यानायोगात्तन्नामिधानेन तदभावेंगीकार्य इति शंकः तन्मते प्याह वृश्चिकर्स
पिनीति उत्तरपदेति पूर्वपदांतरगतस्येतिरर्थः शाकपार्थिवादित्वादितिभावः परमदीध्याविः
त्यादौ तु कांदसत्वाघणू नभू अनेनतरस्येतिन्यायेन एरनेकाचः ऊः सुधीति सूत्रद्वय प्रापितस्येवा
यंनिषेधश्चयोगेनचप्रत्ययालेपस्त्तथ्याचसत्त्व्येव फलितः तदाह सुधीति सुधियाविति शोभना+
धीर्यस्येतिविग्रहे पि उत्तरपदत्वेपिं चाय दादिविधाविति प्रत्ययलक्षणप्रनिषेधात्काकलेन लो
पाविति अतोलोपः लोपोव्योरित्याभ्यामितिभावः नचाल्लोपः स्थानिवत् यलोपेतन्निषेधात्
नचपरत्वादेवरपृक्तलोपे वल्परत्वाभावाघलोपोनप्राप्नोतीति इतिवाच्यं लोपोव्योरितिसूत्रेविधेय
स्यप्रथमं निर्देशेन वेरपृक्तलोपाद्धलिलोपस्य वलवत्त्वज्ञापनात् लोपोव्योर्वलि ततोवेः पूर्वस्य
त्रमनत्रवर्त्तते व्यं तस्यव्योर्लोपोभवतिवलि वल्ग्रहणासम न्तिन्यायेनवेरेव तत्रपरत्वादपृक्तलो
पिवचनसामर्थ्यात्प्रत्ययलक्षणं ततोपृक्तस्येति योगविभागेनभाष्यकृतासाधितत्वाच्च अतएवक्वौ
लोपोवक्तव्यइतिवार्त्तिकेककारोविवक्षितइत्याहुः विचोल्पविषयताद्यननायककारोक्ति
रित्यन्ये स्थानिवत्वादिति एवंचयणादेशयलोपस्थानिवत्वनिषेधाद्यलोपेसत्यूरिति प्राप्ति
दिकंस्यादितिभावः नचांतर्वर्त्तिविभक्त्यापदत्वात्पदांतेति निषेधा नः क्वे इतिनियमेनास्यापद।
त्वात् ननुनियमस्य सजातीयापेक्षत्वेन हलंतएव प्रवृत्तिरितितिनदोषः किंचांतर्भूतकार्यकारा
पदेनंरंगेयणेवहिर्भूतानाकिवपेक्षेकाचसंबंधियलोपस्यवहिरंगतया सिद्धत्वाद्यवधानेनय

177

शा॰ शे॰

प्रत्ययलक्षणसत्वदीर्घस्य

णोऽप्राप्तेरिति चेन्न बहिरंगपरिभाषया नाजानन्तर्य इति निषेधात् प्रमाणानां सामान्यपक्षपाते न
सामान्ये पेक्ष नियमस्यैव युक्तत्वाच्च अत एव गव्यतीत्यादौ न लोपः शाकल्यस्येति न लोपः कौलु
प्तमिति भावः क्तः लोप इत्यर्थः अकृतव्यूहपरिभाषाया अनित्यत्वाद् दीर्घस्य न निवृत्तिः किन्तु गुणध
ति वार्त्तिके कौत्संशस्य कौलुप्तं न स्थानिवदित्यर्थे पदत्र्यैलवमाचक्षाणो णौ नौ विस्य सिद्धिमाशंक्य एवं
तर्हि क्वौ विधिं प्रति न स्थानिवदिति भाष्य उक्तत्वेनास्य काचित्कुलम् न चाभाव एवास्यास्तु गोमत्यते
रप्रत्यये गोमानित्यादिभाष्यविरोधापत्तेः तेन क्वणिञ्चत्र अस्य प्रवृत्तिः कथं पाद्यते पात् पद इति येन
विधिरिति सूत्रभाष्यात्प्रागुक्तभाष्याच्च अत एव पिपठिषतेरप्रत्ययेन प्रसङ्के पौपिपठिषीत्येवेत्युक्तं
कैयटेन दीधीवेवीटामिति सूत्रे ध्वनितं च भाष्य इत्याहुः अनन्यतयेति गौणत्वेप्यनङ्गुणित्वयोः प्रव
त्तेरुक्तत्वाच्च नि विरोधः अभिव्यक्तिपदार्थायेद्वतिन्यायस्तु गौणमुख्यन्यायवत्पदकार्यविषयक एवे
त्यग्रे निरूपयिष्यामः पाठांतरं स्पष्टं केचित्तु तत्र पदशब्देन कार्यप्रवृत्तिवेलायां गौणार्थोपस्थापकोप
लक्षणोद्देश्यविधानौ तेन न्यायेनाङ्गादिविधावग्रहणं न च प्रसिद्धार्थस्यापि तत्र विशेषणतया भानाच्च दो
षः न्यायपदार्थे त्वन्ये न पदान्तस्य प्रतीतिविषयस्यैव ग्रहणात् अत एव व्याख्यास्यन्ते सखिपतिभ्यामि
ति न्यासे सखीपतेरप्रत्यये सख्युरित्यत्राव्याप्तिप्रतिपादनपरं भाष्यं विना संकोचमुपपद्यते सह स
खेन सख्यस्तामिच्छतीति कैयटादिकृतं भक्त्या व्याख्यानं चिन्त्यमेव तस्मात् सखीः सख्यावित्येवेत्याहुः त
त्र मन्थेनस्येति सूत्रे परिग्रहणपुण्यपतेरप्यनेक्षाप्रत्यये प्रयोजनप्रदर्शनं परिभाष्यविरोधात् इत्यंते

दीर्घस्यापीति खिते परस्येति वक्तव्ये कृतयणानिर्देशादिति भावः ननु अनिसखेर्भूणते रित्यादि गुण
विषयव्याप्त्यर्थं यणानिर्देशः न चात्र गुणो कृतेपि खिति शास्त्रयोगेण प्रत्यभिज्ञामानाभावेन खितिशा
स्त्राभावेन तदप्राप्तिः एकदेशविकृतन्यायोपि न अर्धस्य तदधिकस्य वा विकारेण प्रत्यभिज्ञाभावादिति
वाच्यं खितांगत्वसापेक्षगुणापेक्षया यणोऽन्तरंगत्वात् एवं सख्युरित्यादावपि एरनेकाच इति यणो
न्तरंगत्वात्पूर्वमेव प्रवृत्तिः सख्युरित्यादिनिर्देशान्नेति चेन्न तदर्थं कृतस्यान्यसंग्राहकत्वे
ऽपि बाधकाभावात् न च यणानिर्देशस्य दीर्घसंग्राहकत्वे याचारितार्थेन वाक्यार्थान्वयित्वे माना
भावेन यणि विषये उत्तं न गुणविषये इत्यर्थासिद्धिरिति वाच्यं भाष्यप्रामाण्ये न यकारांतानुकरण
स्य सूत्रे अंगीकारेण अदोषात् अत एवोच्चारणार्थोऽकार इत्याहुर्नेत्र यणार्थ इति एवं च विषयेऽप्रा
प्तिः सिद्धेव दीर्घप्रकृतिकग्रहणं च सिद्धं ङस्यादि परत्वादप्राः खिट खीति तीपाद्दुप्रकृतिक एव सं
भवतीति आशयेन मूले खिखीत्याद्युक्तं अपत्यादिशब्देभ्य आचक्षाण एपंतेभ्यः क्विपि तु टिलोप योनभिधानमेवे
स्य णिलोपस्य च स्थानिवद्भावादस्य प्रसक्तिरेव नेति ध्येयं प्रद्धिय इति न चात्राभीयत्वेनातोलोप। तिबोध्यं
स्यासिद्धत्वं व्याश्रयत्वात् न चात्र यणापत्तिः संयोगपूर्वत्वात् इतीदंताः तृज्वत् क्रुशधात्वोनेरस्त
तस्तु निक्रोष्टुशब्दस्तत्र चिक्रोष्टृशब्दः द्वावपि शृगालार्थौ न चाविशेषेण द्वयोः प्रयोगे प्राप्ते सर्वना
मस्थाने स्त्रियांच तृजंत एव तृतीयादावचुभयं अन्यत्र तु नंत एवेति नियमार्थो त्रिसूत्री क्रोष्टुरि
ति तुनंतान्प्रथमान्तत्वादितित्तृतीयां नाहृत्तिः तजंतेन तुल्यमिति नायं सप्तम्यामंत्रिते परांगवदिति

१७
१२८

178

शा॰ शे॰

वन्नादात्म्यातिदेशः तद्धन्तस्य हस्वयोगाभावात् नापि पूर्ववत्तत्र इतिवन्निमित्तातिदेशः तस्याशक्यातिदे
शत्वात् ब्राह्मणवत् नहि ब्राह्मणस्य श्राद्धभोक्तृत्वादौ निमित्तभूतं ब्राह्मण्यं वचनशतेनाप्यतिदे
ष्टुं शक्यते यद्यप्याहार्यारोपेणापि शास्त्रप्रवृत्तेर्निमित्तातिदेशोपि वक्तुं शक्यः ब्राह्मण्यं तु अनारोपि
तमेव श्राद्धभोजने निमित्तमिति लोकेन दोषस्तथापि तत्तत्तत्त्वरूपनिमित्तातिदेशश्च गुणेऽस्ति गुण
नादेशे तत्तत्तोद्देश्यकालाप्तिरिति दीर्घ एव स्यात् न त्वन्ङ्गुणो न नुनयोरभावेऽप्यधामचोभावादीर्घा
प्रवृत्तावतिदेशवैयर्थ्यं न च देवदत्तस्य क्रोष्टुत्यादौ तृज्वत्कारकाभ्यामिति षष्ठीसमासनिषेधेन चारितार्थ्यं
अस्य सूत्राले रूढत्वेन कर्मणि षष्ठ्याः असंभवात् कर्तृत्वेन कर्तृषष्ठ्या अप्यसंभवाच्चेति चेन्न तसि
गुणाय वादेशाच्चारितार्थ्यात् किं चान्तरस्तद्धये वैयर्थ्यापत्तिः अप्राप्तिरिति सूत्रे क्रोष्टुग्रहणेनैव सि
द्धावस्यापि वैयर्थ्यापत्तेश्च पारोन्तरं उत्तरसूत्रहृदयस्य सामर्थ्यादप्राप्तिर्न्यपत्र क्रोष्टुग्रहणेनैव सि
द्धावस्यापि इत्यन्तं एतेन अस्याप्यंतवदिति वत्तत्तेन तत्त्वरूपव्यपदेश्यस्यातिदेश इति परास्तं यदि तु सा उत्तरसूत्रे त्यत्र सं
मर्थ्यात्कार्यमात्रप्रवृत्तंगीकार इत्युच्यते तर्हि शास्त्रकार्ययोरतिदेश एव ज्ञापयितुं युक्तं नापि तयो
रपि वक्तुं शक्यः अंगाधिकारे पाठेनांगयोरेव तयोरतिदेशापत्तेः तथाच परत्वेऽपि पुंवत्त्वेऽदित्या
दीनामतिदेशानापत्तिः यद्यपि स्त्रियां चेत्यतिदेशोनानांगस्याप्यतिदेशाः तेन हि श्वश्रूस्तस्याः स्त्री
त्वनिमित्तकस्यैवातिदेशस्तन्निमित्तकानिमित्तकस्यवा न च तारशामांगमस्तीति तथापि क्रोष्टुत्यां
दौ रेफश्रवणानापत्तिः कथंचिद्रेफस्यलाभेपि तुनं तस्याद्युदात्तत्वोदात्तस्यानि कयणोऽभावेनो
स्या

दात्तयणोर्हल्पूर्वादिति स्वरानापत्तिः अर्थातिदेशत्वसंभवाच्च नन्वत्र तत्रं तयोरर्थैक्यस्याप्यत्र तद
वसत्वात् तत्सत्वे मानाभावाच्चेति तत्राप्यव्याख्यास्यामित्यादौ निरूपयिष्यामः तस्माद्रूपातिदेशोऽयम्
प्राधान्याच्च तत्रापि न प्रयोगसमवायिकोऽष्टारित्यादिग्रहणम् अनेकत्वात् उदात्तस्थाने यणो भावादुदा
त्तयणो हल्पूर्वादिति स्वरानापत्तेश्च किंतु शास्त्रीयं कार्यं कृत्यते तत्रं तत्त्वबोधार्थं शास्त्रं त्वेषणस्यावश्य
कत्वेन तस्यैवोपस्थितत्वात् स्वस्यासत्त्वाच्च तत्रत्त्ववदिति चकारग्रहणसामर्थ्याद्दीर्घादीनामिवस्व
रस्यापि स्थानेन शास्त्रेण प्रवृत्ते अकारस्योदात्तत्वादुदात्तयणः इत्यादिस्वरसिद्धिरित्यभिप्रेत्याह क्रोष्टुशा
स्वरविशिष्टस्यरू पस्यातिदेशो
ब्देति यत्स्वादेस्तुनातिदेशः अर्थतत्प्रान्तर्याभावात् अयं च नियमः असंबुद्धौ सर्वनामस्थाने क्रोष्टु
शब्दस्येति न चैवं यतेर्दिगीनि वतस्थान्यादेशभावबोधकमेवास्त्विति वाच्यम् वत्करणवैयर्थ्या
पत्तेः टिगिवदस्य मानान्तरेणासिध्यभावाच्चेति दिक् ऋतोङि कृहहस्थनयोरनुकरणवारणाय
तपरत्वं अप्राप्तम् तत्र निवर्तकत्वे ह्रस्वयोरुपादाने ह्रस्वान्तसामान्योपादानेऽपि विशेषग्रहणार्थमतेन त
कोपधायाः इति सूत्रेण तद्भिन्नावग्रहणं सिद्धमित्याहुः तत्र विनिगमनाविरहेण विशेषद्वयस्यापि ग्रह
णापत्तेः तत्रापि तेविचारितार्थ्याभावात् केचित्तु अर्थवत्परिभाषया नित्यत्वज्ञापनद्वाराऽर्थवण
त्त्वस्यावत्यर्थम् तेनानित्यग्रहणान्यर्थवत्त्वेनेति सिद्धमित्याहुः तत्र प्रत्यययोरिति परि
भाषया अत्रादेशवारणात् तस्याप्यनित्यत्वं ज्ञाप्यतः त्वतो फलाभावात्तदर्थं न तपरकरणं
बोध्यमिति तत्र स्थांगग्रहणेनैव तयोरनित्यत्वज्ञापनस्य सिद्धेश्च तस्मात्तनिवर्तकत्वमेवास्य

१७९
179

शा॰ शे॰

ऽपि वेदं एङ्ह्रस्वाच्चेति सूत्रे भाष्ये ननु एङ्ह्रस्वाच्चेति सूत्रस्य भाष्यबोधितवृत्त्यनित्यत्वेऽपि तत्र तत्त्वा
न्तं ततो भाषादौ दीर्घसिद्धेन आदिग्रहणं व्यर्थमतस्तद्ग्रहणं नियमार्थमिति अन्येषामुणादिवृत्त्यन्तानां सत्ता
शब्दानां नेति तेन धातुशब्दे दीर्घो भवत्येव तस्योणादिवृत्त्यन्तत्वाभावात् अवृत्त्यन्तपक्षे तु विध्य
र्थमेव बोध्यं स च पक्षोऽनःकृकमीति सूत्रे कमिग्रहणेनैव सिद्धे कंसग्रहणेन ज्ञाप्यते न च दंष्ट्रेन केसरे
वेदं रूपं प्रत्ययस्य लुक्श्लुलुप इति सूत्रस्थकैयटहरदत्तादिप्रामाण्येन तस्य रश्मविषये प्रयोगाभावा
नुमानादित्याह इह उणादिमात्रादेयानिरनुबन्धकत्वप्रत्यान्ता इति एङ्ह्रस्वाच्चेति सूत्रस्य भाष्यस्वरसः
तदापि विध्यर्थमिव न ञ्यादिग्रहणं बोध्यं शक्त्वादेरचात्त्वसिद्धये तन्नृत्तचौर्थं सितदादिष्वपि रक्षुणा
दिसूत्रे नुबन्धोच्चारणमावश्यकं वक्ष्यमाणादिना तत्साधनस्यागतिकगतित्वादिति तु मूलाशयः भाष्यप्र
योगादिति एवं चोणादिषु स्पष्टव्युत्पादनमप्रामाणिकमिति भावः पंकजपदवत् अष्टाध्यायीव्युत्प
न्नत्वेऽपि योगरूढिस्वीकारे बाधकाभावादिति तत्त्वं क्रोष्टेति अनङ् हलङ्यादिलोपान्यरत्वादुपधादी
र्घः स च सर्वनामस्थाने चेत्यनेन यद्यपि सिध्यति + तथापि परत्वात् तृज्वद्भावेनान्याय्यः कार्येऽपि वि
प्रतिषेधप्रवृत्तेर्नपुंसकस्य झलच इत्यादिसूत्रस्य भाष्ये पुंवद्भावोद्दर्शनात् कृतेऽप्यनङि एकवद्भावे शा
विकृतन्यायेनस्याङ्गविकृतत्वेन चतुर्जन्तत्वात् अन्यथा गुणे कृतेऽपि दीर्घानस्यादिति विभाषा तृती
यादिष्वचीत्यपि नियम एव तृतीयादावच्येवेत्यभयमिति तेन भ्यामादौ नासिच क्रोष्टुभ्य इत्यादौ
च न दोषः सर्वत्रविशिष्टाभावस्य स्तुलभत्वात् ननु तत्त्वं सर्वनामस्थान एवेति नियमात् स्यादि।

धर्थेनैवोचितेति वाच्यं उपक्रमस्य तृज्वदिति बोधितार्थस्यान्यत्र संबंधाभावबोधकत्वादुक्तनिय
मापत्त्योपसंहारस्य सर्वनामस्थानपदार्थसंकोचकस्य सर्वनामस्थान इत्यस्मादुक्तनियमे
स्यैव युक्तत्वेन विध्यर्थतायाः असंभवात् एवं स्त्रियां चेत्यपि नियम एव प्रकरणस्य युगपदेवावै
यर्थ्योपस्थित्या तस्य नियामकत्वोचितत्वात् नन्वेवमपि क्रोष्टुनित्याद्यसंगतं अन्यत्र तज्ज्ञेन
स्यैव प्रयोगेणाप्युक्तनियमस्य चारितार्थ्यादिति चेन्न तृज्वत्क्रोष्टुरिति योगविभागस्यैव पर्यापत्तेः
अत एव तत्र परकरणं भाष्यमानोपपत्तिः अचिन्त्यवर्णग्राहकत्वस्य ज्ञापनार्थमिति भाष्यकारः
पाठान्तरं ननु तृज्वत्सर्वनामस्थान एवेति नियमे इदस्य विध्यर्थमेवोचितं न च सर्वनामस्था
नेतुनंतप्रयोगापत्तिः क्रोष्टुरित्येव सूत्रयितव्ये क्रोष्टुशब्दादुद्देशेन तृज्वत् तृपातिदेशबोधक
गुरुतरन्यासेन वाचार्यविरोधात् तनप्रयोगापत्तिरिति चेन्न सर्वनामस्थाने स्त्रियां च क्रोष्टु+
शब्देन तृजन्तवद्रूपातिदेशेनार्थात्तृजन्तस्य प्रयोगवत् अन्यत्र तु नंतेतद्रूपातिदेशकाभावेना
भयोः प्रयोगस्यासिद्धत्वेनैवमपि विध्यर्थतायादुरुपपादत्वात् अयं सूत्रयोर्नियमतो नेतिस्तु नियम
फलकत्वात् इति बोध्यं नन्वेवमपि क्रोष्टुनित्याद्यसंगतं अन्यत्र तृजन्तस्यैव प्रयोगेणाप्युक्तनियमस्य
चारितार्थ्यादिति चेन्न तृज्वत्क्रोष्टुरिति योगविभागस्यैव पर्यापत्तेः न चैवं तर्हि तेष्टचायादेरिति सू
त्रस्य क्रोष्टुरिति भाष्यप्रयोगो गोरहितादेव च सूत्रस्य क्रोष्टीयाः इति च भाष्यप्रयोगस्यासंगतः स्यादि
ति वाच्यं क्रोष्टोऽयमिति विग्रहेणादोषात् क्रोष्टी [illegible] तिकस्याष्टिदपिमात्तुर्नामवानामधेय

धा॰ वे॰ स्येतिवाच्यं हि त्वं अस्य शुद्धसंज्ञानेन भाषितपुंस्त्वाभावात् न भस्यादेरिति पुंवत्त्वे ईकारस्यैव यस्येति
लोपात्परत्वात् हृदिशाश्याम् अत्रोदाहरणविरोध इति केचित् शिष्टप्रयोगादेव साधुत्वमित्यन्ये इत्येतं
सस्यैवेति संयोगान्तलोपेनैव सिद्धे नियमार्थमिति भावः नेनाकृ इत्यादौ लोपो न रादेवसस्येति विपरीतनि
यमस्तु न पुमान् स्त्रियेति निर्देशात् परत्वादिति न च नुट् नित्यः तद्भावे संनिपातपरिभाषया तद्वा
तेः इन्नुटंता: हूहूरिति अव्युत्पन्नसंज्ञेयं अतिचमूशब्दे नित्वेति प्रथमलिंगग्रहणं चेत्युक्ते उः स्तु एरनेकाच
इति सूत्रं परित्यज्य तदिह हितं सानुबन्धस्य विशेषणमनुवर्तन इत्यभिप्रेत्याह धात्ववयवेत्यादि वार्त्तिकानां
सूत्रशेषत्वेनानुवृत्तिमभिप्रेत्याह गतीति परमलुवाविति सकृल्लाविति अत्र लुक्रियाविशेषणत्वेनक
मेत्याद्य॰॰भवत्येवत्याहुः न भूसुधियोरिति निषेधे प्राप्ते आह वर्षाभ्वश्चेति भेके मण्डूकवर्षाभू शालूर
प्लवदर्दुरा इत्यमरोक्तेर्भिन्नलिंगानां नद्वंद्व इति तेन परिभाषणात्वं दर्दुरे पुंलिंगो यमिति भावः वर्षाभूर्द
र्दुरे पुमानिति यादवकोशोपि दर्दुरेषणीति पाठान्तरं षणीत्विपुंलिंगस्य प्राचां संज्ञाव्युत्पादितत् इति हभी
गं पाइति तदादेर्हृ प्रत्ययोनुमागश्च निपात्यत इत्यर्थः यद्यप्युज्ज्वलदत्तेन हंफूरिति पवर्गे द्वितीयं पठि
त्वादंफेन लोपाभावो निपात्यत इति व्याख्यातं तथापि रक्षितानुसारेण मूले यत्तु दशपादीवृत्तौ
दर्भणं दंभूः नुमागमो नस्यारश्च निपात्यते तन्निपातनसामर्थ्यात्परसवर्णो नेति तत्र नुम् निपातन
वैयर्थ्यात् नेनदंभ्र्यर्थस्य कर्त्ता कथकइत्यन्ये अयमृकारो न धातोरित्युवङोप्रसंगः हंभूमिति इ
को यणचीति यणश्रामिहरूर्वत्त्व हर्वसवर्णदीर्घाभ्यां बाध्यते एवं चायमृकारो न धातोरित्युवङोप्रसंगः

ग्रहणाभाव्यमिति दृन्पूर्वकभूप्रकृतिकदृंभूशब्देन सहन तद्रूपभेदइति माधवग्रंथ्यइतिभावः नचात्रानु+
स्वार परसवर्णयोरसिद्धत्वाद्दृन्करेतिपराशङ्क्यो तीतिवाच्यं दृन्त्रिन्यस्य भूरन्यस्य चानर्थकत्वेन तत्राग्र
हणात् स्पष्टं चेदं मनोरमायां कैयटेन देवधनयन्त्राह नांतेहि सार्थं इति एवं निष्पन्नश्चायं तद्रूभेद
स्वरूपभेदवाची कृप्यर्थं इत्यन्ये माधवस्तु दृढ शब्दे उपपदे भुवः क्विप्प्रत्ययः उपपदस्य दृन्नादेशश्चास्तु दृं
भूरित्यनेन निपात्यते एकादेशस्य पूर्वांतत्वेन च भूत्वमित्याह भूलेन तु श्रीपतिदत्तमतेन दृन्करेति यत्तु
वर्षादृन्करेति यत्तु वर्षादृन्करेत्यस्य भुवश्चेत्यग्रहणं प्रत्युत पूर्वस्यैवेति नियमार्थं तामाश्रित्य न भूरित्यस्त्वे
विपरीत भूयग्रहणं त्याज्यमिति तन्न नियमापत्तेः प्रधानयात्संकोचापेक्षया ऽप्रधानोपपदसंकोचस्य न्याय्य
त्वेन तस्यैव युक्तत्वादित्याहुः अत्र दृन्निति नांतपाठः मानपाठोपिकेषांचित् दृन्काकारेतिपाठस्तु कैय
टादिविरुद्धः इदं च वार्त्तिकं वर्षाभ्वश्चेति चेनानुक्तसमुच्चयार्थेन संगृहीतमित्याहुः दीर्घपाठे दृन्दृन्कारे
तिपाठस्त्वयुक्तः अयमेव भाष्यादिसंमत इति तत्त्वम् अत्राहुः अत्र पाठेपि हलवाचककारशब्दस्यैवग्र
हणं पाठांतरे ऐकार्थ्यलाभात् प्रसिद्धत्वाद्व्याख्यानाच्च तेन भिदा घडि निष्पन्नकाराशब्दपूर्वकेकारा
भूरित्यादौ लिंगविशिष्टपरिभाषया पूर्वांतवत्त्वे न वाशङ्क्यापि परानेति यत्तु दृन्कार पुनर्भ्व इति वक्त
व्ये पूर्वग्रहणस्य व्यवहितेपि प्रवृत्त्यर्थत्वात् वर्षाभ्वः पुनर्भ्व इत्यादौ यणभवत्येवेति तन्न परिभाषाप्रा
प्तानुवादकत्वेनैवोपपन्नो वाचनिकत्वे मानाभावात् वर्षाभ्वश्चेति सूत्रकर्तुः वर्षाभू पुनर्भ्वश्चेति व
क्तव्यमिति वार्त्तिककर्तुः अत्यल्पमिदमुच्यते वर्षादृन्क पुनः पूर्वस्यैव वक्तव्यमिति वक्तुः परस्परं विरो

प्रा. शे.

धापत्तेश्च एतेनदन्त्यकारेनिरूस्यपाठोपि स्वार्थिकाणंतकारशब्दप्रकृतिभागस्यैकदेशग्राह्यविकृतिन्या
येनकारशब्दत्वात्पूर्वग्रहणेनव्यवहितग्रहणाददण्डव्यवधानेपिपराभवत्येवेतिपरास्तम् अनेनैते णं
कारशब्दत्वंतुदुर्लभं अणोऽविकारत्वात् एवंचरूस्यपाठेकारशब्दस्यावड्ढदीर्घपाठेतुकारशब्दस्या
सत्त्वेतिबोध्यं स्वार्थिकइति स्वस्याःप्रकृतेरर्थःस्वार्थस्तत्रभवःस्वार्थिकः अध्यात्मादित्वाट्ठञ्
द्वारादित्वप्रयुक्तैजागमस्तुनद्वारादिषुस्वग्रामस्याध्याययोपाठेनस्वशब्दादेशेतुदेशयोरेवेतिनि
यमार्थकेनाप्राप्तेः स्वाकुः पुनश्शब्दस्यरूढस्यनित्यस्त्रीत्वाद्दाह योगिकइति रूढयोगापहारस्कन्वा
दिभिर्दंचित्यमित्किञ्चित् लक्षणयातत्राप्रयोगइत्यन्ये इत्यूदन्ताः वर्णैकदेशानांवर्णग्रहणेना
ग्रहणेरेफाभावेनग्रहणेपिउत्तरत्रानुभागेनव्यवधानान्नणत्वाभावात्राह ऋवर्णादिति नचतस्या
नुभागस्यान्ग्रहणेनग्रहणं मानाभावात् आद्यंतसदृशानामनेकदेशानामेवमध्यस्थानांस्व
ग्रादिशब्दाहारसंज्ञाविधानाच्च व्युत्पत्तिपक्षेपीति अव्युत्पत्तिपक्षेतुअवादिष्वपाठदीर्घशंकैवने

कंदसीतिन नानुवर्त्तते

तिभावः नृच कंदस्युभयथेत्यतउभयथेत्यनुवर्त्तते नृणामेकोगमप्रत्ययादिप्रयोगविरोधात्
पूर्वसूत्रेणैवसिद्धौनृचेत्यस्यैवपर्यापत्तेश्च यत्तुपूर्वत्रनन्नतिस्यचनस्त्रइत्यनुवर्त्तनइतितन्न अवि
शेषेणविकल्पदर्शनात् अतएवधाताधातॄणामितिमन्त्रेनैत्तिरीयेर्ह्रस्वःपठ्यते वह्वचेस्तु
दीर्घइतिदिक् इत्यूदन्ताः प्रकृतिवदनुकरणेति यत्तदेतेभ्यःइत्यत्रत्यदाद्यत्वकरणाद्दतिदेश
स्यैकशेषाकरणेनवैकल्पिकत्वस्यचज्ञापनादितिभावः इत्वइति नचधातोस्वरूपग्रहणेन

तत्प्रत्यये कार्यविज्ञानात्कथमित्थं न तस्य रूपग्रहणे तत्प्रत्ययस्याप्युत्पन्नानुवादत्वदिति वाच्यं किरश्च पं
चभ्य इति निर्देशान्न तस्याश्चत्राप्रवृत्तेः नचैवमनुकार्यानुकरणयोर्भेदविवक्षायामनुकरणस्या
र्थवत्वेप्यनेनातिदेशेन धातुत्वात्कथं प्रातिपदिकत्वमिति वाच्यं वैकल्पिकत्वात् यत्तु अति।
देशेन धातुत्वेपि स्वनिष्ठानुत्वमादाय संज्ञापत्तिः अधातुरिति हि पर्युदासो तिस्मातिदेशिक
कार्याभावादतिदेशाप्रवृत्तौ नहि रूढमपि त्वाश्रयं प्रवर्त्तते इति लिपोटीर्घादित्यत्र केपटे
नोक्तं तत्त्वौ एवं च पचन्तं तं डुलानि त्यादावप्यतिदेशाप्रवृत्तौ स्वाश्रयाप्रत्ययांतत्वनिबंधन
प्रातिपदिकत्वापत्तेः यदि तु शास्त्रतात्पर्यविषयस्य प्रत्ययांतादिषु प्रातिपदिकत्वाभावस्य
सिद्धये तत्रातिदेशाप्रवृत्तेर्न तद्धि रूढप्रातिपदिकत्वमिति विभाव्यते तर्हि प्रकृतेपि समंश्च
तएव हि लिपोटीर्घादित्यत्र उयङ धन्वकुतिव दित्यतिदेशांगीकारे स्वाद्यनुत्पत्ति मांशंको
वं तर्ह्यातिदेशिकानां स्वाश्रयाणपि न निवर्त्तते इति समाधाय अथवा त्वेन तत्रैवमपि न दो
षः निर्देशसामर्थ्यादेव न ङन्त्यत्ते रिति समाहितं तत्रापि थापीत्यस्यायं भावः विरुद्धनिवृत्ति
रावश्यकेति इति दिक् नन्वेवमप्यर्थवत्वाभावादेव न प्रातिपदिकत्वं तस्याहि अर्थवत्वं
वृत्यार्थबोधकत्वं अनुकरणत्वं च स्वसदृशशब्दमात्रतात्पर्यकोच्चारणविषयत्वं एवं
च तच्छब्दादिः सादृश्याख्यसंबंधेन स्वसदृशशब्दानुपस्थापयति नत्वोपस्थितस्यापि
शाब्दबोधेऽन्वयप्रतियोगित्वं व्युत्पत्तिवैचित्र्यादनुभवबलात्तात्पर्यवशाच्च स्वीक्रियते एवं

प्रा॰ शे॰

च वृत्त्यार्थबोधकत्वाभावः स्पष्ट एव यद्वा तिर्यो श्रोत्रगृहीतः शब्द एवार्थे तात्पर्याभावात्कार्यबो
धयः तदेतत्तत्र तत्राकरे उच्यते अनुकार्यानुकरणयोरभेदविवक्षायामर्थवत्त्वाभावान्न प्रातिप
दिकत्वमिति सारस्वतपद्धतिकाभेषात् भेदाभेदविवक्षास्वरूपेणार्थेनार्थवत्त्वेऽप्युक्तं ता
दृशार्थवत्त्वस्याख्यापकत्वेनार्थवत्त्वग्रहणसामर्थ्यान्न द्वितीयमिति वा ह्यार्थस्यैव ग्रहणात्
तस्यापि वृत्त्यपि विषयत्वाच्च श्रोत्रेणैव तद्रूपस्थितिर्न वृत्त्या अत एव गवित्ययमाहेत्यादौ न वि
भक्तिः अत एव भूसत्तायामित्यादि निर्देशाः संगच्छन्ते इयमेव वाभेदविवक्षा नाम यद्वृत्त्यार्थ
बोधकत्वाभावः नचैतेषामपदत्वादसाधुत्वं स्यात् अत एव लिंगाद्यपदत्वेऽपि साधुत्वांगीकारात्परि
निष्ठितत्वाच्चापरिनिष्ठितं न प्रयुंजीतेति निषेधस्याविषयः अपदं न प्रयुंजीतेत्यस्याप्ययमेवार्थः
सर्वथा प्रकृतेः प्रातिपदिकत्वं न प्राप्नोतीति चेन्न प्रकृते भेदविवक्षायामंगीकारात् अर्थवत्त्व
स्यापि वृत्तिविषयत्वमेवेति भावः अत एव भुवो वुगित्यादि निर्देशाः संगच्छन्ते स्पष्टश्चायं पक्षो
मतोक्तः सूत्रेति सूत्रे भाष्ये भेदाभेदपक्षयोश्च लक्ष्यानुरोधेन व्यवस्थेति दिक् कीरिति कृ
धातुरित्याद्यर्थः गुणोऽनेति ऋतउदित्युत्वमप्यत एव न अत एव ग्रो यङीति सूत्रनिर्देशाः संग
च्छन्ते इन्नन्ताः अनडिति ऋलृवर्णयोः सावर्ण्यादिति भावः गमॄनिति लृवर्णस्य दीर्घाभावा
दृवर्ण एवेति भावः ननु तुल्यास्यमिति सूत्रे भाष्ये ईषत्स्पृष्टरेफद्वयगर्भलकारद्वयगर्भयोः ऋलृ
गिति सूत्रात्पूर्वं पाठेनाच्त्वं दीर्घत्वं चाश्रित्य ऋ इति सवर्णे ऋ इत्यादि वार्त्तिकद्वयं प्रत्याख्यातं अकः

सवर्णेऽ इत्येव सिद्धेः ऋकारहृदयस्थाने रेफहृदयवत्त्वात्तथा गुणकृतां तयोर्णकदाचिद्रेफहृदयगर्भस्य विवृ
तत्वांतर्येणाकदाचिद्धिलूतस्य लृकारे चलकारे चलकारवत्त्वांतर्येण कदाचिद्धिलकारस्य कदाचित्
विवृततत्सामान्ये रेफवत्त्वासाम्येन वालादयो ऋकारसिध्यातिविकल्पस्यापि लाभात् एवं च प्रथमयोरिन्या
दिरपि गङ्लृशब्दादिविषये हिलकारईषत्स्पृष्टो भाष्यनये इवीर इति चेन्न एकलृकारगर्भस्य विवृत
प्रयत्नत्वेन लृहृदयगर्भस्येषत्स्पृष्टत्वेन प्रयत्नभेदात्तयोः सावर्ण्याभावात् वार्त्तिकानुरोधेन भाष्यम
तेऽयोगवाहपाठस्यानित्यत्वाश्रयणेनान्यथासाधुत्वस्य कल्पनात् अत एव मुन्योऽफलेर्क्ये एते
नामिस्थानतश्चांतर्येण्यवत्त्वात् हृदयगर्भो भवत्येव गङ्लृनामिति तस्याधातुरूणां धान्ततेणामि
ति रूपहृदयमित्यपास्तमित्याहुः गम्लेति यत्र लगणितिस्त्रे उरण्रपर इत्यत्र पूर्वेणाप्रत्याहारः प
रेणवेति संदिग्धे न तावत्परेणकृत्रेथमित्यादौ सत्यपि रपरत्वे रोरीति लोपफलाभावात् एवं चार
न्नितिवक्तव्ये ऽणग्रहणसामर्थ्यात्पूर्वेणैवेत्युक्तं गम्लेत्यादौ यणादेशो हि तत्र लपरत्वार्थमेव
परेणाणग्रहणं स्यादिति सामर्थ्याभिरसतास्यात् तस्मादेतद्भाष्यप्रामाण्येन लृस्थाने नभिधा
नाद्यणादेशाभावोंगीकार्य इति तत्र ऋकारांशे हलरूपाणि रोरीति प्रवृत्त्या फलाभावेन तत्सा
हचर्यात् लृकारांशेपि हल्रूपाणि प्रवृत्तिरितिभाष्याशयात् अन्यथा व्याख्याने इत्यादिमहाग्र
न्थविरोध इत्याहुः इति लृदंताः सेरिति इनासहवर्त्तेत इति तेन स हेति तुल्ययोग इति बहुव्री
हिः वोपसर्जनस्येति सत्वं अत एव स इत्येकादेशास्यपूर्वांतत्वेन ग्रहणादव्ययत्वात्सुपो लुगिति प
रास्तं उपसर्जनत्वेन सहशब्दस्यानव्ययत्वात् न चांतरंगत्वादाद्गुणे सहेत्र इति रूपं स्यात्

श॰कौ॰ न च मतः सादेशः पूर्वमप्येवं तद्रूपासिद्धेः पाठं हितिवाच्यं उत्तरपदाधिकारस्य बहिरंगत्वे
नांतरंगपरिभाषाऽप्रवृत्तेरिह एकाचो मूप्रत्ययमिति सूत्रे भाष्ये उक्तत्वेनाप्तते इत्यंते पूर्वपदोत्तर
पदनिबंधनस्य सादेशस्योभयत्राश्रयेंताद्विवद्भावाभावादशात्रेष्टेति वाच्यं नेदमस्य परस्या
त्ति उत्तरपदवृद्धिनिषेधेन पूर्वपदोत्तरपदनिमित्तकार्यात्सर्वमेकादेशाभावस्तात्पन्नात् इदंचांदिव।
स्वीति सूत्रे निषिद्धनिषेधस्तत्रैव च भाष्येऽस्य ष्टंन न्वेषांप्र्षमेकवचने प्रयोगसत्वेनांतःपादमिति सूत्रेस्थं नचे
ङः पदांतानाम्यरोरूस्तीति भाष्यं विरुध्येत सावविपदत्वसत्वादिमतिचेन्न योगविभागसिद्धस्यतो
पदत्वस्य क्वाचित्कत्वान्नदोषः स्मृतय इति नन्वसेस्स्नेत्याधिकारस्य स्वंनवत्रिविभक्तिमाश्रित्य
पदांतत्वादेङः पदांतादिति पूर्वरूपमेव स्यादिति चेन्न भाष्ये स्यादिष्विति योगविभजस्य स्यादिषु पूर्वं
पदमित्यर्थः ततोऽसर्वनामस्थाने यचि भ इति भिन्नं पदेनिषेधार्थकमसत्वंनमित्यनुवर्तते या
ज्ञादौ सर्वनामस्थाने पूर्वं पदं न मध्येचेत्स्वं न यज्ञादिपरं तदपि पदं नेति व्याख्यातं तथाच
उत्तरपदस्य पदत्वाभावात् पदादिवद्भावेन न पदत्वं न च पूर्वांतवद्भावेनास्त्विति वाच्यं से ग्राह्
निष्टस्य तस्यापि प्रागुक्तरीत्या निषेधात् स्थानिदेशिकस्यापि तेन निषेध इति स्पष्टमेव उत्तरपद
त्वे चापदादिविधाविति वार्त्तिकोनापि भाष्ये वाकांतया उत्तरपदस्य तत्घटितस्य वापदत्वे सर्वस्या
पि स्त्रस्यपलक्षणस्य निषेध इत्यर्थान्नदोषः इतोऽदित्यनुवृत्ते सख्यंते सर्वनामस्थानग्रहणं प्रथम
यापि परिणम्यते शिादित्यनेन सामानाधिकरण्यादित्याह सर्वनामस्थानमिति प्राधान्यात्कार्या

तिदेशोऽयमित्याह गुणेत्कार्येति तत्र गुणेऽतः कार्यस्यासंभवात् गुणेतिद्यत्कार्यं तदातिदिश्यतु
इत्यर्थः शासेति ओकारान्तत्वाद्धि तस्यासंभवात् अचीत्यधिकाराच्च तद्धि तस्य शासोऽग्रहणादिति
भावः स्पष्टं चेदमिति एकादेशनिषेधभाष्ये गामित्यत्र परत्वाद्वृद्धिः प्राप्नोति आत्वस्यानवकाश
त्वेनापवादत्वात्तदेवोपपादयति चतसृणीति गोतस्त्विति तपरकरणे न धुनित्वायमर्थः अत एव
वचित्रगुरित्यादौ न दोषः अन्यथा गाधिकारेण तदन्तविधेः सत्त्वेनैकदेशविकृतन्यायेन गोतो हि
हितत्वेन दोषदुर्वार एव स्यात् तपरकरणेन हि गकारस्याविवक्षितत्वं स्पष्टं तदन्तत्विलभ्यते एवं
चौकारान्तत्वाभावादलिधौ स्थानिवत्त्वाभावाच्च न दोषः स्पष्टं चेदं स्थानिवत्सूत्रशेषभाष्ये विहि
तेति अत एव द्यविवेदिति वक्तव्ये ओकारविधानं चरितार्थं स्त्र्यौविति फअभिगमने रुन्यस्मा
द्धिचिगुणः केवलशब्दाग्रह स्पष्टीत्यादि हुश्री हि रुदाहृतः व्याख्यानात्त्रेहेतिलक्षणप्रतिपदो
क्तपरिभाषात्वर्णग्रहणेनेति भावः केचित्त्वर्णग्रहणे पितक्व चित्तस्यैतपरिभाषाप्रवृत्त्यंगी+
कारेणविशेषणेन फलमित्याहुः स्वनोरिति पन्नवयवादिषु एकादेश उत्तेनोदात्तः इतिस्वर
स्यासिद्धत्वं वक्तव्यं तस्यानिकापादीनां स्वरतत्त्वापत्तिवार्त्तिकव्याख्यावसरेऽवादेशेनास्युदा
हरणमिति स्वरितो वानुदात्ते पदादाविति सूत्रस्थभाष्यविरुध्यते प्रकृते पूर्वपदप्रकृतिस्वरेण
स्वनशब्दस्यांतोदात्तत्वे शेषनिघातेन उशारस्यानुदात्तत्वात्तदेकादेश एकादेशउदात्तेनो[illegible]
नुदात्तत्वे स्वनत्वेत्यादौ नदुदाहरणसंभवाद्धिति तत्र तृतीयादिष्वनभिधानेपि अन्यत्र तत्व

त्वेन मानाभावात्‌ यत्तु चः परस्मिन्निति सूत्रे भाष्ये पूर्वविधाविति किमर्थमित्याशंक्य हे गोरिति
प्रत्युदाहृत्य नैतदस्ति प्रयोजनमाचार्यप्रवृत्तिर्ज्ञापयति न संयुक्तिलोपे स्थानिवदिति यदयमेङ्ह्रस्वा
त्संबुद्धेरित्येङ्ग्रहणं करोतीति नैतदस्ति ज्ञापकं गोर्थमेतत्स्यात्‌ यत्तर्हि प्रत्याहारग्रहणं करोतीतर
था ह्येङ्ह्रस्वादिति ब्रूयादित्युक्तं तत्राह गोर्थमिति वदतेनैकारान्ताभावो ध्वनितः ज्ञापकेन च संभ
वत्याद्येकारान्ताभावोपि अन्यथैङ्ह्रस्वादिति सूत्रे एकारस्य तदर्थमावश्यकत्वेन प्रत्याहारग्रह
णस्य ज्ञापकताभङ्ग्यापत्तेरिति तत्र पूर्वविधावित्यस्याभावे स्थानिवद्भावेन ह्रस्वान्तत्वं निमित्तीकृत्य
प्रग्रहणाभावेपि लोपसंभवेन तदभावकल्पने मानाभावात्‌ न च त्यादिभ्यो विधिचि दीर्घप्रकृतिके
कारान्तार्थे प्रत्याहारग्रहणस्यावश्यकत्वेन कथं ज्ञापकत्वं पूर्वविधाविति सूत्रस्याभावे ऽभावाति
देशेन स्थानिवत्त्वादेङ्ग्रहणसत्त्वेपि न तल्लोपप्राप्तौ ज्ञापकत्वसंभवात्‌ अथवा यो ज्ञादेशा ति
द्वृति स्यादिभाष्येण न संकरणमपि स्थानिवत्प्रयुक्तं भवति स्यादेशप्रयुक्तं नेत्यभावादेशाश्रयेण प्र
त वृत्तिर्ध्वनितत्वात्‌ न च भाष्ये दीर्घादिप्रकृतिकैकारान्तेष्वाप्यनुपन्यासान्नैतत्प्रयोगाभावक
ल्पनापेक्षयोपलक्षणपरतया भाष्यव्याख्याया एवोचितत्वात्‌ एकाक्षरकोशविरोधेनाप्य।
वताप इत्यस्याभावः संबुद्धौ नद्वा भाष्यप्रामाण्यादावश्यकत्वादिति बोध्यं गोर्थमिति भाष्यस्य घेश्च
वृत्त्यपि लक्षणतायास्तत्वाप्यावश्यकत्वाच्च एतेन घोश्च सर्वनामस्थाने वृद्धिर्विधेयेति वार्त्ति
के घोषाहस्येवोपादानादन्याभावोनुमीयत इत्यपास्तं उपलक्षणतया व्याख्यानेनैवोपपत्ता

वभावकत्वेन मानाभावात् एतेन ओतोमिति सूत्रे ऽचि नवमित्यतिप्रसंगमाशंक्य आगो न इति
करिष्यत इत्युक्ता घोरूपसंख्यानं कर्त्तव्यमिति भाष्यव्याख्यातं ओकारान्तप्रातिपदिकोपसंख्यानं
कर्त्तव्यमिति तदर्थात् परे त्वनभिधानेपि न क्षतिरित्याहुः इति दिक् गवोहलि स्वत इत्यनोवि
भक्ताधि इत्यनुवर्त्तनेय त्वत्रापि स्फोटसमूह इति स्थाने तरमहर्त त्वस्य भाष्ये तत्कालं तेनैशब्दाभिप्रायं के
वलैरे शब्दस्यापि स्फोटस्यैव प्रयोगार्हत्वं भाष्यकर्त्तुरापतितः कतीति प्रयोगानुपपत्तिः नहि विग्रहो।
पि स्फोटः स्वविचराः रे शब्दोपि यकारादिप्रत्ययान्तः स्फोटसमूह इति स्वस्यैः भाष्यान्तरेस्त्र थैव लाभात् प
कारेणयकारादिः प्रत्ययोलत्वेन इकारउच्चारणार्थः पीति सूत्रेनाइष्यार्थकत्वेन दृष्टत्वयोपस्थि
तत्वाच्च तस्यैवोच्चारणं क्वचित्तु विसर्गरहितपाठ एव भाष्ये दृश्यते सत एवाचः पतिस्मिन्नित्यत्रा
पि स्वाशंशास्याप्यशामित्युदाहृतं भाष्ये इत्वलं स्वर्थैरे विभावास्पृपित्यमरः साहचर्यात्तत्त्वं संरूण
भूयसा सत्त्वेत्यादि प्रयोगाच्च इत्यजन्ताः पुंलिंगाः मेति इम्मूधातोः घवादेश्चिटाप एकादेशस्य पूर्वांत
त्वेन प्रातिपदिकत्वात्स्यादयः कार्यकाल पक्षेतु लिंगविशिष्टपरिभाषया प्रातिपदिकत्वं तद्ध्यापद्य।
मालां विशिष्टवोधनेन प्रातिपदिकत्वात्तद्वाचे त्यादौ त्वं न पदेव ह्याप्प्रातिपदिकादिति सूत्रस्य ड्याप् ग्र
हणं त्वनार्थमिति मूलपद्वाक्यशाकु आप इति पंचम्यंते न सामानाधिकरण्यात् अंगस्येत्यपि पंच
म्यावि परिणम्यते विशेषणेन तदंतविधिरित्याह आवंतादिति प्रीस्यादिति जसः शीत्यतोनुवृत्ते
रिति भावः इम इति यस्येति लोपस्तु न भवति स्थानिवत्वात् पूर्णां प्रतिषेधाच्च संबुद्धौ च बहुवचने जलीय
न एदिति आङि चाप इति सूत्रादाप इति चानुवर्त्तते ननु नित्यत्वेनोत्कृष्टत्वात् येन नाप्राप्तिन्याये

या॰ के॰ 185

न संवृद्धि परावर्तां गत्रूपैकविषयत्वाद्वा हलङ्याब्भ्य इति लोपं बाधित्वाण्त्वेऽप्यवसरत्वाद्याडिपो न स्या
त् तदेवं णीकारेऽपि हल्ङ्याब्भ्य इत्यादिसूत्रे आकारप्रश्लेषस्य वृद्ध्यमाणत्वेन स्थानिवद्भावेनाद्याप्याकार
रूपत्वाभावान्न दशास्येराह एङ्ह्रस्वादिति संनिपातपरिभाषा न संबुद्धिलोपेन प्रवर्तेत इत्यस्य संक
टावेदितं ङसिचेति चकारेण प्रकृतमोसि चेति परामृश्यत इति भावः रमामिति इति अत्वि
धावन्तादिवद्भावाप्रवृत्ते रेस्त्वकृतः घेर्ङिति इत्यतो नुवर्तते ङिति त्याप इति पंचम्या परस्यापि परिणम्य
त इत्यमिपि इत्याह ङित इति वचनस्येति पदस्येत्येवं वक्तुमुचितं अकारोच्चारणसामर्थ्येन पररूपाभावो
पपत्तेः उच्चारणार्थत्वसंभावनायाः रणापवादत्वानोक्तं स्याडप्येवमेव सुपि चेत्यतः सुपीत्य
नुवर्तनात्मालामिवाचरतो माला तत इत्यत्र न याट् वृद्धिरेचीति यत्तु समुदायावयवयोः संनि
धानेन नुवंध उभयोपकारकः अतत्परत्वादाटस्य नितरां ङित्त्वाप्याकिंच याडूहेत्यत्र मनोरमायां व्याख्ये
ति सूत्रे राज्ञग्रहणेन आजेकदेशस्य ग्रहणमुक्तं ततोऽत्र वैषम्यं दुर्वचं न चास्यानर्थकं आटो
र्थवतः क्वाप्यभावात् इति तन्न तत्र तत्कारोच्चारणसामर्थ्येन विलिंगपाठस्थितस्यैकदेशभूतस्य
ग्रहणेऽपीह ग्रहणे मानाभावात् कार्यकालविप्रतिषेधाभाववादिनां मते दोषाच्च सर्वनाम्नः स्या
आवनात्तरस्य सर्वनाम्नो विहितस्येत्यर्थः तेन मासपूर्वायेत्यस्याट् न अत्र ह्रस्वो न स्याट् तस्यावि
धयेनोद्देश्यत्वासंभवात् षष्ठ्यंतत्वाभावाच्च फलाभावाच्च न च संध्यभावः फलं आबाधेनैवोप
पत्तेर्बाधायोगात् नवैविंशति वचनस्य तथा च स्याङ्डिसेडे रित्येवस्तु त्रयेन ङेरिति संनिधानादि

करणेनैव संबध्यते न च ह्रस्वविधानसामर्थ्यात् ङसादावपि दीर्घाभावोऽस्तु फलम् आपद्यन्यस्य
च स्यात्तत्त्वमात्रकल्पनेनोपपन्नो याऽस्त्वबाधमानाभावात् तस्माद्ध्रस्वविधानसामर्थ्याद्दापोङ्
स्वरात्वमित्यभिप्रेत्याह आपश्चेति अत एव स्याड्ढ्रस्वश्चेति न सूत्रितम् न च सर्वनाम्नोऽस्तु ङेः इति कृतो ना
स्त्रितं अन्तरंगत्वात् याटि सर्वस्यै वरत्वादिष्टिरिति वाच्यं पूर्वमस्तु ङित्य सांतत्वाभावेनामुष्यैर
त्यादो मुत्वानापत्तेः पूर्वं मुत्वे तत्सिद्धिः स्पष्टैव एवं चामुमुपदिङ्स्यादौ व्याख्याभेदेन तद्रूपद्वय
वदिहापि स्यात् एवं च न त्वा सांतस्येत्यपपर्वे तत्र स्याट् ग्रहणमपि ज्ञापकं न चास्याडुदेशो
स्तु स्थानिवत्त्वेन प्रत्ययलक्षणेन वा तदेकदेशवत्त्वादमुष्मै इत्यादौ षत्वसिद्धिः दीर्घोच्चारणं त्वनड्दाव
विवोच्चारणार्थं न संभावनावारणायेति वाच्यं एवं ङ् सूत्रभाष्योक्तरीत्या कदाचिदं तोदात्त
त्वापत्त्यायसोरन्तोदात्तस्याप्यापत्तेः न च यौवामिस्याडागमे आमि सर्वनाम्न इति सुट् डुवोरः
स्याद्विशिष्टस्य निर्दिश्यमानत्वाभावात् आमोऽव्यवहितत्वाच्च परेण स्याटा बाधाच्च एतेन तु ह्र
स्वादिव्यपास्तं केचित्तु सर्वनाम्नः स्याड्ढ्रस्वश्चेति कार्ये याटस्तु न ह्रस्वः दीर्घोच्चार
णसामर्थ्यात् पररूपमकरोच्चारणेनापि वारयितुं शक्यमित्याहुः न चात्रैव सूत्रे परत्वाद्दोषः अमी
त्वस्यानुवृत्तये मं डूकप्लुतिराश्रयणीयेति वाच्यं सर्वनाम्नः स्याट्यादौ ह्रस्वश्चेत्यनेनैवं वाऽमी।
तिवाच्यं आवंतस्य गणपाठाभावेन सर्वनामत्वाभावादेकदेशस्येति गणे सर्वशब्देनेति शे
षः एतेन पूर्वकार्याभावात्संज्ञायाश्चरितार्थत्वात्पूर्वान्तत्वेन सार्वलिङ्गम्यपास्तं सर्वस्यामिति ह्रस्वा

186

शु॰ शे॰

दिक्तेस्तृतीयेरणस्यादावाधात् योत्तरेति अनेकमन्यपदार्थे इति बहुव्रीहिः सर्वनाम्नो वृत्तिमा
त्रे इति मात्रग्रहणसामर्थ्यात्संप्रत्ययेन तामत्वापि पुंवद्भावः प्रतिपदोक्तसेति दिक्पदसंज्ञार्थविहि
तत्वात्तत्वे उत्तरपूर्वायेइति यद्यपि वाक्ये यत्र कर्तृत्वाभ्यामुद्देश्यविधेयत्वं प्रतीयते योत्तरात्वप्रकार
ज्ञानविशेष्यतासाप्रसिद्धपूर्वायस्याश्रयर्थात् तथापि समासे तदप्रतीत्योत्तरापदस्य ज्ञान।
विशेष्यपर्यन्तलक्षकत्वेन गुणवाचकत्वाद्विशेषणत्वेन पूर्वनिपात इति भावः ननूत्तरस्या
पूर्वात्वप्रकारकज्ञानविशेष्यत्वविवक्षेयं तथा सति पूर्वापदस्य पूर्वनिपातः स्यात् नृविधे
परः शब्दार्थ इति न्यायेन विधेयबोधके लक्षणायाश्चानौचित्याच्च एतेन या पूर्वा सोत्तरेति विग्र
हः परास्तः पूर्वनिपातवैपरीत्यापत्तेः न च पूर्वापदस्यैव लाक्षणिकत्वेन गुणवचनत्वान्न इति
दिक्स्यष्टार्थमिति दिङ्नामसंज्ञानन्तराल इत्यस्य बहुव्रीह्यधिकारस्थत्वादिति भावः अनेन रायेन गर्ये
इति अपुरीति वार्त्तिकस्य पूर्वशब्दार्थस्य विशेष्यत्वे तात्पर्यं ननु पूः शब्दप्रयोगे इत्यर्थ इति भावः
तथा हि सति शास्त्रस्याल्पविषयता स्यादित्याहुः त्यक्तं शाकमितीयस्येत्यस्य पुंनपुंसकार्यमा
वश्यकत्वादिति भावः ननु भागधेकानुप्रत्ययान्तत्वाल्लक्षणेन यातीयस्येति वार्त्तिकाप्रवृत्तेर्भ।
क्तौ विवक्षितायां स्त्रीलिंगे विकल्पार्थं सूत्रमावश्यकं अत्र तस्य चेत् नु न प्रतिपदोक्तपरिभाषाप्रवृत्ते
प्रतिपदोक्तस्याभावात् न च महाविभाषयानभावे वार्त्तिकप्रवृत्त्यानुपहृपां सिद्धमिति वाच्यं तत्सू वे
त्रे महाविभाषासंबंधस्य नहि तेव रूपमार्गत्वात् अग्राक्षदाज्ञस्य तथापि रूपद्वयासिद्धेश्चिवे

स्थानिवद्भावनिषेधइतिवार्त्तिकमतेपिसुलोपयाडादिकंभवत्येवेतिनदोषिन अतिखट्वायेत्यु
दाहरणपरिभाष्यविरोधात् केचित्तुअभिधानेपिनक्षतिः स्थानिवद्भावस्यकार्यार्थत्वेना।
तिखट्वशब्दे आकारप्रश्लेषफलाभावात्तदप्रवृत्तेः स्थानिन्यापव्यवृद्धेरभावात्तदादेशोनदारोहः
सूत्रमतेपिदुर्लभः परं परयाकार्यमादायाद्यस्थानिवत्त्वप्रवृत्तेर्नमानमित्याहुः अवंदंगमि
ति प्रत्ययग्रहणेऽइतिपरिभाषयाऽतिखट्वस्यनावंतत्वं यद्वावंतखट्वेतिनदंगमितिभावः प्र
प्रत्ययग्रहणपरिभाषात्वंगसंज्ञासूत्रेयस्मात्प्रत्ययविधिस्तदादिप्रत्ययइतियोगविभागा
त्सिद्धा प्रत्ययेगृह्यमाणेयस्मात्सविधिस्तदादिगृह्यतइत्यर्थात् नन्वनयावंतग्रहणे।
तेनचांगविशेषणेऽआवंतांतपदंगमित्यर्थादतिखट्वायेत्यादौदोषस्तदवस्थः आत्पदवाच्या
पोरदीर्घत्वइत्यस्यातिखट्वायेत्युदाहरणंभाष्येदत्तं अन्यथास्थानिवद्भावेपिप्राप्त्यभावात्किं
तेनेतिचेन्नअंगस्यविशेषणत्वाश्रयणात् अत्रवदन्तत्यापख्यानपरंभाष्यमेवमानं नन्वस्त्री
८ प्रत्ययेवाचनिकस्तदादिविधिनिषेधोभाष्येपठितस्तत्कथंमत्रतस्यप्राप्तिरतआह उपसर्जने
तिस्त्रीप्रत्ययेचानुपसर्जनेनेतिवचनस्यैवभाष्येपाठादितिभावः यः शब्दः स्त्रियंप्राधान्येनाह त
त्रतदादिनियमेनस्त्रीप्रत्ययांतत्वाभावेपितदंतत्वप्रयुक्तंकार्यंकर्तव्यमित्यर्थः यस्तुअप्रधानत्वे
नाहतस्यसमुदायस्यतदादिनियमेनतदंतत्वप्रयुक्तंकार्यंनेतिभावः इग्यणः संप्रसारण

मिति स्वत्रेभाष्यस्यै केचित्तु अस्याकारस्य लाक्षणिकत्वेन नात्र याङ्ग्रहणं ग्रहणेपि क्वचित्तु प्रतिपदो-
क्तपरिभाषांगीकारात् इत्याहुः तन्न खकाग्ये इत्यादौ चरितार्थमित्याहुः अश्च अत्र राज्ञि साहचर्या
तु भ्राजिः फणादिरेव तेनान्यस्य विभ्राजिरित्येवत्याकारः ननु राज्ञेः पृथक् भ्राजिग्रहणं व्यर्थम् तन्मध्ये
पि राजेः सत्वात् न च साहचर्यसंपादनद्वारा फणादिभ्राजेरेव ग्रहणार्थं तन्नु इति वाच्यं विभ्राड्विभ्रा
जिति हि रूपद्वयं साध्यं तच्च व्रश्चादिसूत्रे राज इति पठित्वापि सुसाधं एकस्य भ्राजते र्ककारस्य प्रगापि
दातुं शक्यत्वात् यद्वा एकस्यानुबंधांतरमेवास्तु एवं च भ्राजभासेति भ्राजिग्रहणमपि न कार्यमित्यप
रं लाघवं राड्विभ्राडित्यादौ राजत्वं तु भूतपूर्वगत्या रांजत्यणातीति राशब्दपूर्वकजधातोः क्विपि निष्प
न्न राज्शब्देन पुंसकेन तु न षत्वं लाक्षणिकत्वात् अत एव राज्ञः इत्राज्ञ्इति समासोत्पन्नराजशब्द-
शब्देपि न षत्वं अनभिव्यक्तपदार्थकत्वाच्च व्रश्चादिसाहचर्येण प्रसिद्धत्वेन धातुपाठपठितानामे
व ग्रहणाच्च व्रश्चादिवदकारे एववक्तव्ये अकारउच्चारणार्थ एव सन्निरनव्यावर्तकोन्यथेने इत्संज्ञकः
अनुनासिकत्वे मानाभावात् गौरवाच्च एतेनानुबंधनिर्देशेन यङ्लुकि राराष्टीत्यादौ षत्वं न स्या
दित्यपास्तं यङ्लुक एकादेशत्वाच्च श्तिपा शपेत्यस्यानित्यत्वेनाद्येति चेन्न अनर्थकत्वात्
व्रश्चादिसाहचर्येण धातुसंज्ञकस्य राज एव ग्रहणाच्च एवं च भ्राजिग्रहणमेव विनिगमनाविरहा
द्व्यर्थं वत्परिभाषायाश्च ज्ञापकं एतदाशयेनैव सीरदेवोप्य अत्परिभाषाज्ञापकमिदमुक्तवानित्या
हुः किं च राज्ञेः पृथीभ्रोपास्थितिकत्वेन विलंबोपस्थितिकदेशस्य ग्रहणं वक्तुमशक्यं न च अकारा

रोच्चारणसामर्थ्यात्परिभाषात्रयस्यापिबाधोऽत्र माऽस्तु च भ्राजिग्रहणमितिवाच्यं तर्हि ल्वाल्लक्षणं
कस्यापिप्राप्नुवतीत्यानिष्ट्यत्रराजत्रप्यस्यैव स्यात् ऋकारान्तरूपस्य प्रयोगे सत्त्वात् अतोयथान्या
समेव साधुपदं सीरदेवेनाप्येवं परिभाषात्रयबाधकत्वमस्योक्तं ननु सहचरितपरिभाषयान्यथासि
द्धेश्चनितं चेदं प्राह हेतिवार्त्तिकमनोरमायां सीरदेवोक्तं ज्ञापकमित्यत्र क्तौ तिदिक्क्ष कशोवर्णेना
भ्यांजश्चादिसाहचर्यान्नर्दनग्रहणमित्याह कशांनयोरिति कशयोरित्युक्तेऽपिकाललिरिति
चित्यविशेष्यासंनिधानात्स्त्र अनादेशइति अलोंऽत्यस्येतिवचनात् अत्र झलो झलीतिसूत्रात् झ
लीत्यनुवर्त्तते पदस्येतिस्कोरित्यंतोऽतइतिचतदाह सलीपो: झडित्यत्र क्लितीत्यनुवृत्ते: षढोत्या
दोषादेशाभावात् शांतत्वेन षत्वाप्राप्तौ कग्रहणं अत्रापिसत्तु निर्देशोबोध्यः येषांतुतत्र
क्लितीतिनानुवर्त्तते तेषां कः षत्वविधानंव्यर्थं शांतत्वादेवसिद्धेरिति क्तो: अडितिसूत्रेभाष्ये
स्पष्टं तस्याड्त्वादिति चयोद्वितीयाइत्यस्यनादित्याक्रोशेइतिसूत्रेभाष्येपठितत्वादितिभाव:
टतयोरिति धुडभावेटस्यधुरितुलकारस्येतिभाव: नभवतीतिइति जस्त्वात्प्राक्षस्यनेत्यर्थे जस्
त्वेनुकृतेप्राप्तिरेवनेतिवाच्यं केचित्विति अत्रारुचिबीजंतुसाहचर्येणेवधातुग्रहणेसिद्धे
ऽनुवृत्तिर्व्यर्थेति जस्त्वेनेति यत्तु झलांजशझशीतिनिर्देशात् शस्यनजस्त्वमिति तन्न अ
विकृतस्यचरूपप्रतिपादनेतात्पर्यादयसमयादित्वेनभत्वाच्च तत्रतदप्राप्तेन्यायसिद्धायांज्ञा
पकत्वायोगात् उपदेशेजनुनासिकइत्यादिनिर्देशे: क्त्वायगनापत्नौ सर्वोपलब्धाप्तेश्च

शा॰श्रो॰ नित्यस्त्रियाविति पक्षे शाः क्रोडेरित्यनिक्तत्वे निवृत्तिः कृत्यानिं पिबोध्यं अन्ये तु निशाप्रकृतिभूतनिशाप्रवत्ता
स्त्यानेयदत्र इति सूत्रे णादेशत्वबोधनात् तस्य वर्त्मानत्वेन भवनेव धात्वोरिमन्तु इति मते पिषत्वमि
त्याहुः मांसपृतनेत्यस्य ~ह्न्न इति सूत्रे उपसंख्यानत्वादाह शसादोवेति अत्रादि शसादः एका
रे मांसचन्याइति भाष्योदाहरणात् स्त्रीत्वादिति पुंस्त्वाभावादित्यर्थः नात्वेनेतिस्त्रीत्वा+
दित्यनुकृष्यते अत एव पुंस्त्वाभावान्नत्वाभाव इति नोक्तं नहि पुंस्त्वाभावो नाभावे प्रतिबंध
कः नपुंसके पित इदं गीकारादिति दिक् ङिति ह्रस्वश्च ह्रस्वयोरप्राप्ते विभाषा नच इयङ्स्थानाविति
सूत्रे ह्रस्वयोरपि ग्रहणमिति निपल्स्य भाष्ये उक्तत्वेनाप्राप्तिदुरुपपादेति वाच्यं शेषग्रहणमस्य
त्वापरत्वात् घिसंज्ञया बाध इत्यर्थस्यापि भाष्ये उक्तत्वेनादोषात् अत एव इयङ्स्थानाविति
सूत्रे ह्रस्वघटितवाक्येनेति निवृत्तिमिनुक्तं भाष्ये दीर्घयोस्तु न घङितिनिषेधादप्राप्ते विभाषा
नचेयङित इत्यादि निवृत्तो भयत्र विभाषात्वमेवास्तु भावमात्रतात्पर्यकत्वाल्लाघवानुरोधेनाप्रा+
प्तविभाषात्वस्यैवोचितत्वात् प्रतिप्रसवविधिलाघवानुरोधेन च तथैवचितं इदंचाणकम ङिति
त्याचेति सूत्रे आकरे स्पष्टं नित्यस्त्रीलिंगाविति यत्तुं ह्रस्वश्चेति सूत्रे नित्यस्त्रीलिंगाविति अपवं विधो
नियमो नाश्रीयत इति केयरोक्तेर्नित्यस्त्रीलिंगाविति चिंत्यमिति तन्न इयङादिषु प्राप्तिमाश्री
त्य तत्प्रोक्तत्वेन तस्य ह्रस्वांशमात्रविषयत्वात् यूस्त्र्याख्याविति सूत्रे ङिति पटु॰ वटु॰ स्थाने इ
यङ्स्थानाख्योश्च स्त्रीवानदीसंज्ञो न भवत इति सूत्रारंभे भाष्ये उक्तत्वेनास्य निषेधकत्वेन निषेधस्यप्रा+

न्ति पूर्वकत्वेन च नित्यस्त्रीलिंगाविषयत्वस्यावश्यकत्वाच्च न त्फलं तु कटप्रुवे यवक्रिये ग्रामण्ये इति लिं
गांतराभिधायकत्वेन केयटमते तन्नत्वाभावात् कटप्रुवणादेरुत्सर्गत पुंधर्मतया हरदत्तमतेपि नत्वा
भावाच्च श्रीतिस्त्रियै ग्रामण्ये इत्यादौ श्रुवार्त्तिकं नादि प्रकृतिकत्वं नादौ च स्त्रियै ग्रामण्ये इत्या
दावव्ययस्य नित्यस्त्रीत्वादेव सिद्धिः लिंगांतरानभिधायकत्वमिति लक्षणे एकत्वादि सापेक्षत्वं वहिरंग
लिंगांतरव्यावृत्तौ मानाभावदन्युक्त मनचेयङुवङ्ङित्सु त्वये रंगाहेपएतस्यैव नित्यस्त्रीत्वं पु
क्तमिति वाच्यं पूर्वस्मात् स्त्रावित्यं ग्गाहेपकाभावेन पूर्णमेव संबंधस्यान्तत्वात् नच ज्ञहत्वा
र्थायामव्ययवोनर्थकः भूतपूर्वगत्याऽनन्तत्वात् नचैव मतिस्त्रियै ग्रामण्य स्त्रियै हितायेत्यादा
वपि विकल्पः स्यात् नदीव नदीति महासंज्ञालब्धेन स्त्रीत्वेनोपस्थित ङित्वयाहितिज्ञाग
स्यापि विशेषणात् ईदूतोस्तु न विशेषणम् वैयर्थ्यान्नित्यस्त्रीत्वेन तु न सादृश्यग्रहणं श्रीति
स्त्रियै ग्रामण्ये इति भाष्योदाहरणात् एतच्च सर्वं स्त्रीत्वे पूर्वस्थानप्रवृत्तौ च स्त्रीवचनावेवेति वार्त्ति
कव्याख्यानपरभाष्यस्य हृ स्तुधियां नन्वेवमति स्त्रियै न्यत्रावयवनदीत्वान्नित्यनदीकार्यापत्तिः न
चनेयङुवङि तिनिषेधः तत्रापि महासंज्ञालब्धस्यास्त्रीति पर्युदासलब्धस्य च स्त्रीत्वस्य यङाद्या
ति स्त्रेगन्वयेन नदप्रातेरिति चेन्न भाष्यप्रामाण्येन तत्र तदनंगीकारात् किंतु नित्यस्त्रीत्वसमाना
धिकरणतया कथंचिदुपरंजकतयान्वयः नन्वेवमपि महासंज्ञाकरणं व्यर्थम् नित्यस्त्रीत्वघटक
स्त्रीत्वस्य विशेष्यान्वयिनः एवग्रहणेन प्रागुक्तातिप्रसंगाभावात् इति चेन्न लिंगांतरानभिधायक

ला.प्रो. त्वे सतिविशेष्यान्वयिस्त्रीत्ववाचकत्वमित्यत्रविशेष्यं किंलिंगांतरानभिधायकपदजन्यप्रतीतिविशे
ष्यं उतडिद्दादिप्रकृतिभूतप्रातिपदिकजन्यप्रतीतिविशेष्यं नाद्यः अतिश्रियेब्राह्मणायेत्यत्रदोषस्यानु
द्धारात् अंत्यस्तुप्रत्यासत्तिन्यायविरोधादयुक्तएवकिंचैवमतिश्रियेब्राह्मणायेइत्यत्राव्याप्तिः तदन्वा
यिस्त्रीत्ववाचकस्यसमुदायस्यलिंगांतरानभिधायकत्वाभावात् अवयवस्यचतदन्वयिस्त्रीत्ववाच
कत्वाभावादित्यलंस्वडङ्किङ्ङान्वेषणेन स्त्रीशब्दादिभ्यश्चतुर्थ्यर्थे अतिलुपिचश्रियेब्राह्मणायेत्या
दौविकल्पोन लपियुक्तवदितिशास्त्रेणसामान्यातिदेशेपिविशेषानतिदेशान्नित्यस्त्रीत्वंप्रयुक्त
कार्यानतिदेशात् ननुत्वापृथ्व्योरपिस्त्र्याख्यावित्यस्यस्त्रीत्वविशिष्टमेवयावाचकत्वात्तत्रत्यर्थोन्न
दोषः स्त्रीत्वेनरूपेणवस्तुतः पुंस्त्वविशिष्टस्याभिधानेनतत्त्याख्यत्वाभावात् पयपिलिंगत्रयम
पिकेवलान्वयितथापिवस्तुपदार्थादिपदबोध्यतादशायांतत्तल्लिंगोपजनेपिस्त्रीपदादिबोध्यत्वद
शायांतस्यत्वेमानाभावः प्रकृतेतुब्राह्मणायेत्यादिविशेष्यदर्शनेनतत्सत्त्वानुमानं अतएवकोप
टोपिस्त्रियमेवयावचकत्वात्तेनतुलिंगांतरयुक्तमपीतिव्याख्यानंचेचाब्राह्मणाययेत्यादौतत्त्वं
त्वेनभासमानस्त्रीत्वेनपुंस्त्वस्याभिधेयेनतस्यकार्याप्रयोजकत्वात् लिंगांतरानभिधायकत्वा
मित्यत्रलिंगांतरमभिभूतमपिव्यावर्त्यंतेभाष्यप्रामाण्यादितिभाष्यप्रदीपोद्योतेविस्तरः ङ्कस्य
श्चेतिवाक्यात्तुआख्याग्रहणमयहायस्त्रीशब्दमात्रंसंबध्यते अतिखट्वादीनामुभयलिंगानां न
दीत्वंआख्याग्रहणसंबंधेतुनतत्स्यात् कैयटरीत्यानित्यस्त्रीत्वाभावात् हरदत्तमतेपिहृस्वां

[illegible]

र्थेनित्यग्रहणव्यावर्त्यालाभाच्च नचयवाद्यादयः सर्वलिंगा इष्टादयश्च व्यावर्त्याः तेषां प्राधान्यार्थ एव
स्त्रीत्वमिति पदांतरं विनापि स्त्रियां वर्त्तमानत्वात् एतदभिप्रेत्यैव कैयटे नोक्तं ङिति ह्रस्वश्चेत्यत्रैवं वि
धौ नियमो नाश्रीयत इति नच ह्रस्वो इयुवस्थानौ नदीसंज्ञौ भवत इति इयुवस्थानव्यावृत्ति स्तत्रोपक्रम
स्य भाष्यविरोधः प्राद्यधिकाराश्रयणेनात्र स्त्रीवाचकावित्यर्थकरणेनाविरोधात् तत्र स्त्रीत्वं
कृतत्वात् इयुभ्यामेव संबध्यते नदीति महासंज्ञात्वस्य गस्यापि विशेषणं ङिति प्रत्ययेपरतस्तदा
दिङ्गस्यैव नदीसंज्ञाविधानात् अन्यथा अतिप्राकट्यै ब्राह्मण्यै इत्यत्र विकल्पो न नचैवमंगविशे
षणत्वावश्यकत्वे पुनर्स्त्रीविशेषणं व्यर्थं हरिमतिक्रांतायै अतिहर्यै ब्राह्मण्यै इत्यत्र विकल्पवारणा
र्थत्वात् सामर्थ्येन तत्र प्रयोगे स्त्रीवाचकघटकावेव यौ इयुवस्थानौ इत्यर्थात् इदमेवाभिप्रेत्य ह्रस्वश्च वस्णा
नौ च वृत्तौ स्त्रीवाचनावेव नदीसंज्ञाविति ग्रंथे एवकारः प्रयुक्तः तस्य हि नित्यस्त्रीलिंगाविति नार्थः
इष्टादीनां नदीत्वानापत्तेः अतिश्रियै ब्राह्मण्यै इत्यादि तदुदाहरणपरभाष्यविरोधाच्च तस्मात्त
त्र प्रयोगे श्र्यादिवाचकघटकौ इत्यर्थः तदंतसंज्ञापक्षे तु तत्र प्रयोगे किमपि वर्णितं च स्त्रीवाचकं
नेत्यर्थः एवं चातिहर्यै इत्यादौ नदीत्वाभावः स्पष्ट एवेति स्पष्टमस्माभिर्भाष्यप्रदीपोद्योते निरू
पितं श्यात एव च कौशांबीमतिक्रांता स्त्री अतिकौशांबिस्तस्मात् ङिति विकल्पो भवत्येव नचात्रा
वयवस्य नित्यस्त्रीत्वान्नित्यनदीत्वप्राप्तेरप्राप्तविभाषात्वं प्रागुक्तमसंगतं स्यात् इति वाच्यं घिसं
या ज्ञाबाधात् दीर्घकारांतत्वाभावाच्च नच तदंतादेशालम्भमल्विधित्वात् प्रथमलिंगग्रह।

१५१

191

सि॰ को॰ णं चेत्यपि स्त्रीत्वाभावमात्रप्रयुक्ताशङ्कानिकानिदेशकं तदेतद्ध्वनयन्नाह स्त्रियां चेति अत्र ङिति
ह्रस्वश्चेति वाक्यद्वयं आद्ये इति स्त्र्याख्यावितिस्त्रीनिरियङुवङ्स्थानाविति चेति चानुवर्त्तते
उत्तरत्र वेति पूर्वइति स्त्रीइति च पूर्वकिं मात्रे नन्वत्र इत्यियपिदीर्घपरं तस्य च न ह्रस्वत्वविशेषणं त
थापि विपरिणामेन नद्योह्रस्वाविन्यमाहुः वस्तुत इत्वोनन्तानिपरं नन्तु पूर्वत्र ह्रस्वस्यपि सं
ज्ञायावाधिकायाः सत्वाद्दीर्घव्याख्यातेपकमपि इह ह्रस्वेन विशेषणान्न नद्येति तत्वं यद्या
पि दीर्घांशे निषेधविकल्पवैयर्त्यमस्य तथापि निषेधविकल्पविधिकल्पस्य फलितत्वे नह्रस्वांशे
विधिकल्पस्यैव सत्वेन चाहवा नदीसंज्ञौ स्त इति स्पष्टं चेदं ह्रस्वपवस्थानौ इत्यत्रौ च स्त्रीवचना
देव नदीसंज्ञौ स्त इति भाष्ये एतन्त्सर्वं वापीत्यत्रापि बोध्यं ङेराम्नद्य इति ङेरामपत्तयापरत्वादि
ति भावः इड्ड्यामोदश्च घेरिति सूत्रं योगविभागेन व्याचष्टे इड्ड्याम् नपरकरणमोदित्
त्रस्यपपीशवादाव प्रवृत्त्यर्थं अनदीसातकेष्वस्य घेः ओदित्यनेन च बाधान्ङेरामिति सूत्रा
न्नदीग्रहणानुवर्त्तेत्याह नदीति मत्यामिति न च सन्निपातपरिभाषया यणन स्यादिति वाच्यं
आएनद्यास्यादिनिर्देशोः स्थानिवद्भावेन यकारान्तेपि नदीत्वस्वीकारेणादोषात् त्रिचतुरोः
अष्टनआ इत्यतो विभक्ताविन्यनुवर्त्तते विभक्ताविति किं त्रिभार्यः तन्तुरुषः भार्याभरणीयः
बहुव्रीहौ तत्पुंवत्त्वेन सिद्धं संज्ञायां कन्नुपसंख्यानं तिस्रकानाम ग्रामः एकवचनान्तत्वामस्ये
तितिस्रभ्यो नस इति सूत्रस्थभाष्यस्वरसः अचिरः न च ऋत इत्युत्वर्थे अलोन्त्यपरिभाषयैव

सिद्धिरिति वाच्यं निरवचनस्त्वोः षष्ठ्यंतत्वकल्पने मानाभावेन त्रिचतुरोः स्त्रियामित्येवानुवर्त्तनेनापत्त्याव
ज्ञादेो विभक्तावुपदेशेन निरवचनस्त्वो वा धापत्तेः तथा च ऋत इति निरवचनस्य रस्त्व षष्ठ्यंतत्वक
ल्पनायेति वाच्यं गुणेत्यादि निस्त्रयति ष्टेनीत्यत्र ऋतोङीति गुणस्यातिस्त्रः पञ्चेत्यत्र प्रथमयो।
रिति पूर्वसवर्णे दीर्घस्य प्रियत्रिसृ आगतः प्रियत्रिस्त्रः स्वमित्यत्र ऋतउदित्युत्वस्यापवादः रत्वर्थः
अत एव प्रियत्रिस्त्रो प्रियचतस्त्रावित्यादिभाष्यप्रयोगाः संगच्छंते चतसर्याद्युदात्तनिपातनं क।
रिष्यत इति वार्त्तिके तु स्वरूपपरत्वाद्वा देशाभावः इदमुपलक्षणमभिपूर्वेत्वस्यापीति कश्चित्
एतेन बाध्यसामान्यचिंताश्रयणेन गुणबाधेन किंचिन्मानमिति परास्तं तत्त्वक्रोष्टुरिति सू
त्रे भाष्यस्य स्पष्टं बाध्यसामान्यचिंताश्रयणात् बाध्यविशेषचिंतायां तु दीर्घोत्वयोरेव बाधः स्या
त् मध्येपवादन्यायात् अनंतरस्येति न्यायेनोत्वमात्रस्यैव बाधः स्यात् एवं च प्रकृतसूत्र
स्थं गुणात्त्वविप्रतिषेधेन रभावरत्वार्थकं वार्त्तिकं प्रौढिवाद एवेति बोध्यं ननु यत्रानेकविधिप्रा।
प्तियेन नाप्राप्त्यापवादत्वं निर्णीतं तत्र व्यवस्थापको मध्येपवादपुरस्तादपवादन्यायो यथाना+
ने सिकादेशेष्टेत्यत्र येन नाप्राप्तेरिति न्यायेन तस्य यद्धमोर्वृद्धिर्निनकार्ये णत्वर्थीयेनलक्षणेनम
र्थो वा आद्येत्वेधेत्यादौ परत्वात् वृद्धिर्निकार्ये ङीप्रिषयत्वाद्य वृद्धिर्निचकार्ये प्राप्तेस्मारभ्या
माणस्य वृद्धिङीवादेस्तद्बाधकत्वेनिर्णीते किं शास्त्रविहितस्य त्वेवं तर्हि शेषचिंतायां पुरस्ताद
पवादा इत्यादि निर्णयव्यवस्था अत एव पूर्वानंतरादिबाधमात्रेणापवादशास्त्रचारितार्थ्यविश

प्रा॰प्रो॰ निरवकाशत्वाद्बाधे मानाभाव इति न्यायबीजमाहुः द्वितीये तु नैषां विषयसंदेहाभावात् आ
द्येनैव गतार्थत्वात् स्पष्टं चेदमिको झल्हलन्ताच्चेत्यादौ भाष्ये कैयटकौस्तुभादौ च प्रदर्शितेन तु
रभावस्यानेकेनापि येन नाप्राप्तिरिति कथं मध्येऽपवादन्यायसंचार इति चेन्न किमिदं व्याप्तिपदे
येन नाप्राप्तिन्यायेन प्रथमयोः पूर्वसवर्ण इत्येतदपवादस्तया प्रथमाद्वितीयामात्रविषयं उत
ऋत उदित्यपवादकस्तया पंचमीषष्ठीमात्रविषयमुत ऋतो ङीति गुणापवादकस्तया सर्वनाम
स्थानङिमात्रविषयं चेति संदेहे व्यवस्थाया अत्र वशापायेऽपि तत्त्वेन मध्येऽपवादन्यायप्रवृत्तेः स्व
पपादत्वात् एतेन येनेत्यस्य द्वितीयव्याख्यायां पूरत्वादित्यादि निर्विषयमेवेत्यपास्तम् एते
न संदेहाबाधविशेषचिंतायामेव यान्तु स्वविषये स्वेतरयत्र प्राप्नोति तद्बाध्यं विध्यंतरव्याप्ता
विषयाभावात् इत्येवं चिंतासाबाध्यसामान्यचिंता नाम अत्र पक्षे येनेत्यस्य स्वेतरेणेत्यर्थः स्प
ष्टं चेदमिको गुणवृद्धी इति सूत्रस्थकैयटकौस्तुभादौ यस्योत्सर्गस्याप्राप्तौ योऽपवाद आरभ्य
ते तस्योत्सर्गप्राप्त्युत्तरं प्रवृत्तिसंभवेन चरितार्थोऽपि तदुत्सर्गबाधकत्वं भवत्येव तत्कर्तृकावश्यंप्रा
प्तावारंभात् सत्यपि संभवे बाधनं भवतीति न्यायात् निरवकाशत्वमप्येतदेव यत्तत्र स्याप्यना
क्रांतविषयाभावः अन्यथा चेदं दधिगीति सूत्रे भाष्ये तत्रानंतरस्येत्यादिन्यायापेक्षया येन नाप्रा
प्तिन्यायः प्रबलः तेषां तदविशेषपाठोभयसापेक्षत्वेन बहिरंगत्वादित्युक्तमप्रसक्तविचारेण न
नु सर्वनामस्थानगुणस्यापि विषये पूर्वसवर्णदीर्घप्राप्ते [illegible] तस्यापि अपवादत्वमवश्यं वाच्यं स

त्तृद्योतन्न स्वस्य गुणत्वेनैव गुणसिद्धेस्तदर्थं न स्थानार्हभावान्न संबुद्धिस्तस्यावकाशः एवं चापवा
दविप्रतिषेधेन परत्वाज्जसि गुण एव स्यादिति चेन्न इह लक्ष्यानुरोधाद्बाध्यसामान्यचिंताश्रय
णमिति न दोष इत्याहुः नुमचिरेति नच रस्य गुणादीनामिव नुटोप्यपवादत्वमेव युक्तम्
नत्वत एव विप्रतिषेध इति वाच्यं कार्त्तिकारंभसामर्थ्येन नतिसृचतसृ इति ज्ञापकेन च तदपवा
दत्वाभावकल्पनात् अत एव ज्ञापकानुसारणस्यैव श्रेयस्कत्वान्नमादायाचिरग्रहणं वार्त्तिक
स्थं प्रत्याख्यातं भाष्ये एतेन त्यावर्थे इद्व बहिर्भूतत्वलिंगत्वापार्थ्यनिमित्ततिस्राद्यादेशापेक्षया
तरंगत्वान्नुटि सिद्धे पूर्वविप्रतिषेधोऽयुक्तः परास्तम् यादृशोकारादिनः प्रवृत्तौ तादृगंगमाश्रित्य
नुट् तस्य विनाशोन्मुखत्वेऽकृतत्वात् परिभाषया नुटो दृशान्तरीदृशानिमित्तविनाशमाश्रित्य
परिभाषाप्रवृत्त्यर्थं वचनस्य ज्ञापकानुसरणस्यैवावश्यकत्वात् अनुपदवक्ष्यमाणभाष्य
विरोधाच्चेति दिक् तिसृणामिति त्रिस्रामिति स्थिते तिस्रादेशः नचैवं लिंगापेक्षतिस्रपेक्षया
तरंगत्वात् त्रयादेशापत्तिः तत्त्वभावात् सर्वादिप्रकरणोक्तयुक्त्यानादृशावहिरंगत्वस्यात्र शा
स्त्रेनाश्रयणात् अत एव त्रयादेशं नुटं च बाधित्वात्तिसृभावे सकृद्गताविति न्यायेन त्रयादेशाभा
वस्तिभाष्यकृतः नच निर्त्तरशास्त्रोक्तरीत्या तिस्रादेशस्य विभक्तिसंज्ञासापेक्षत्वेन बहिरंगत्वा
त्त्रयादेशापत्तिः नुम्नुटोः पूर्वविप्रतिषेधवार्त्तिकेन क्वचिदीदृशांतरंगत्वानाश्रयणपूर्वविप्र
तिषेधस्तत्र प्रवृत्तेर्ज्ञापनेनादोषात् त्रिचतुरोर्विशेषणादिति स्त्रीनिष्ठसंख्यासमर्पकौ सं

त्व

१८३

193

त्रा· श्रो· रूपेणेति दोषः नत्वंगस्य अङ्गत्वादिभावः नेहेति त्रिशब्दस्य पुंनपुंसकवृत्तित्वेपि समुदाय
स्य स्त्रियां वृत्तेः अंगविशेषणत्वे आदेशः स्यादिति भावः स्त्रीवाचकतापर्यायाधिकरणयोः स्त्रि
चतुरोर्निवार्यः कश्चित्तु स्त्रियां वर्त्तमानयोः त्रिचतुरोरित्येवार्थः प्रियत्रिरित्यादौ न दोषः वहुव्र
ह्यंगस्य स्त्रियां वर्त्तमानत्वेपि त्रिशब्दस्य पुंनपुंसकयोरेव वृत्तेः नच जहत्स्वार्थायां त्रिशब्दो
नर्थकः इति तत्स्थानित्वेन अजहत्स्वार्थायां त्वन्यपदार्थस्य त्रिशब्देनाप्युक्ततया स्त्रियां वृत्ति
स्त्रिशब्दस्याप्यस्त्येव नचेदं स्त्रीत्वं तात्पर्यग्राहकपदांतरसापेक्षतया वहिरंगमित्यस्याग्रह
णे अत एव पंचाङ्गीत्यादौ न टाप् त्रिशब्देन सर्वत्र स्त्रीरूपार्थप्रतिपादने तात्पर्यग्राहक
स्यापेक्षितपदांतरस्याभावादिति वाच्यं लक्ष्यानुरोधेन जहत्स्वार्थवृत्तेरेवाश्रयणात् तेनां
गस्य स्त्रीत्वमिति सम्यगेव प्रियतिस्रपुमानित्यादौ स्त्रीवृत्तितात्रिशब्दस्य भूतपूर्वगत्यावो।
ध्यं प्रकृते त्रिशब्दस्य प्रागुक्तात् पुंनपुंसकवृत्तितायामेवमेव उत्तरपदार्थप्रधानतत्पुरुषवदन्या
देरेवमेवात्र पक्षे निर्वाह्यत्वात् अजहत्स्वार्थायां तु कोर्थः प्रत्ययोत्तरपदयोश्चेति तत्स्
त्रगतभाष्यसंदर्भश्चेह प्रमाणमित्याहुः आमिति नचसत्यप्येकवचनस्याम्यपि त्रयादेशा
पत्तिरिति वाच्यं संनिपातपरिभाषया वारणात् नदीसंज्ञकसंनिपातनिमित्तत्वाद्यामिति वो
ध्यं अर्थाधिकारात् पूर्वोत्तरसाहचर्येण च बहुवचनस्यैव तत्र ग्रहणाच्च त्रिशब्दस्य स्त्रीनिर्दे
शे संख्यासमर्पकत्वेपि अंगस्य स्त्रियां वर्त्तमानत्वाभावादंगविशेषणत्वे व्याप्तिः स्यात्स्त्रियामिति से

त्यत्रेत्याह इतिविग्रहेत्विति प्रियतिसृनि प्रियास्तिस्रस्त्रिजनस्त्रि इतिस्थितेनेनरंगानपीतिन्याये।
ननिस्यादेशात्पूर्वं विभक्तिलुकि समासाद्विभक्तौपदांगाधिकारेतदंतविधेः सत्वेनत्रिशब्दांत
त्वान्निर्दिश्यमानस्येतिपरिभाषयात्रिशब्दस्यादेशः प्रियाशब्दे स्त्रियाः पुंवदितिपुंवद्भावः न
चतिस्रादेशेनपुंनस्त्रीतिकप् समासार्थालौकिकवाक्ये ऋकारांतोत्तरपदत्वाभावात् विभ
क्तिनिमित्तत्वेनादेशस्य बहिरंगत्वाच्च एतेनविभक्ताविस्रादेर्विषयसप्तमीत्वंवदंतः परास्ताः
विषयत्वपक्षे शब्दे ननिमित्तत्वाश्रयणात्तत्पक्षेपिबहिरंगत्वंसपपादमित्यन्ये ऋदुशनेत्यनङ्
अनित्यत्वादिति अत्रचत्तापकमिको चीत्यत्रग्रहणमृतद्विन हलादिन्याव त्यर्थं नलोपेन सिद्धेः
नचपंचत्रपुभ्यां इत्यादौनुमिसतितल्लोपस्यनलोपः सुप्स्वरेत्यसिद्धत्वात् रंगतेद्विगाविति पूर्वपद
प्रकृतिस्वरेणस्यादितिवाच्यं नुमः संघातभक्तत्वेनोत्तरपदस्येगंतत्वानपायात् अतएवचपं
चत्रपुणेत्यादौस्वरसिद्धिः स्वरस्यांतरंगत्वाच्च नचैवमतिराभ्यामित्यत्रनुमाव्यवहितत्वाद्राय
आत्वंनस्यादितिवाच्यं नुमंबाधित्वापरत्वादात्वप्रवृत्तेः नचाकारस्यवृद्धिनयावध्योत्त्वेतिपूर्ववि
प्रतिषेधान्नुमेवस्यादितिवाच्यं नत्रवृद्धिशब्दविहितवीवृद्धिग्रहणस्येववक्ष्यमाणत्वात् एतेन
प्रियतिसृभ्यामितिव्याख्यातं नुमः परत्वात्त्रिस्रादेशप्रवृत्तेः नचोत्तरार्थं नत्रैवकर्त्तव्ययुक्तत्वात् न
चप्रत्यञ्चीनामित्यादौनुट्पश्चान्नुमिरन्धस्वापायेमात्रीणामितिनियमाद्दीर्घो नस्यादितिवाच्यं नुमचि
रेतिपूर्वविप्रतिषेधेन नुटि सकृद्गतावितिन्यायान्नुमप्रवाप्राप्तेः तणिकत्वेनेदृशोनु विषये नि

त्ना

शा॰ शे॰ यमाद्याग्नेश्च न च वक्तृभिः कुलैरित्यत्र नुमि नलोपेऽपि तस्यासिद्धत्वान्नान्तसंख्यावाचकत्वेन षड्भ्यो
लुगिति चेन्न भ्यो हलादिरिति विभक्तिस्वरः स्यादिति वाच्यं स्वरविधायके विहितविशेषणाश्र
यणात् नहीयं विभक्तिर्नान्ताद्विहिता किंतु बहुशब्दात् तस्मात्संबुद्धिवारणार्थं तत् संबु
द्धेस्तु लुका लुप्तत्वात्प्रत्ययलक्षणप्रवृत्तिं विना न नुमः प्राप्तिः सा च न नलुमतेत्यस्यानित्यतां
विनेति तन्चैवमनङपि स्यात् प्रियतिसृ इति भाष्योदाहरणप्रामाण्येनानङि नलुमतेति नि
षेधप्रवृत्तिस्वीकारात् त्रिस्रादेशस्तु भवत्येव एतेन संबुद्धिगुणमात्रविषयमेतदनित्यत्वमि
त्यपास्तं प्रियतिसृणीति न च प्रियत्रिशब्दे नुमः परत्वात्त्रिस्रादेशे सकृद्गताविति न्यायेन नुम्न स्या
दिति वाच्यं प्रियतिसृणी प्रियतिसृणि इति प्रत्ययोत्तरेति सूत्रस्थभाष्योदाहरणात्पुनः प्रसंग
विज्ञानस्यैवात्रेष्टत्वानुमानात् एतेन रादेशात्पूर्वं विप्रतिषेधेन नुमि त्रिनिमित्तमूलमित्यपास्तं
अमिन्विताऽपि पूर्वविप्रतिषेधेन नुड्बाध्यः ह्रस्वत्वे सत्याविति न चापि बहिरंगत्वादसिद्धं
तस्याश्च नित्यत्वात् अत एव न पासयोरिति चरितार्थं एतेन संनिपातपरिभाषया टाप्त्रस्या
दित्यपास्तं विभक्ताविति वाचनिकमेवेदं युवोरनाकावित्यत्र भाष्ये स्पष्टं लिंगविशिष्टप
रिभाषाऽनित्यमूलकं वा बोध्यं सखीति सख्यशिश्वीति ङीप् यस्येति चेति लोपेनैकादे
शस्य पूर्वान्तत्वमपि नाशंक्यं लक्ष्मीरिति कृदिकारादिति ङीषि लक्ष्मीत्यपि बोध्यं तथा
च कोशः लक्ष्मीर्लक्ष्मी हरिप्रियेति स्त्यायतेस्त्यां प्रत्ययपोपणातेरिति स्त्रीस्त्यायतेर्ड्रट्

लोपो दित्वान्नीशब्दस्येति स्त्रीशब्दे स्यकारान्तत्वादियङ्वानुवर्तन इति भावः गुण इति जा+
सिद्धेति गुणः आङो नास्त्रियामिति ना अन्वयोरित्यत्व ह्रस्वनद्याप इति नुट् इत्यर्थः बाध्यते
इति स्त्रीशब्दस्य यड्डिन्यनेनात्वयः नुमेति इकोचि विभक्ताविति नुमित्यर्थः पूर्वकारिकोक्तैः
परत्वाद्बाधे सति यत्कलितं तदाह औङ्ख इति इयादेशोपीति अत्रादौ पर इयादेशो विहितः सउ
पसर्जने पुंसि विद्यमानस्यास्त्रियाः स्त्रीशब्दस्योमादिषु च तत् सर्वं वनत्वस्यात्र गुणनाभावादिभिः
पूर्वोक्तैर्बाधादिति भावः प्रमाण इति तृतीयादिषु भाषितपुंस्कमित्यनेनेति भावः ननु ह्रस्व+
वाक्य स्त्रीत्वस्य संबंधः स्यात् न त्र स्त्रीशब्द भिन्न ह्रस्वेवर्णान्तादित्यर्थे फलाभावेन सामर्थ्यात्
स्त्रीशब्दावयव भिन्न ह्रस्वेवर्णान्तादित्यर्थो भविष्यतीति कथमतिस्त्रि शब्दे प्राप्तिप्रसङ्गस्य प्रविषे
धेपि स्त्रीशब्दस्य ङितिविकल्पो नेत्यर्थे ङित्यन्यथा हि शङ्गस्य विशेष्यत्वेन दंतस्यापि निषेधापत्ति
रतस्त्राह अस्त्रीति नेत्रैवमुक्तिमाह ननांबद्ध स्यैवेति प्रसज्यप्रतिषेधस्तु न गौरवापत्तेः श्रीरिति
श्रयं त्येनामितिश्रीः क्विब्वचीत्यादिना क्विपू दीर्घश्च ङान्तत्वात्र सुलोपः नेयड्वङ् ह योच्चारणं+
स्पष्टं पाठांतरं स्थान शब्दो भावसु ङेतः इयङ्वङो स्थानं ययोरिति बहुव्रीहिः तत्त्वबाधका
विषये एवास्त्र न्यथा नेयङ्वङोः स्त्रीत्व वदेत संबंधयोग्यता नूयोयानि फलोप धानलाभायस्था
नग्रहणं कृतं अधिकरणल्युडंतेन षष्ठीतत्पुरुषस्त्वन युक्तः अविद्यमानस्याधिकरणत्वादर्श
नात् संबंधस्त्वविद्यमानेनापि अभावस्य प्रतियोगिनादृष्टः अत्र च स्वप्रसंगोच्चारितत्व संबंधः त

स्त्रा·प्रा· राह इयङुवङोरिति वेटीप्रकृत इत्यंतं निषेधस्तोयपयोरिति नित्स्थानौ अधिकरणेल्युट् इयङुवङोः स्था
नाविति विग्रहः तत्फलितमाह इयङुवङोः स्थितिरिति इयङुवङोश्च वाधकावाधितावेव गृह्येते
अस्त्रीति पर्युदासात् तेन प्रकृत्यर्थीः प्रधीरित्यादौ नदीसंज्ञाया निषेधो न नचनेयङुवङोरस्त्री भाग
त्वेव वाच्यं इयङुवङोः संबंधिनो यावीकारोकारौ तदर्थः संबंधश्च स्थानस्थादेशयोरेव अंतरंगत्वात
तस्यासंभवाद्धेतिवाच्यं इयङुवङसत्तायाः शाब्दविशेषोपलक्षणार्थत्वबोधनार्थंतत्संत्वात्
तेन हूश्रीः हे श्रूरित्यादौ निषेधसिद्धिः श्रियौभ्रुवावित्यादौ वाधकावाधितेयङुवङुसत्वात् प्रांचः।
स्यान शाब्दमाहात्म्यादेव प्रागुक्तमर्थद्वयं विनिगमकाभावाद्धदंति अत्रेयुवङुभ्यामंगमाक्षिप्यते
तेन यत्र नदीकार्याश्रयेंगेवाधिकावाधितेयुवङोः स्थितिः क्वचित्प्रयोगे दृष्टा तस्य तदवयवा
स्य च निषेध इति फलितं अत एव प्रकृत्यधीयस्याः यस्य वा प्रधीत्यत्रावयवधीशब्दस्य नदीत्वं भवत्येव
नचङिदामोर्विकल्पस्य सत्वेन नदीनिषेधारंभसामर्थ्येनैवोपलक्षणत्वलाभे किं स्थानग्रहणे
नेतिवाच्यं अतिश्रियौ ब्राह्मणानामनिभ्रुवे ब्राह्मणायेत्यादौ आप्रमाणेयङुवङोर्निषेधस्य चारि
तार्थ्यात् नचात्र विकल्पः ङितामूनिरूपितांगस्य स्त्रीवाचकत्वाभावात् इत्यर्थस्य तत्रैव निरूपणा
द्वितिदिक् श्रियेइति ङितिह्रस्वश्चेति विकल्पः वामि आमीति केदोनत्वमीति द्वितीयैकवचनेन
दीकार्याभावात् ङेरामित्यादिं न प्रवर्तते तस्य नदीसंज्ञोत्तरभावित्वेनोपजीव्यविरोधात् यद्यपि
प्रकृतो निषेधोनेन विकल्प्यत इति प्रांचः तथापि निषेधविल्पे विकल्प एव फलतीति तथा च तन्त्रः स्व
रितत्वाकल्पनेन लाघवात् स एव सूत्रार्थ उचित इत्याशयेनाह वानदीत्यादि प्रधीशब्दस्येति प्रकृ

ष्टंभ्यायतीतिविग्रहः कतिकारादीनामिति तेषामयंभावः भाष्येइत्युवस्थान प्रतिषेधे परास्था
नयोरपि प्रतिषेधः आध्ये प्रध्येत्रासरोप किंकारणमवयवोत्रेयङ्वङ्स्थानेत्याशंक्यपस्यांग
स्ययुवोरित्यादिनासमाहितं अत्रहि प्रकृष्टं ध्यायतीत्यर्थः बहुव्रीहोतु प्रतिपदोक्तगतिसमा
सासाभावात् श्रीपतिदत्तादिरीत्यापराङ्गलेभः कवापनिम्न इदंचकैयटमतेत्रसंगतंसमुदाय
स्यअवयवस्य चकैयटोक्तं नित्यस्त्रीत्वाभावेननदीत्वाप्राप्तेः तस्मात्स्त्रीविषयावेवयोः नित्य
मित्यत्रैवकारोभिन्नक्रमः नित्यमेवयोस्त्रीविषयावित्यन्वयः नित्यमेवेत्यस्य पदांतरं विनापी
त्यर्थः खलपूकटप्रुग्रामणीनांक्रियाशब्दतयापुंसिमुख्यावृत्तिः पुंसएव खल्वमुचितोधा
र्मः शान्तत्वात् भयरहितत्वाच्च आध्यनादितुस्त्रीपुंससाधारणंइतिअत्रारुचिबीजंतुसत्व
भाष्यादौतेरेरीदृशानित्यस्त्रीत्वालाकिंचग्रामनयनादिकमुत्सर्गेतः पुंधर्मोनसुध्यानादिक
मित्यत्रइतरमानाभावः आध्येप्रध्येइतिचिंत्यमेतत् क्रियाशब्दत्वेननित्यस्त्रीत्वाभावादितिके
यटस्तुचिंत्यएव आध्येप्रध्येइतिभाष्यादाहरणेबहुव्रीहिसत्त्वात् यथाचनकपूतया स्त्र्याख्या
वित्यत्रनिरूपितं यत्रणिगतिपूर्वकत्वात्तुलभएवेतियच्चिधायकेनिरूपितं यस्यांगस्येत्यादि
भाष्याद्येस्तुअत्रैपुवङ्भ्यामंगमित्यादिनानेयङिति सूत्रेनिरूपितः प्रकृष्टध्यमिति प्रकृष्टंध्या
यतीतिविग्रहे नित्यस्त्रीत्वाभावात्पुंसीवस्त्रियामपिअनदीत्वात्पुंवदित्यर्थः एवंचस्त्रीपुंसोस्तु
ल्यरूपमितिफलितं वृत्तिमतेस्त्रियांतल्मीवत् पुंसितुनदीत्वाभावएवेतिविशेषः प्रकृष्ट

196

धीर्यस्याः इति विग्रहे तु मतद्वयेपि लिंगद्वयेपि लक्ष्मीवत् रूपं लिंगद्वयं चेति अवयवधीशब्दस्य
नदीत्वात् नेयङुवङिति निषेधस्य कृतव्यूहपरिभाषया भाव्यत्वात् ईत्यंगस्य पुंवद्भावानित्याभावात् पुं-
स्यपि नदीत्वमस्त्येव तदेवाह प्रकृष्टा धीरितिविग्रहे त्विति ईदृशपदघटितविग्रहे इत्यर्थः तेन
कर्मधारयेण तद्घटितबहुव्रीहौ वेत्यर्थः प्रागुक्तरीत्या धीशब्दनिमित्तकनिषेधाप्रसक्तेर्विकल्पात्
वृत्तेश्चेति भावः विशेषइति लक्ष्मीशब्दापेक्षयेत्यर्थः श्रीवदिति विशिष्टस्यापीयङुवङ्स्थानत्वे
न ङिदामोर्विकल्पस्य अन्यत्र निषेधस्य च प्राप्तेरिति भावः पुंसि त्वीदृशबहुव्रीहावपि नदीत्वा
भाव एव नेयङुवङित्यवयवस्य निषेधात् समुदायस्याप्राप्तेश्च पुंवदिति सुष्ठु ध्यायतीति विग्रहे
इति शेषः तत्रहि नित्यस्त्रीत्वाभावात् पुंसीव स्त्रियामप्यनदीत्वादिति भावः सुष्ठु धीरिति विग्र
हे त्विति ईदृशपदघटितविग्रहके स्त्रीलिंगबहुव्रीहौ कर्मधारये चेत्यर्थः स्त्रियां च अत्रासं
बुद्धौ सर्वनामस्थाने इति न संबध्यते आरंभसामर्थ्यात् केचित्तु स्त्रियामित्यस्य स्त्रीप्रत्यये इत्य
र्थः ङीषर्थं च गौरादिषु क्रोष्टुशब्दः पाठ्य इत्याहुः तत्र पंचभिः क्रोष्टुभिः क्रीतैः रथैः पंचक्रोष्टु
भी रथैरित्यादौ तस्य लुकि क्रीतार्थठको ध्यार्थेति लुकि लुक्तद्धितलुकीति ङीषो लुकि च अकारश्र
वणानापत्तेः एतदर्थं चापि तृन्वदतिदेश एवेति बोध्यं एतेनांगसंज्ञातिदेशपक्षे यत्त्वङ्गावयत्ययाम्
तदेतद्ध्वनयन्नाह अर्दंतेभ्यइत्यादि क्रोष्ट्रीति तृतीयादिष्वपि विकल्पं वाधित्वा नरंगत्वादय
मेव नित्यो विधिर्भवति एतेनांगातिदेशपक्षे परेऽस्य विधानमिति परास्तं कथं तर्हि इति नेयङुवङ्

त्वनेनावयवस्य समुदायस्य च नदीत्वनिषेधादिति भावः बहुवद्गतिस्त्र तत्र तु चिवीजं तु सामा
न्येन कृत्स्नकत्वमाहु यस्य श्रेयागाणां स्वरूपादत्वं यद्वा विनार्थेन नञा समासेनानुदात्तपदमने
कमिति बहुश्रेयसी वर्जनग्रहणेन ज्ञापनया नञ्घटितमनित्यमिति परिभाषया नेयङ्वङ्स्थ।
स्थानित्वत्वान्नदीत्वमिति एकाजुत्तरेति एकोच् यस्मिन्नादेशमुत्तरपदं यस्मिन्निति सूत्रे।
बहुव्रीहिगर्भो बहुव्रीहिः उत्तरपदादिति समासस्य विशेषणमित्याह तस्मिन्समासे इति न
नुणग्रहणं व्यर्थं अत्तु एवमिहैः नच णत्वेनाप्यर्थबोधन द्वारा नित्यत्वमिति पत्रिः फलं ज्ञा
तिपदिकां तन्तु विभक्तिषु चेत्यनेनैव विकल्पसिद्धावारंभसामर्थ्यान्नित्यमिति तत्राह स्व
स्यार्थमिति ग्रहणमिति दत्तकेति ग्रहणमित्यर्थभेदज्ञापनिवृत्ति श्रीलीगंडपदाभेकीवर्षा
भीति बहुक्रादित्वेन वाङ्ग्रपीत्याहुः परं तु मानं चिंत्यं भसां पुनर्नवायां स्त्री वर्षाभूः इति मानि।
तियादवस्यस्तु ततः उत्तरस्त्रियामनयेत्याहुः इहित रमितिकोशावष्टित्य ऊत्तत्वपत्तेकोशयोरेक
वाक्यता च गोरादित्वान्ङीषो न स्वत्तृ इति स्त्रियां यत्प्राप्नोति तन्नेति व्याख्यादिति भावः स्व
सादिस्वसृशब्दस्य इति अन्न एव न निस्त्वं च निस्वपस्य च चरितार्थमित्याहुः अन्येदं चिंत्यं ङी—
पिसन्निपातलिंगविशिष्टपरिभाषया प्रियतिस्त्रिणां कुलानामित्यादौ दीर्घव्यावर्त्तकनिषेध।
स्यचारितार्थ्यादिति तन्नविभक्तो लिंगविशिष्टाग्रहणात् सन्निपातपरिभाषयैवेतिस्व च तस्याङी
वभावे सिद्धे तद्धनित्यत्वज्ञापनार्थं ग्रहणं अयं च निषेधः पारिके ग्रवाचकमात्रशब्दे स्त्रियां नश

प्रा॰ शे॰

वर्त्तते नतंङ्द्वादिसाहचर्येणास्यसंबंधिकत्वनननीवाचकस्यैवतत्त्रग्रहणात् अभिव्यक्तपदार्थत्वाच्चे
त्याहुः पुंवदिति वैयाकरणस्यपरात्वेनंता: स्त्रीत्वैकत्वत्तील्लामिनास्त्रीत्यस्योक्तत्वादिति भावः
स्त्रियां नोत्तरपदस्थादिनत्यमरः एकपदंता: । स्त्रीलिंगा: अतेमु अतइसेतदधिकृतस्यांगस्यवि
प्रोषणमस्यमोर्नद्यसकादितिचानुवर्त्तते तदाह अतोगादिति आमोसुविधानंलुग्बाध
नार्थं अमस्यादिति अतएवद्वितीयैकवचनेत्तानमितिसिद्धम् मिति छेदेत अमिश्रादेः पर
स्यात्यकारेकोस्यमकारेकृतेपिमद्वयश्रवणापत्तिः संयोगान्तलोपस्त्मलग्रहणापक
षान्नप्राप्नोति अतएवमलि मलइतिमत्रमतइतिनासत्त्विनचवहिरंगलक्षणात्वाद्दिति।
तृतीयपदे तुवाक्यवाच्यम् पदभेदेनलक्षभेदांगीकारेतत्पदवादिनरेतत्पदज्ञानवत्फ
लाज्ञानापत्तेः अविरोधेसंभवतिविरोधस्यान्याय्यत्वाच्च एकस्यैवाशब्दस्य साधुत्वासाधुत्वाभ्यां
प्रणम्यजनकतापत्तेनवेतिसत्वस्यभाष्यविरोधापत्तेश्च अतएवांगस्येत्यादावेकफलार्थेत्व
प्राग्राह्यतेभाष्यकारैः तस्मात्वहिरंगेतिसमाधानंस्याविनिस्त्वत्रविषयकमेवेतिप्राकृप्रपं
चितं अपिचयथोद्देशपक्षेवहिरंगत्वेनसमाधानंदुःशकम: एतेनकाम्यकलत्रशाल्वेभ्य
आचक्षाणाणिजंतेभ्यः क्विपिसंयोगान्तलोपेकावकलत्वशाल्वइत्येवमितिपरास्तं किंचका
व्यशाल्वाभ्यां णिजंताभ्यां क्विपिसंयोगान्तलोपस्यासिद्धत्वात्कोस्यानिवृत्त्वनिषेधा।
द्वाघेलोपाद्योरित्निकृते अंत्यचेनद्वाधित्वात्दुर्वारः विचित्वाद्येलोपोव्योरित्यस्येवापत्तिः।

न च पूर्वं पूर्वमन्तरंगमिति त्वाल्लोपणिलोपयोरसिद्धत्वान्नदापत्तिः एवं तर्हि तृतीयपक्षेपि नैव संयो-
गान्तलोपस्याप्यनापत्तिः न च प्रातिपदिकादेव णिजुत्पत्तेः पूर्वं सिद्धान्तितत्वेन वहिर्भूतत्वम् पु-
मित्रकृतयावद्रूपेत्वात्संयोगान्तलोपस्यापि वहिरंगत्वं द्विविधवहिरंगत्वपि संभवति अस्यैव
प्रवलत्वमिति परिभाषाप्रकरणे उपपादितमिति न तत्र तयोरसिद्धत्वमिति वाच्यं एवं तर्हि पक्षा-
णां फले कापि दृशोविषयेऽनभिधानस्यैव स्वीकर्त्तव्यत्वेनैषां प्रयोगाणामेवाभावात् एतेन वश्रा-
दिभ्यो यङ्लुकि तिपि पूर्ववत्सिपोर्हल्ङ्यादिलोपे संयोगान्तलोपे चाववयवश्त्वादिकमेवेति माधवोक्त-
मपास्तं तत्र पथानेवहिरंगेति समाधानस्य स्कोरिति सूत्रमात्रविषयत्वेन दध्यत्रेत्यादा-
दाहरणमविशेषमात्रपरत्वेन च नेषु संयोगलोपाभाव एवोचित इति दिक् अपरे तु मलग्ला-
णापकर्षेऽत्रैव गलत्यह णिकर्त्तव्ये उत्तरतत्कारणे सामर्थ्यात् पूर्वत्र गलत्वस्य वाक्यभेदेन संवंधः
अनेन च संयोगान्तलोपस्य तत्र स्यकाचित्कत्वमात्रं तेनान्त्यलोपिकस्य कस्यचित् लोपः स च पदाव्या-
तिरिक्तस्य णः प्रतिषेध इति वचनेन न फलभेदापत्तेः एवं चैवि शमयते गिरिवेडिन्येव पक्षत्रये
पि संयोगान्तलोपप्राप्तेः एवं मतत्वापि स्त्रंकर्तुं शक्यं न चैवं चेति दीर्घापत्तिः सन्निपातपरिभाषया
विजिलोप इत्यभिप्रायकतया व्याख्येयं संयोगान्तलोप इत्यनेकैयटकृतव्याख्यानं तु चिंत्यमेव
त्यन्यत्र विस्तरः अन इति तकार उच्चारणार्थः न पुंसके तु स्याव इत्यभावात् जसः शी औङ्श्चापः स्या-
भ्यां शीऔङ् इति चानुवर्त्तनेन दाहलौ वाद्रित्यादिभसंज्ञायामिति अनपुंसकस्येति पर्युदासेना

शा॰ शे॰ सर्वनामस्थानत्वादिति भावः यस्येत्युपरमः यशब्दस्य तु न ग्रहणम् सर्वेति षष्ठ्येति पुनर्यग्र
हणान्तु भस्येत्यधिकारात् चेन्न न तर्हि नरस्यन्त स्नातीति नो नकुलघ्नेन तदा हभस्यैव वर्णेत्यादिम
स्येति किं गर्गेभ्यः यत्तु सर्वेष्विति प्रत्युदाहरंति तत्तु षुपां नेति निषेधेनापि सिद्धं ईकारस्ये
ति लोपप्रयोजनं तु सखीमतिक्रांतो सखिरित्यादौ एकादेशस्य पूर्वांतत्वेन ग्रहणात्तस्य
समासांतटन्नभावः सख्नी सदाव न ङन्तत्वभावस्तु लिंगविशिष्टपरिभाषया तु समासांतवि
धौ विभक्तौ च न प्रवर्तते त्र्यतिङ्गा सूत्रे भाष्ये स्पष्टं औङः षुपामिति विभक्तित्वापेक्षया षुपा
मिति स्त्रीलिंगनिर्देशः विभाषाङिश्योरित्यतः शीत्यनुवर्त्यनसंयोगादित्यतो नेति चानु
वर्त्य षुपां नेति व्याख्येयमित्यर्थः वार्तिके औङ इति स्य नूपकथनं सर्वेष्वित्यस्य भाधिकारे
ण सिद्धेः जश्शसोः जसा साहचर्यात्क स्त्वेव गृह्यते तेन कुंडशो ददातीत्यादौ नाति
प्रसंगः न च निरनुबंधकपरिभाषया तद्धितस्य शसोऽपि ग्रहणं स्यादिति वाच्यं धर्मिग्राहक
मानेन येनानुबंधेन सानुबंधकत्वं तदनुच्चारणे एव तस्य प्रवृत्तेः नचैवमप्यनुबंधस्मरणसा
पेक्षत्वात् नकस्य पूर्वशसपेक्षया श्रूयमाणवर्णकस्य शीघ्रोपस्थितिकत्वेन तस्यैव ग्रहणं
न्याय्यं लोकन्यायसिद्धत्वात् ज्ञापकसिद्धत्वाच्च तत्रकार्ये तया साहचर्यन्यायस्य प्रबल
त्वात् तस्मात्कसः इत्यादौ स्त्रश्शसोऽतिप्रसिद्धत्वाच्च अत एव तान्येकेति सूत्रे एकशब्द इति
प्रयोगः संगच्छते तत्र हि नपुंसकैकशेषाद्वा तानीत्युपक्रमे नपुंसकनिर्देशात् प्रिस

षष्ठीत्यविभक्तिकोनिर्देशः महासंज्ञाकरणं पूर्वाचार्यानुरोधात् तेनस्वशास्त्रस्यप्रामाण्य
ख्यापनं नपुंसकस्य इदितो नुमित्यतो नुमिति उगिदचामित्यतः सर्वनामस्थान इति वर्त्तते
अंगस्येति च प्रकृतम् तच्च सलन्त्यं विशेष्यते नपुंसकस्येति च गृह्यमाणस्यांभावदंगस्ये त्यस्या
वविशेषणम् अतएव वहुत्वपवहत्यादौ षष्ठ्यादिर्केन अस्थिदधीत्यादौ तु गृह्यमाणस्ये
वोपस्थितत्वात् वाधाविति वक्तव्ये वा नपुंसकस्येति सूत्रकरणेन लिंगवोधकपदस्य
सति संभवे गृह्यमाणे एवान्वयस्य ज्ञापितत्वाच्च नहि वहवो ददतो येषु तानि कुलानि
वहुददतीत्यत्र नुम्भावार्थं नहि तत्र गृह्यमाणं शत्रंतं नपुंसकम् अतएव प्रियसवधृ
त्रासणेनेति भाष्यं संगच्छते अतएव त्रिचतुरोः स्त्रियामित्यादौ स्त्रियामिति त्रिचतुरोरेव
विशेषणमित्याकारः तदाह मलेतस्येत्यादि घेरुति सर्वनामस्थाने चासंवुद्धावित्यनेने
तिभावः शेषमिति कर्मणि घञ् हलश्चेत्यत्र पुंसि संज्ञायामित्यनुवृत्तेरकर्तरीति विहिते
नपुंसकत्वस्यापि सत्वात् घञन्तपाः पुंसीत्यादि तु प्रायोवादः अतएव संवद्धमित्यर्थकं
संवंधमनुवर्त्तिष्यत इति इकोनुणच्छीति सूत्रे भाष्ये स्पष्टे भावविषयमेवेदमित्यन्ये ।
मोसंभवोऽस्येति कर्मण्येणत्वे भाष्यप्रयोगादिदं चिन्त्यं अइ पंचम्य इति किम् उत्तरा
दिः सर्वार्थं तन्ति गणत्वात् अधिकग्रहणं माभूदिति अदड्डादेशाइति सूत्रे षष्ठ्यन्तदस्य ड इ
तिभावः टेः तिविंशतेरित्यतो डितीत्यनुवर्त्तते भस्येति चाधिकृतं तदाह डितीत्यादि
पंचमइति अत्र हि डतोमडागमेन त्वाभावादिति भावः डित्वस्य फलमाह टेरिति नच।

१६५

169

धा० शे०

द्विलेमानाभावः डतरादिभ्यः पंचभ्योद् इति वक्तव्ये संदिग्धगुरुनिर्देशस्यैव मानत्वात् ननु सर्व
सर्वेषां टीघाभावाय रादेशव क्रियतामत आह डतीति एतेनेद् कृत्स्नादित्यत्र डत्र ग्रहणा
नुवृत्यानिस्तारस्तु तिपरास्तं डेज्ञानेत्यत्र मलोपानापत्तेश्च अन्यतमस्येति डतरादिरूपा
दादितिभावः एकतरमिति एकाच्च प्राचामिति डतरच् एकतमस्तवेकतमदित्येव प
रत्वादिति नचकृताकृतप्रसंगित्वेन नित्यो नुम् शाब्दांतरप्राप्तविधेरनित्यत्वात् फलेता
ज्ञेन लक्षणभेदाच्च केचित्तु शिभावात्परत्वात्तरसिकृतेनतः शो फलं नत्वात्तु मिति मूलार्थ
कुल्लज्ञाष्ये संमतं अत्र यद्वक्तव्यं तच्चिर्जरशब्दे उक्तं सांतमहतः संयोगस्येति महतोपि
उपरंत्वकतया विशेषणं अत एवद्वंद्वः पृथक्पदं वासांतेति षष्ठीकं संयोगस्येत्यनेन स
मानाधिकरणं नोपधायाः सर्वनामस्थाने चासंबुद्धाविति चानुवर्तते तदाह सांतसंयोग
स्येत्यादिना उपधाग्रहणं च पूर्वत्वमात्रोपलक्षणं पारिभाषिकार्थस्येहासंभवात् नचैवं
न्समहतोऽन्यस्यैव सिद्धे संयोगस्येति व्यर्थमिति वाच्यं श्रेतलीत्यत्र त्सरतीति त्सरुकत्र चत्सरवान्
त्सरौ तावाचक्षते नृत्सयतीत्यत्र ततः सुपि दीर्घार्थं संयोगस्येत्यस्य सत्वात् कौलुत्रमितिनि
षेधाणिलोपस्यन स्थानिवत्वं पूर्वे पूर्वमन्तरंगमिति न्यायेन टिलोपासिद्धत्वमपि न संयोगग्र
हणसामर्थ्येन नस्यात्राणीश्रयणात् नन्फले च दीर्घसिद्धिरिति केचित् प्रभृतिग्रहणमि
ति यद्यपि मांसपचेति नेति वार्तिके न प्रभृतिग्रहणमस्ति तथापि वार्तिकानां सूत्रैकदेशत्वेन

सूत्रस्य पदानां तत्रानुवृत्तिरित्यभिप्रायः मांसपचन्येति मांसस्य पचनीति विग्रहः ङसोऽलुकालुप्त
त्वात्प्रत्ययलक्षणेन नच मांसस्य पचिवृद्ध्यघञो रित्ति पृषोदरादिपठितवचनेन तत्सिद्धिरिति वाच्यं
तस्योक्तसिद्धानुवादकत्वात् शाकत्वेन च सादृश्यमित्यभिमानः केचित्त्वेवं सादृश्येवाशाकत्वम्
रोगेष्विति सूत्रं व्यर्थं स्यात् तस्माद्वार्त्तिके शासादावितिनानुवर्त्तते भाष्यप्रामाण्यात् व्यवस्थित
विभाषया च नातिप्रसंगः यदत्र इति सूत्रेऽपि स्पृशेनैव सादृश्यं त्रासन्त्यंशाणमिति तु कांदसमित्या
हुः वृत्तावितिभाष्यस्वरसस्तत्वननु वृत्तावेवेति प्रागेव निरूपितं मासशकंदसीति मासस्तका
रः स्यात् भादौ प्रत्यये कंदसीत्यर्थः माड्भिः शारद्भिर्दुरोदरं तवेत्युदाहरणं ह्रस्वो ननु क्लीबे वाचक
तासंबंधे न वर्त्तमानस्याजंतस्येत्युक्तेर्धातुतिङ्नादौ तत्त्वासंभवात्सामर्थ्यादेव प्रातिपदिको
लब्धे पुनः प्रातिपदिकग्रहणं व्यर्थं न च ह्रिपदे वारिणीति व्यावृत्या चरितार्थम् प्रातिपदिकमित्यनु
वृत्त्यैव सिद्धेरिति चेन्न काण्डकुण्डे रत्यादौ वं तवद्भावेन प्रातिपदिकेऽवयवद्वारा नपुंसके ह्रस्वाभावा
र्थं तस्य सत्वात् इति सूत्राशयः भाष्यकृतस्तु काण्डेरत्यादेः शक्तिप्रधानतया नपुंसकलिंगवदर्थ
कत्वाभावात् ह्रस्वाप्राप्तेः प्रातिपदिकग्रहणं व्यर्थं पाठांतरं चरितार्थमित्यनंतरं प्रथमायाः प्राति
पदिकार्थानुवादकत्वेन समुदायस्यापि क्लीबे वर्त्तमानत्वादिति वाच्यं प्रातिपदिकमित्यनुवृत्त्या वि
भक्तिपरिणामेन सिद्धेः नच कांडेरत्यादौ वं तवद्भावेन प्रातिपदिके वयवद्वारा नपुंसके ह्रस्वाभावाय पु
त्व प्रातिपदिकग्रहणमर्थवदिति वाच्यं कांडेरत्यादेः शक्तिप्रधानतया क्लीबवदर्थकत्वाभावात् ।

२००
२८
१४३
२००

शा॰ प्र॰
200

नहि तत्वं च स्वभावाद् द्रव्यस्यैव न शक्तिक्रियादेः विभक्तीनां धर्मिवाचकत्वेपि शक्तिमत्त्वेन प्रत्ययबोध्यस्य
न लिंगे वैशिष्ट्येन भानं किंतु प्रकृत्याकांडत्वादिना बोध्यस्यैव नपुंसके इत्यस्य च नपुंसकवैशिष्ट्येन।
वत्त्वार्थबोधकस्याजंतस्येत्यर्थः न च विभक्त्यंतं तथास्तु मोनपुंसकादित्यादिशास्त्रेण विभक्तिकप्रा
तिपदिकस्यैव तदेकत्वप्रसिद्धेः एतेन ज्ञाने इति प्रथमाद्विवचने दोष इत्यपास्तं पचति कल्पमित्यादौ
क्रियायाः स्वभावादेन नपुंसकत्वं सत्वं च नपुंसके तरलिंगानन्वयित्वमेव विवक्षितमिति वाच्यं चेत्त्र
स्पष्टार्थत्वात् स्पष्टं चेदं भाष्ये इत्यंतं नपुंसकपदं चार्शआद्यजंतं तत्र हि तत्वं च स्वभावात् द्रव्यस्यैव न
शक्तिक्रियादीनामव्यवहारकं तु गौणत्वात्त्र गृह्यते पचति कल्पमित्यादौ तु स्वाभावादेव लिंगयो
गविभक्तीनां धर्मिशक्तित्वमिति पक्षेपि प्रत्ययार्थलिंगमसत्वादेः प्रत्ययानां प्रकृत्यर्थान्वितस्वा
र्थबोधकत्वव्युत्पत्त्या प्रकृत्यर्थ एवान्वयः अत एव त्रिकादिपक्षेण फले न विशेषः यत्र तु प्रकृत्य
र्थेत्यन्वययोग्यता न तत्रागत्या प्रत्ययार्थ एव तदन्वयः यथा पचतीत्यादौ संख्यायां नपुंसके इ।
त्यस्य च नपुंसकान्वयप्यर्थप्रतिपादकजंतस्येत्यर्थः न च विभक्त्यर्थस्तत्र्येति न दोषः एतेन शक्तो।
वाच्यत्वेपि ज्ञानस्यैव तया भवत्याक्षेपेण तस्या लिंगाश्रयत्वे पदं भाष्यं चिंत्यमित्यपास्तं इत्याहुः इत्थं
श्रुत्योपस्थिता च इत्यस्य प्रातिपदिके न विशेषणत्वं संभवति सामानाधिकरण्ये वैयधिकरण्ये
स्यान्वयाय त्वात्संवाकुलमित्यत्रातिव्याप्तेश्चाह अजंतस्येति ज्ञानवदिति दीर्घांतत्वप्रयुक्तो
न कश्चिद्विशेष इति भावः श्रीपाणीत्यादावेकानुत्तरपदे तिणत्वं भवत्येवेति बोध्यं सन्निपा।

नेति यादेशो हि ह्रस्वत्वविशिष्टमत्वप्रयोजकमतस्तस्यानुवृत्तेः तत्र यद्यपि कष्टायेति निर्देशाद्दापि नदी
र्घेणाह्रस्वत्वांशो निवर्त्तितस्तथाप्यत्वमादेशेप्यनुवर्त्तत एव तदपि चेल्लोपेन निवर्त्तेत तर्हि परिभाषा
विरोधः स्पष्ट एवेति भावः इति प्राञ्चः परे तु ज्ञापकत्वेन परसूत्रं व्याप्यज्ञानं निर्देशस्यैव बोधक
मिति मन्येयत्वसंनिपातस्य दीर्घेण निवृत्तिर्ज्ञानेत्वकस्याप्यनुवृत्तिस्तस्माद्व्याप्यत्वज्ञानं तिर्यग्वादि
संनिपातनिमित्तो दीर्घो न त्वसंनिपातविघातकलोपनिमित्तं संनिपातपरिभाषायाश्च स्वप्रवृत्तेः
प्राक् स्वनिमित्तभूतो यः संनिपातस्तद्विघातकस्य सतोऽतिरिक्तस्य स्वयमनिमित्तमित्यर्थः एवं
चत्वराशब्दाद्वा वोस्याडि चेकत्वे कृते नत्र रसादेशः स्यादुः अत एवेको गुणवृद्धीत्यत्र गाधातो ग्रेगु
णे नञ्स्मकारे आर्धधातुकोपदेशेऽदन्तत्वाभावादतो लोपाभावेपि परत्वे एणसामगाइति सिद्धे
गाधोष्टकः किन्तु करणलिंगाद्वाकारस्य गुणो न भवतीत्यनित्यत्वार्थमिकु ग्रहणमित्युक्तं अतो लोपे परि
भाषायाश्च प्रवृत्तेरनु सामगाय तत्रासतीति किन्त्वेकादेशस्य पूर्वान्तत्वेन ग्रहणादाकारस्य धात्ववयवत्वे दा
नातोलोपः स्यात् किन्त्वत्वानातोलोपाः इति चेन्नालोपे धात्ववयवत्वाप्रवृत्तेरिति न तु व्याख्यानाचरिता
र्थे किन्त्वमिति भाष्योक्तं ज्ञापकमनुपपन्नं स्यादिति दिक् स्वमोः अकृतव्यूहपरिभाषयान्तरगा
नपीति न्यायाच्च लुकः पूर्वं विभक्तिनिमित्तकार्यप्रवृत्तिरिति निवोर्ध्यं परत्वात्पदाद्यत्वे तस्य भावेन +
हि तयेकवचने तंकुलमिति स्यात् प्रथमैकवचने च संकुलमिति इक्कोचि सुपीति वक्तव्ये वि
भक्ताविति चिंत्यप्रयोजनं नामधातो तिङि क्रियावाचकत्वेन नपुंसकत्वाभावादित्याहुः

विभक्तौ किम् मधुन इदं माधवं अत्र नुमिति लोपः स्यात् हे वारे हे वारीति अत एवेकोचीति
सूत्रस्य मिहकिंचित्त्वयोरिति भाष्यमेऽ हृस्वादिति सूत्रस्थं हेत्र पुरिति भाष्यं च संगच्छते वधो
ति अतिसखीनीति वधुदाहरणं बोध्यं तत्त्ववद्भावोदाहरणं मूल एवव क्ष्यते ओत्वोदाह
रणं वारिणीति तत्र वध्यो त्व तत्त्वद्वैव गुणानां क्रमेण गावो हरेश्च्चो ष्टा हरये च तवकाशाः
नुमस्तु वारिणीश इति बोध्यं न चैवमप्योत्वस्य रहितग्रहणे नैव ग्रहणसिद्धे पृथक्तद्ग्रहणं व्य
र्थं गुणग्रहणेनाकारस्यापि ग्रहणापत्तौ नानि हेकुले इत्यत्रात्वं बाधित्वा पूर्वविप्रतिषेधेन नुमा
पत्तेः एवं चोत्वग्रहणमेव ज्ञापकं गुणवृद्धिशब्दाभ्यां विहितगुणवृद्ध्योरेव ग्रहणमिति य
तु दीर्घत्वं तद्भावे त्वेव वक्तुं गुणवृद्ध्योत्वग्रहणं च व्यर्थमिति तत्तथा हलीत्यसिध्यापत्तेर्गु
णग्रहणस्यावश्यकत्वात् वार्तिके च लाघवगौरवविचाराभावाच्च नुम्नुटोर्विशेषमाह
नामि इति नुमित्तु तस्यांगभक्तत्वाद्दीर्घो न स्यादिति भावः तृतीयादिषु भाषितः पुमान्ये
नेत्यर्थे पीलु शब्देति प्रसंगः पाठांतरं तस्माद्भाषितः पुमान् प्रवृत्तिनिमित्तो यस्य प्रवृत्तिनि
मित्तस्याश्रयस्तत्र प्रवृत्तिनिमित्तरूपं भाषितपुंस्कं समानार्थे वद्बहुव्रीहिवादिनां श्राये येश्राधर
त्वविवक्षेति क्लेशः इत्यंतं तस्माद्भाषितः पुमान् प्रवृत्तिनिमित्तो यस्मिन्नर्थे शब्देन तदर्थे तदा
र्थरूपं भाषितपुंस्कं पुंनपुंसकोभयवृत्त्यर्थप्राधरत्वविवक्षया सन्निपातनिर्दिष्टः अत

त्तेण संविज्ञानश्च बहुव्रीहिः पुंविशिष्टस्य क्लीबवाच्यत्वाभावात् भाषणक्रियया स्वकरण
तयाश्रित्य शब्दश्च क्लीबेन समानानुपूर्वीकः समानार्थश्च गृह्यते प्रत्यासत्तेः तदर्थत्वं च।
प्रवृत्तिनिमित्तभूतमेव ततोर्थश्चायं च एवं च तत्प्रकारकबोधजनकशब्दः परोभाषितपुंस्क
शब्दः तस्य च क्लीबत्वं विशेषणं एवं स्थिते यत्फलितं तदाह प्रवृत्तिनिमित्तैक्ये इति शाको
चीति नपुंसकस्येति चानुवर्तते तेन तत्र षष्ठ्यांते त्राथान्यथमांते भवतः तेन श्रीयेणत्यादौ
न दोषः टादौ किम् अनादिनीत्यादि पुंवद्भिस्वभावातिदेशः तृतीयादौ पुंसि विहितस्या
तिदेशप्रसभावस्याभावात् सत्यत्वान्निन्यायाश्रयणाद्ध्रस्वस्य नुमश्च अतएवादेशस्य
रितार्थः अन्यथानुमोनिषेधमेवकुर्यात् नद्विषस्यातिसंतस्येतिस्वरस्याभावस्तु नात
नातिदिश्यते भिन्नकर्तृकत्वात् विषयपदेन नपुंसकत्वाभावेपितस्य वा तांगीकाराच्च स्पष्टं
चेदमीच हि वचने हृत्यत्र कैयटे तदेतथ्यानयनुदाहरिष्यति सुधियेति ह्रस्वत्वे हि नाभावो
दुर्वारः स्यादिति भावः भेदाद्भिन्नवृत्तेर्हि वृत्तत्वव्याप्या जातिः प्रवृत्तिनिमित्तं फलत्वव्याप्य+
जातिर्वृत्तविशेषप्रभवत्वं वोभयथापि पुंनपुंसकयोर्नैकं प्रवृत्तिनिमित्तमिति भावः अस्थि
दध्नि मिश्रान्नविधिरयम् नकारादकार उच्चारणार्थः नन्वनङ् उदात्तस्योच्चारणेनैव सि।
द्धावुदात्तग्रहणं व्यर्थमिति चेन्न स्वरूपेणोच्चारितो गुणो विवक्षित इति ज्ञापनार्थत्वात्
एतेनास्थ्यादीनां नद्विषयस्य न्यायफदात्तनयां दत्यादेशस्यानङः स्थ्यान्यनुदात्तेनुदा

त्वएवोच्चारणीयेउदात्तोच्चारणंविवक्षार्थं।भविष्यतीतियत्नंविनानोच्चारितगुणविवक्षेतिहि।
पित्तेपिविवक्ष्यर्थमुदात्तग्रहणमितिपरास्तं परमास्थिशब्दादावेनोदात्तेउदात्तगुणस्यकस्यापिस्थानित्वे।
नविवक्षायांप्रमाणाभावात् चनसयोरुदात्तनिपातनंकरिष्यतइतिभाष्यादिग्रंथास्वरसात्अष्टा
ध्यायीपाठमभिप्रेत्य उदात्तत्वफलंतुदध्नीत्यादावल्लोपाभावपक्षेस्फुटं दध्नैत्यादावप्यकार।
लोपेउदात्तनिवृत्तिस्वरेणविभक्त्युदात्तत्वंचफलंबोध्यं तदंतेति अंगत्वादितिभावः अस्थिदध्ने
ति दध्यस्थिसक्थ्यक्ष्णामितिनेनत्वर्थः प्रियदध्नेतितुचिंत्यं उरःप्रभृतिषु पाठेननित्यकप्प्रसंगात् भाष्येप्यस्थिद
ध्नेत्येवपाठोदृश्यतेयणंबाधित्वापरत्वादंगत्वाच्चनङ् अत्रापिनपुंसकस्येतिसंबध्यते तेनथा
नअग्रतादृगमहनेतिकिप्रत्ययेदधिरित्यादौ न नह्यगृह्यमाणस्यविशेषणं तेनातिदध्नाब्राह्मणे
नब्राह्मणेनेतिसिद्धं स्त्रियांङीप्तुन सन्निपातपरिभाषाविरोधात् बहिरंगतयानङोऽसिद्ध
त्वाच्च सुधिनीति इयङः परत्वान्नुम् सुधियेति शोभनज्ञानवत्वरूपैकप्रवृत्तिनिमित्तकत्वा
य त्पुंवत्वेनुमोभावाद्ध्रस्वाभावेननाभावाविङ् नचांतरंगत्वात्पूर्वंह्रस्वेकृतेपश्चात्पुंवत्वेपिज्ञानस्य
निवृत्त्ययोगात्नाभावएवोचितवाच्यं अकृतव्यूहपरिभाषयापूर्वंह्रस्वाप्रवृत्तेः एवंप्रधीशब्दे।
प्रकृष्टज्ञानवत्वमेकमेवप्रवृत्तिनिमित्तं मध्विति मकरंदस्यमद्यस्यमाक्षिकस्यापिवाचकः
अर्धर्चादिगणेपाठात्तुनपुंसकयोर्मधुरितिशाश्वतकोशात् मध्वादिवाचिनः पुंवद्भावोभवत्ये
व यस्तुमृद्वीकाविकारवाची मधुशब्दः तस्यमाद्वीकंमधुनद्वयोरित्यमरात्नित्यनपुंसकत्वे
नभवत्येव पुंवद्भावः इदमेवध्वनयितुं तृतीयादौनोदाहृतम् केचित्तुमाक्षिकवाच्यपिनि

त्वनपुंसकः व्यत्ययो बहुलमिति सूत्रे भाष्ये मधोस्तन्त्रात्स्वासने मधुन इति प्राप्ते इति लिंगव्यत्ययो-
दाहरणात् शाखान्तरस्यप्रमादत्वात्। अन्येतु माध्वीर्गावो भवन्तु न इति लिंगसिद्धक्षीरवाचिनपुं
सकमधुशब्दाभिप्रायेण भाष्यमित्याहुः स्त्रुवेति मांसस्पृत्पनानसानां नामिति वार्त्तिके नेति भा
वः स्त्रुः प्रस्थः सानुरस्त्रियामित्युभयलिंगाः पूर्वविप्रतिषेधेनेति अंगाधिकारेतदंतविधेः सत्वे
नतदंतेपि तृज्वद्भावप्राप्तिर्बोध्या एतेन नुम्निम्पः तृज्वद्भावस्तु नुमि कृते व्यवधानादप्राप्त्याऽनि
ष्टत्वापाल्लेनन्वयं पूर्वविप्रतिषेधः तृतीयादिष्वितीत्येतद्विषयकः भाष्ये कृशक्रोष्टुनेऽरणेपा
येत्यस्यैवोदाहरणात् अन्यथा प्रथमोपस्थितोदाहरणत्यागे बीजानापत्तेः नचास्य तन्मा
त्रविषयत्वे वार्त्तिके तृज्वद्भावग्रहणवैयर्थ्यापत्तिः कृशक्रोष्टुने इत्यस्य तृज्वत्त्वाभावपक्षेसु-
साधत्वात् कृशक्रोष्टु इत्यस्य च पुंवत्वपक्षे दुर्वारत्वादिति वाच्यं कृशक्रोष्टुणे इत्यादिव्यव
त्याचारितार्थ्यात् नच कृशक्रोष्टु इत्यस्यामवस्थायां नुमृतृज्वद्भावयोः प्राप्तयोः परत्वात्तृ
ज्वद्भावे सकृद्गतिन्यायेन न नुम्भविष्यतीति न च पुनः प्रसंगविज्ञानप्रपल्लेन न्याप्तिः सकृद्गति-
न्यायमाश्रित्य वचनानारंभस्यैव लघुत्वादिति वाच्यं एवमपि समाहारद्विगौ पंचक्रोष्टुने इत्या
दौ पुंवत्त्वाभावात् न तत्र तृज्वद्भावनिवृत्तेः फलस्य सत्त्वादिति चेन्न भाष्योदाहरणासंगतेः।
पलक्षणं तदिति चेत् कृशक्रोष्ट्रूनीत्येवोपलक्ष्यतां भाष्योदाहृतं प्रातिपदिकांशानुग्रहा
यतदुक्तं नचोदाहरणमादरणीयमितीतिप्रांचः एवं हि नित्यत्वात् तृज्वद्भावविषय एव पूर्वविप्र

धा॰ प्रा॰ ९३ दि

निषेधः एवकारादिस्वारस्यानि लभ्यते तेनैत्येवेत्यस्यापीत्यर्थः प्रातिपदिकांशेस्यतदंश
स्यापीत्यर्थः वस्तुतस्तु एवं सति पूर्वक्ष्यशाकोह्यनेरित्युदाहरणे भाष्यकृतोऽनानमेवोक्तं भव
तितत्त्वायुक्तं तस्मात्नाद्ग्रोदाहरणपरभाष्यप्रामाण्यात् यंवत्यपक्षोपि अनभिधानेन त्य+
न्त्वतोभावइत्येव कल्पयितुं युक्तं भाष्यकृता हि सत्ततयस्य प्रत्याख्यानायाश्रितस्य शब्दा+
नां नियतविषयत्वस्य सूत्राद्यारंभेपि आवश्यकत्वद्योतनाय तदुदाहृतं एवं च सर्वत्र त्व
ङ्गावविषयोपनिषेधः पाठांतरं न चोदाहरणमादरणीयमित्यस्य च उदाहृतातिरिक्तोदा
हरणाभावइत्येव परतया नादरणीयमित्यर्थः इत्यंतं न चोदाहरणमादरणीयमिति त
दर्थः किंच नियतविषयत्वेन प्रत्याख्यानमेव युक्तं अत एव तद्धिते ष्वचामादेरिति सूत्रस्थ
क्तोष्टु इति भाष्यप्रयोगसिद्धिः तृतीयादिपाठेन तद्धितस्यापि ग्रहणमिति तु युक्तं अंश
स्याचीत्येव सिद्धे तृतीयादिग्रहणं वैयर्थ्यापत्तेर्विभक्तिप्रकरणात्वेति विपर्यविभावयामः स्त
त्वा लुनीइति ओः सुपीति यणं वाधित्वा परत्वान्नुम् स्तुत्वेति अस्य शोभनलवनकर्तृत्वमेकमे
वप्रवृत्तिनिमित्तं पुंस्त्रीवयोस्तत्र पुंवत्वपक्षे ह्रस्वाभावेन षित्वाभावान्नाभावो न अक्लीवत्वे
न नुमभावाद्ग्रहणं धातइति अनडुत्वन प्रियतिसृ इति भाष्योदाहरणेनानद्धि षये न नुम
नेत्यस्य नित्यत्वांगीकाराहादि तुक्तं प्राक् ऋतोङीति गुणस्तु सर्वनामस्थानत्वाभावान्न ए

तदर्थमेव तत्र सर्वनामस्थानग्रहणम् एकं च सर्वनामस्थानग्रहणमपि तदनित्यत्वज्ञापकं वो
ध्यं धात्रीति धारणपोषणकर्तृत्वं पुंनपुंसकयोरेकमेवेति पक्षे पुंवदिति भावः एच इक् ह्रस्वादि
शे इत्यादेशाकर्मणो घञ् ह्रस्वादेशेन कर्मधारयः निर्धारणे सप्तमी ज्ञातत्वात्केव वचनं तदाह ।
आदिशेप इत्यादि एचां पूर्वभागोऽकारसदृश उत्तरस्तु इवर्णोवर्णसदृशः तत्रोभयांतरमध्ये ह्रस्वा
भावात्पर्यायेणावर्ण इवर्णादयः स्युः तत्र माकदाप्यवर्णभूदिति नियमार्थमिदमित्याह इगे
वेति यथाशास्त्रमेव नियम्यत इति न यथासंख्यं न च परत्वात्सूत्रं विनापीवर्णभविष्यतीति वा
च्यं अंतरंगत्वेनाकारस्यैव प्राप्तेः लब्धगतपरत्वमादाय विप्रषेधस्य त्राप्रवृत्तेर्नित्यः परपणा
दै पूः परस्त्वासौ व्यवस्थया युगपत्संभवो नास्तीति च हि रंगेणासिध्यतीति यथैनाचः पर
स्मिन्निति सूत्रे भाष्ये स्पष्टतयोक्तत्वात् अत्र पूर्वोत्तरभागयोः समप्रविभागपक्ष एव स्तुता
वेव इति स भाष्यादावुक्तः उत्तरभूयस्त्वपक्षस्तु तत्रैव विनिगमनाविरहेण भाष्ये दूषितत्वाद्ध्यं
ह्रस्व एव तु नास्त्येव एओङ् इत्यादौ दीर्घनिर्देशसामर्थ्यादिति स्पष्टं भाष्ये एवेति दिक् ननु अह्रु
ह्रस्वगेव स्यादिनूपप्रवृत्तिनिमित्तैक्यात्पुंवत्त्वं स्यादिति शङ्काह यदिगं तमिति एतेन पुंवत्त्वपक्षे
प्रापयेत्यादिन्नू पाणिपुंवत्वेन ह्रस्वनिवृत्तेः न च ज्ञातस्य निषेधायोगेन कथं ह्रस्वनिवृत्तिः
ह्रस्वात्पूर्वं तु पुंवत्त्वं तु लभमिगंतत्वाभावादिति वाच्यं लोपादिवत्पुंवद्भावस्य संदरभार्यर

५.४

२०४

प्रा॰ शे॰ स्यादोऽजातनिवर्त्तकतायाश्चानिर्दिष्टत्वात् पुंवत्त्वासंभावनायाः सत्वेनाकृतव्यूहपरिभाष।
यापत्ते ह्रस्वाप्रवृत्तेश्च न च वहिरंगकृतनिमित्तविनाशाएव परिभाषाप्रवृत्त्युपयोगीन स्वकृ
तइति वाच्यं समस्तस्येति सूत्रस्थभाष्यासंगत्यापत्ते तत्र हि नाव्ययमित्यादोऽस्यादिर्नकारोन स्वर
योग्यो नास्यावादिरित्युनावकृतिशतिषेधोनर्थकः न चादेरेव नकारस्य स्थानेउदात्तगुणविशिष्टा
वशिष्टरस्त्विति वाच्यं तथा हि सति निमित्तभूतह्रस्वत्वस्यविनाशेना कदाचित्प्राप्तेः स्वयमेवो
पजीव्यविरोधो नाम एवं चायमेव प्रतिषेधोऽज्ञापयति हल्स्वरव्यंजनमविद्यमानवदिति उक्तं स्व
कृतस्थानविनाशस्तु न स्वाप्रवृत्तौ निमित्तं विधिविषयत्वापत्तेरिति परास्तं ह्रस्वकृतेऽप्युक्तरी
त्या पुंवत्त्वाप्रवृत्तेर्निमित्तविघातस्यैवाभावात् किंच तवइकन्यायेनैव पुंवत्त्वेऽन्तरंगतल्लक्षणनिमि
त्तविनाशेन पुंवत्त्वस्याप्राप्तेः पुंवद्भावश्चनादिशब्दो द्व्यनिमित्ताविघाते चरितार्थः एतेनैकदे।
शविकृतन्यायेनेगंतस्य भाषितपुंस्कत्वान्पुंवत्त्वं स्यादेव प्राग्दीव्यतोऽणिति सूत्रस्थभाष्य
एणस्य न्यायस्याशास्त्रीयधर्मातिदेशकतायाश्चापि स्वीकारादिति अपास्तमित्याहुः वस्तु
तउपजीव्यविरोधात् संनिपातपरिभाषया च ह्रस्वो मा निवृत्तिस्तु केन वार्येतामिति विंत्यं
शराभ्यामिति नन्वादेच उपदेशेऽशितीति सूत्रे भाष्ये गोभ्यामित्यादावात्वमाशंक्य रायोह
लीति लोपकात्प्रातिपदिकस्यनेत्युक्त्वाने नतद्रि नियमार्थमेतत् रायो हल्येवेत्युक्तत्वेना।
स्याप्येत्वं एव प्रवृत्तेः कथमत्रात्वमिति चेन्न रैकोचीति सूत्रेऽग्रहणाभावेऽपि राभ्यामित्या

दोनुमितकेन तस्य समुदायभक्तत्वेन निर्दिष्टस्यैव ग्रहणे सति तेन व्यवधानादात्वं न प्राप्नोतीत्याशंक्य
परत्वमाश्रित्य समाधानरूपन्यायानुगृहीतप्रामाणिकसिद्धान्तभाष्यानुरोधेनास्य प्रौढिवाद
परत्वात् प्रवीणमिति यत्तु रायो हलि लीति विषयसप्तमी अतः प्रागेवात्वमिति तत्र अंगा।
धिकारे विषयसप्तम्या वक्तुमशक्यत्वात् अंगत्वस्य विधानप्रतिबद्धत्वात् निर्दिष्टपरिभाषा
बाधे मानाभावाच्च प्रराणामित्यादौ नुडनापत्तेस्त्वदुदाहरणविरोधाच्च आत्वे कृते नुडमे ना
पत्त्या हलादिविषयाभावेन पूर्वमात्वप्राप्तेश्च केचित्तु नुटो निमित्तस्य दीर्घत्वविनाभावरूप
कत्वेन तन्निमित्ते संनिपातपरिभाषया विषय एव न नामीति दीर्घस्तु सुपि चेति दीर्घनित्यत्वा
द्बाधनं तस्मादधवा प्रपमात्तुः रत्नीति बहुश्रेयसी शब्दे तु नपुंसकह्रस्वो भवत्येव न चेयसो।
बहुव्रीहौ पुंवदिति वचनेन पुंवत्त्वं ईयसः परस्य स्त्रीप्रत्ययस्य बहुव्रीहौ विद्यमानस्य पुंवदि
ति तदर्थात् पुंविषयस्य ईकारस्य यथा न ह्रस्वस्तथास्यापीत्यर्थः ईयसं तादिविहितो यः।
स्त्रीप्रत्ययस्तदंतान्ते बहुव्रीहौ पुंवदिति तु नार्थः बहुव्रीहेः पुंवत्त्वेपि उपसर्जनस्य श्रेयसी
शब्दस्य स्त्रीप्रत्ययांतत्वानपायेन उपसर्जनह्रस्वस्य दुर्वारतापत्तेः एवं च प्रत्यासत्त्या स्त्रीप्रत्य
यत्वनिमित्तकस्य गोस्त्रियोरित्यस्यैव तेनाभावातिदेश इति नपुंसकह्रस्वो भवत्येव न च नो
त्येवासिद्धे पुंवद्वचनं व्यर्थं वार्त्तिकेषु लाघवगोविचाराभावस्य तत्र भाष्ये ध्वनितत्वात् एते
बहुश्रेयसीकुलमिति श्रीपत्याद्युत्क्रमपास्तमिति केचित् अपरे तु ईयसश्चेति सूत्रभाष्ये

शा॰श्वो॰ ईयस उपसर्जनेन दीर्घत्वं वक्तव्यं बहुश्रेयसी पुंवद्भावश्च नास्ति ह्रस्वमित्युक्तं तेनास्य नपुंसकह्रस्वनिवृ
त्त्यर्थत्वमपि लभ्यते अन्यथा वचनेन वचनभ्रष्टत्याख्यानासंगतिः ममतु मतेन नपुंसकह्रस्वा
निवृत्त्यर्थमावश्यकं तदिति युज्यते एवं तेनास्य प्रत्याख्यानमत एव गोकुलमित्यादौ उपस
र्जनह्रस्वनिषेधायकते न द्वन्द्वरवाग्निके पूर्वपदस्य च प्रतिषेधः इत्यत्र नपुंसकह्रस्वनिषेधत्व। य
वावद्वन्द्वे गोसमासनिवृत्त्यर्थमिति प्राचः संगच्छते इत्याहुः इत्यर्जतानपुंसकलिंगाः ह्रोढः
झलो झलिपदस्य स्कोः संयोगाद्योरित्यतो झलिपदस्यानुवृत्तिश्चानुवर्तते तदाह झलीत्यादि झलि
परे पूर्वस्य पदान्ते विद्यमानस्य हस्येत्यर्थः ढस्तु न विहितः धुक्लोटी त्यादौ सिद्धापत्तेः लिटित्त्विति
लिहस्यास्वादने क्विपू ढस्य पदत्वेन ढः खरि चेति टः तस्यासिद्धत्वात् पत्तेर्धुक्चर्त्वेन पदान्तादि त
ति झ्लत्वनिषेधः नचात्र धुक्ढुर्लभः ढः सीत्यत्र पदस्येत्यधिकारेण सीत्यस्य तद्विशेषणत्वे
न सप्तमीनिर्दिष्टत्वेन च सकारादेः पदस्यैव तद्विधानादिति चेन्न भाष्यादिप्रामाण्येन विशेष
णविशेष्ययोरुभयोरपि सप्तम्यंतत्वे यस्मिन्विधिरिति न्यायप्रवृत्तेर्वक्तव्यादेरित्यत्रादिग्रहणात्।
दोश्चिंत्येन च व्यधिकरणानान्वयस्यैवांगीकारादित्याहुः चयोर्द्वितीया इति तु न चर्त्वस्यासि
द्धत्वात् दादेः धातुग्रहणाद्वृत्तिमभिप्रेत्याह उपदेश इति धातुग्रहणं तु दामलिडिति
प्रातिपदिकव्यावृत्त्यर्थमुत्तरार्थं च अत एव भाष्ये घत्वस्यासिद्धत्वात् धुगित्यत्र ठत्वं प्राप्नो
तीत्याशंक्यापवादत्वेन समाधायाप्यवा एवं वह्यामि ह्रोढः अदादेघिति नतो धातोरिति दादे

रितिवर्ण्णेतेनेतिनिष्ठत्वमित्युक्तं ङ्हेस्त्ववादुहेत्यनेनटत्वस्यापिविधानात् धुगित्यादौनदोषइतित
दाशयः तत्रधातोरितिसूत्रेभाष्यकृतात्वनदादेरित्यनुवृत्तेःफलान्तराभावेनवृत्त्यादावेकवाक्यत
यानडुपदेशवद्दादिलक्षकंसामर्थ्यात् अर्थाधिकारानुरोधात्पूर्वत्रनिषेधसमर्थकेप्येवम्
तएवनामधातुविषयदामलिडित्यादौटत्वघत्वाभावोएवंचदादेरित्यनुवृत्तिर्लक्षणमात्रबो सिद्धे
धनायेतिबोध्यम् एवंचतदेकवाक्यत्वापापवादत्वपक्षेपिधातुपदस्यावृत्त्योपदेशलक्षकतोचिते
तिभावः नचोपदेशेइत्येवास्तुप्रातिकपदिकस्यत्तूपदेशाभावादेवनेतिवाच्यं गौरवापत्तेः किंच
धातुग्रहणाभावेदादेरितिकस्यविशेषणंस्यात् नचपदस्यस्यात् यदितवाक्येसंबंधात् नद्रुस तद
दस्यहकारानवयवत्वात् आदिशब्दस्यावयववाचित्वात् नचदादेरितिपंचमीआदिभूतद
कारात्परहस्यघत्वप्रवृत्तिः एवंहिधुगित्यादावेकवर्णव्यवधानएवप्रवृत्तिःस्यात्नदंदग्धीत्या
दावनेकव्यवधानेआदेरित्यस्यवैयर्थ्यापत्तेश्च अपिच नह्यडित्यादिव्यावृत्तयेत्वात्तरत्रधातुग्र
हणंचरितार्थंवस्तुतस्तदेकवाक्यत्वापदादिपदमुपदेशकालिकदादित्ववल्लक्षकमित्ये
वंवक्तुं युक्तं आवृत्तिलक्षणोभयाश्रयणेगौरवात् किंचधातोरित्यस्यषष्ठ्यंतपाठउपदेश
काललक्षणापक्षेपिउपदेशेइत्यर्थलाभायविभक्तिपरिणामेत्यंतगौरवंअतएवादिग्रहणं
चरितार्थं अन्यथोपदेशधात्ववयवदकारात्परस्यघत्वार्थेनैवसिद्धौनहेयर्थ्यंस्पष्टमेव।

२०६

206

स्थ ४

शा॰शे॰

धातुग्रहणंतूत्तरार्थमावश्यकंस्पष्टार्थमिहैवकृतमितितत्त्वं।ततश्चावृत्तिवन्नन्वौपदेशिका।
प्रायोगिकयोरौपदेशिकस्यैवग्रहणमितिपरिभाषयाऽऔपदेशिकदादित्वलाभेऽप्यावृत्तिर्लक्षण-
चक्षुरितिवाच्यं भाष्येऽव्यवहितत्वेनवैयधिकरण्यान्वयप्रदर्शकभाष्यविरोधेनतत्रतत्रौप-
देशग्रहणंकुर्वन्सूत्रविरोधेनतरसमपोह्यः अत्रसंतस्योदित्सूत्रेभाष्यविरोधेनचतस्याश्रयणे
कृत्वातू हस्येति हान्तस्येत्यर्थः घस्त्वत्रलोन्त्यपरिभाषयान्त्यस्यैवेतिबोध्यं घइति[illegible]गइति
तुनोक्तमधुगित्यादौभष्भावापत्तेः नन्वधोगित्यस्यधातोरवयवोयोदादिरित्यर्थेनसि-
द्धिःवैयधिकरण्येचगर्दभयतेःप्रत्ययेगर्धपूइत्यादौभष्भावयोरुत्तरसूत्रेऽप्यावश्यकंदोग्धे
त्यादितुव्यपदेशिवद्भावात्सिद्धंस्पष्टंचेदंभाष्येऽतश्चाहदामलिहमिति अत्रघत्वाभावेमानं
भाष्यंदर्शितंनचैवंप्रागुक्तभाष्योत्तरंअधोक्सिद्धयेवैयधिकरण्यान्वयपर्यन्तंभाष्यकृताधा
वनंव्यर्थंदादेरितिवक्तव्येतदन्यस्योक्तमाशमज्ञाननएवमपिधोदादेरित्युच्यतेतत्राधोक्नसिध्य
तीत्याशंकायांएकाचइतिउत्तरसूत्रार्थमपिप्रसंगात्त्रिपीत्तंदादिपदलक्षणायामधोगित्य
स्यासाधारणफलत्वाभावंदर्शयितुंचतथोक्तेः अतएवाग्रेवैयधिकरण्यस्योत्तरार्थमाव।
श्यकत्वोक्त्याऽऽहार्थमनावश्यकत्वंभाष्यध्वनितंसंगच्छतेइत्यलं एकाचोनिवृत्तमिति धु
ग्भ्यामित्यादौतुपदान्तत्वादेवसिद्धिरितिभावः एतेनएकाचोबशइतिसूत्रेइन्द्रस्यादेगादित्य

तोऽङ्गादित्यत्र न्नैतेष्वङ्गं च द्विविधं धातुरूपं प्रातिपदिकरूपं च तत्र धातोः पदान्त एव प्रातिपदिकसं
ज्ञस्य तु ऊरुलिपदान्ते चेति परास्तं स्वरितत्वकल्पनकल्पविभक्तिविपरिणामादीनां निर्मूलत्वा
त् निष्फलत्वाच्च तद्धाट् तद्धाड्भ्यामित्यादावतिव्याप्तेश्च सामर्थ्यादिति सत्यं ग्रहणस्येत्तर
ऊल्पावश्यकत्वपर्यन्तत्वे तु तदनुवृत्तेः फलाभाव इति भावः धातोरिति किम् तद्धाट् तद्धाड्भ्याम् ननु
डुहेर्घत्वे धात्ववयवमेकाच्रूपं दुहरूपं इति उ घिग्भिश्च तत्राघेन अर्थेन तःसंसेनवच्छा दुघिगित्ये तु नावयव
इति कथं भष्भावो न स्यादाह व्यपदेशिवदिति विशिष्टोऽपदेशो मुख्यो व्यवहारः सोऽस्यास्तीति व्यप
देशी तेन तुल्यमित्यर्थः इदं चाद्यन्तवदेकस्मिन्नित्यत्र तत्सूत्रप्रत्याख्यानभाष्ये स्पष्टं एकाचः
किम् दामलिहं वच्छाः किं ब्रो त्स्यति मर्षं तस्य किं दास्यति स्थाः किमदादद्धिद धातोर्यङ्लु-
कि लोटि हेर्धिः धुगिति ननु धातुत्वस्य क्रियावाचकत्वे सति भ्वादिगणपठितत्वरूपत्वे न क्रि
यायाश्च अनुपसर्जनीभूतप्रधानरूपाया एव ग्रहीतुमौचित्यात् कथमत्र घत्वभष्भावौ दुहित्वे
तद्धोध्यकर्तारं प्रतिक्रियायां गुणीभूतत्वादिति चेन्न अत्र संतस्येति सूत्रे धातोरितिनिषेधे
न विशिष्टार्थस्य प्रवेशो परिदृश्यस्यालेऽनुपसर्जनीभूतस्यैव ग्रहणमिति नियमानङ्गीकारात्
एतन्मूलकमेव पठ्यते कृपाधातुत्वं न जहातीति ननु एवमपि धातोः स्वरूपग्रहणे तत्प्रत्यये
कार्यविज्ञानमिति परिभाषया कथमत्र घत्वभष्भावौ अस्याः चज्ञापकं दाण्डिनायनादिसू
त्रे भ्रौणहत्येति तत्वनिपातनं अन्यथा हन्तस्तोऽचिण्णलोरित्यनेनैव तत्त्वसिद्धेः किं तेन ॥

प्रा॰ शे॰ अंतन एव वार्त्तेश्नमित्याद्यौ न नत्वं श्नौणहत्येकत्वं च न तस्मात्प्रयोधातुसंज्ञासूत्रेनेन विहितः प्रत्ययः।
स्वरूपग्रहणं च नेह अंगग्राहकयोपादानम् एतेन स्त्रंभ्यामित्यादावनुदात्तस्य च ई उपधस्येत्या
मागमापत्तेः किंतु यत्कार्यं धातुं न व्यभिचरति तत्रैवेत्यर्थः तथा च स्वरूपग्रहणं नाम धातोरेवास्य
यणं तत्र यथा कथंचिदिति कामयचुस्त्रेकोस्तु भेमृजेर्वृद्धिरित्यादौ भाष्ये हरदत्तादिग्रंथे च स
प्रमिति चेन्न श्नप्रशानिति नत्वनिषेधेन पदांतनिमित्तकार्यं तदप्रवृत्तेर्ज्ञापनात् यदित्तु मोनो
धातोरित्यादौ परिभाषाप्रवृत्तिः स्यात्तदा निषेधासंगतिः स्पष्टैव प्रशानिनिहिन श्नान नेज
न इत्यत्र रूपम् इति न पूर्ववीत्यचानि रूपितं श्नौणहस्येति धर्मिग्राहकमानेन सत्वस्यंतप
दे न प्रत्ययस्य निमित्तत्वे प्रतिपादिते सति तत्रापि यमप्रत्ययको नियमार्थत्वस्यास्याः कल्प
नात्त्वेतिदिक् श्नप्रशानितिनिषेधेन तस्यास्त्रनित्यत्वात् वा द्रुह द्रुहेः प्राप्तेरन्येषामप्राप्ते स्य
यत्र विभाषेयं द्रुहादीनामिति तु नोक्तदोषः कृदोषु रू इत्यादौ यङ्लुकि दोषापत्तेः भष्भावस्तु
अजंतधातोरिति भाष्योदाहरणेन निषेधानित्यत्वाज्ञवत्येवेत्याहुः इगपणयणस्थाने इति सूत्रा
त्स्थाने यग्रहणमकृष्णेऽनोऽस्य सेनास्त्रेत्वेन गुणत्वाज्जुणानां च परार्थत्वादिति न्यायेन प
रिभाषाऽसंबंधेपि अनुवादत्वेपि च न दोषः स्पष्टं चेदमिको गुणवृद्धीति सूत्रशेषे भाष्ये यणः
स्थाने इक् भवति स संप्रसारणसंज्ञक इति तु नार्थः वाक्यभेदप्रसंगात् विधिप्रदेशेषु सूत्र
टकवद्भाविसंज्ञा अयणं बोध्यं नन्वेवं वोम्भ दुहितरामित्यादौ लस्योत्तमपुरुषैकवचने इटि त

पाठांतरं
साहिप्रान ते
नन इति कावेत
स्पन तदनुकर
ण हि सूत्रेन
लोपापत्तेरिति
दिक्

स्यसंप्रसारणत्वादुल्ल इति दीर्घापत्तिः नचेष्टापत्तिः वाक्यार्थः संहीत्यादिभाष्योक्तपक्षांतरेषुदु
र्लभत्वात् पाठांतरं दिति चेन्न यथासंख्येन स्थानाख्यप्रमाणेन चादोषात् इत्यंते यथासंख्येन
नुवादत्वात् न चैवं समूलाकृतञ्जीवेषु हनु कृञ् ग्रह इत्यादावपि यथासंख्यानापत्तिः तत्राप
पदसंज्ञाया अपि विधेयत्वेन द्वयोरपि साक्षाद्विधेयसंबंधसत्वात् संबंधस्यापूर्वस्य बोधत्वात्
अत्र तु मानांतरसिद्धसंबंधस्याप्यनुवाद एवेति चेन्न सत्रप्रवरत्वभावेपि लौकिकन्यायासिद्धस्य श्रुति
लिंगादौ मीमांसकैः परिगणितस्य स्थानाख्यप्रमाणस्यानुवादेपि सुलभत्वात् अनुवादेऽस्य
स्याअभावादनिसत्वाच्च व्यक्तिसाम्याभावेपि धर्मसाम्यमादाय यथासंख्यं सुलभं इति शंक्यः न
न लकारोपदेशः किमर्थ इत्यादि कृल्लकृसत्रस्य भाष्यविरोधात् तस्मात्स्थानेंतरतम
इत्यप्यत्रापकृष्टव्यं तेन यणः स्थाने स्थानतः सदृशो यण् संप्रसारणसंज्ञक इत्यर्थान्नदोषः
किंच प्रदेशेषु यण इगित्येतावतैव सिद्धे संज्ञाविधानसामर्थ्येन तद्भावितपक्षाश्रयणान्नदोषः
विधिप्रदेशेषु तु सूत्रशाटकवद्भाविसंज्ञाश्रयणं न वाप्याव प्रफकमेव संप्रसारणाद्वेत्यादौ य
ण इक इत्युक्तावपि विधिप्रदेशेषु लक्षणतयांतरतया च स्थानसंबंधलाभः तद्भावितत्वाश्रयः
णादेव चातव्याप्यासावरुणाश्चातव्यूः स्वरुणः इत्यादौ पूर्वरूपं न समानांगग्रहणं तु भाष्ये प्रत्या
ख्यातं तथा च भाष्यप्राकट्यर्थमित्यादौ पूर्वरूपाभावाय समानांगग्रहणं कर्तव्यं न कर्तव्यं ऽसं
प्रसारणत्वात् अन्योर्यसंप्रसारणसंप्रसारणयोः स्थाने एकस्यादिश्यते यदि तर्हि नेदं संप्र

प्र॰ शे॰

सारणं हूत इति दीर्घत्वं न प्राप्नोति वचनप्रामाण्याद्भविष्यतीति न च पुत्रस्य नूअसिति स्थिते तेन रंगत्वा
त्तृ दीर्घे पूर्वं तद्रूपं न स्यादिति वाच्यं हलः इत्यादि शास्त्रप्रामाण्येन साक्षात्संप्रसारणस्थानिकस्या।
ल्विधित्वेपि संप्रसारणत्वं त्याज्यत इति भाष्याशयात्र दोषः अन्योयमिति भाष्यस्य तयोः स्थाने य एकः
पूर्वरूपरूपः तस्मादि पूर्वपन्ते दीर्घेण आदेशावान प्रक्रियत इत्यर्थः न चैवं तत्र परे न संप्रसारणे इति निषेधो
न स्यादिति वाच्यं अत्र चः परस्मिन्निति स्थानिवद्भावात् अत एवात्ताघुशाब्दस्य नपुंसकेऽत्तयु इत्यादौ ह।
लू इति दीर्घेण न चात्रापि स्थानिवत्वेन दिवृत्वात् दिव उदित्युवेत परत्वसामर्थ्यादेव न दीर्घ इति वाच्यं
अस्यादिवः सानुबंधकत्वेन तत्र ग्रहणात् अत एवात्त सूरिस्यत्रापि सावपि पदमिति पक्षे उत्वेन एतेन नि
रनुबंधकपरिभाषा प्रत्ययविधावेवेति निरस्तं स्पष्टं चेदं दिव औदित्यत्र भाष्ये एवं च दिव उदिति सूत्रे
तकार उच्चारणार्थः न च कृत उदिति न परत्वेन भाव्यमानोकारस्यापि सवर्णग्राहकताज्ञापनेन वि
मलघु इत्यादौ सावकाशो त्वापेत्तया परत्वाद्युभ्यामित्यादौ कृतीत्यननुवृत्तिपक्ष ऊठि तस्य स्थाने
पुनः प्रसंगविज्ञानेन ह्रस्वोकारविध्यर्थं न परकरणमिति प्रकृतसूत्रभाष्य एव स्पष्टत्वेन तिस्वरि
तमिति सूत्रे भाष्येऽस्यैव तपरत्वस्य शास्त्रार्थज्ञापकतायाउक्तत्वेन च कष्ट मुच्चारणार्थत्वमिति
वाच्यं अदसोसेरित्यत्र समाहारद्वंद्वे नैव सिद्धे र्भाव्यमानोकारेण सवर्णग्रहणज्ञापने फलाभावेनास्य भा
ष्यस्य प्रौढिवाद परत्वात् क्तितीत्यनुवृत्तिपक्षे ऊवः शास्त्रभावाच्च अपि च कोरिति सूत्रेऽर्थाधिकारा
श्रयणाद्धातुविहितझलादिप्रत्ययस्यैव ग्रहणेनोठोऽप्राप्तेरितिदिक् वाह ऊठ् इभसोन्यधिकारः व

सोः संप्रसारणमित्यतः संप्रसारणमित्यनुवृत्तिश्चतस्रोऽठो विशेषणं तेनाल्लोपस्येति न तदाह भस्येत्या
दि ननु ह्रस्व उठ्वास्तु वृद्धिविधावप्येवं क्वोः शूडित्यत्र च शूडित्येवास्तु नस्येव ज्वरत्वरेत्यत्रानुवर्त्तते नो
रित्यादौ न दोषः अवत्यूरित्यत्र च हलि च इति दीर्घेण सिद्धिं न चानकारान्ते उपपदे विशेषः संप्रसार
णानुवृत्त्येव सिद्धे ऊठ्ग्रहणमसिद्धपरिभाषायां ज्ञापकत्वं वदतां ज्ञाप्यकारेणतादृशोपपदाश्वि
वित्वभावस्य ध्वनितत्वात् कैयटादिभिः स्पष्टीकृतत्वाद्वेति चेन्न दीर्घस्यासत्त्वूरित्यादौ चरितार्थत्वे
नाल्विधौ स्थानिवत्त्वाभावेन च घूः तरथ्यादौ दीर्घाभावप्रसंगात् सिद्धान्ते तु हलि च इति विधानसामा
र्थ्यात् दीर्घ इति न दोषः नञ्जावितग्रहणपक्षेऽवत्यूरित्यत्र दीर्घाप्राप्तेश्च ज्वरत्वरेत्येतेनेति संप्रसार
णपूर्वत्वेऽपि उपधागुणस्यापत्तेश्च आमिपूर्व इत्यतः पूर्व इति इको यणचीत्यतो अचीति एकः पूर्वपर
योरिति चानुवर्त्तते तेन दाह संप्रसारणादचीत्यादि ऊठ्श्वित्वे फलमाह प्रष्ठौहेति अन्नैव विशेषणा
र्थ एकार इति भावः कंदस्येवेति कंदसि सह इत्यतो वह इत्यत्र कंदसीत्यनुवर्त्तेरिति भावः णि
जन्ताहिति अनेन लोके विश्ववाट् शब्दस्य साधुत्वमात्रमुच्यते न तु स्वोट् णिलोपस्य स्थानि
वत्वात् भसंज्ञाहि नप्रत्ययेन वाह शब्दस्य विशेषणादित्याहुः विज्ञग्रहणं क्विपोऽप्युपलक्षणं न
च तत्र संप्रसारणं णिलोपस्य स्थानिवत्त्वं न तु क्वौ विधि प्रति इति निषिद्धमिति वाच्यं वच्यादिभ्यो वि
हितेकि पीति व्याख्यानस्याचः परस्मिन्नित्यत्र कामचारत्वे च भाष्ये उक्तत्वेन णन्तान्क्वौ संप्रसारणा

२०९

प्रा॰ शे॰ प्राप्तेः पाठान्तरं लक्षणप्रतिपदोक्तपरिभाषयाक्षिप्तमाह नुमुच्चायविधिरेव तत्र ग्रहणाच्च इत्येनं
न वस्तुतो एवं तोक्षिप्तोनभिधानं अत एव काम्यकरणोक्तविहितविशेषणात्तदितरपदयोः फ
लेकमिति मूलाशयः येत्वग्गोमत्यो प्रत्यये गोपानित्यादिभाष्येऽप्रत्ययपदस्य संकोचाभावाय
कोऽनुष्ठानमित्यत्राक्षिप्तपदं विवापुष्पलक्षणमाहुस्तन्मते विद्यापिकुठिभवत्येवेत्याहुः अत एव। वस्तुतस्तु
विभाषापूर्वाह्णापराह्णाभ्यामिति सूत्रे प्रष्ठोहः आगतं प्रष्ठवाड्रूप्यमिति भाष्ये लौकिकेविग्रहवा
क्येप्रष्ठोहः इति प्रयुक्तं वस्तुतस्तु तत्र ज्ञापकप्रमाणपात् वहेश्चेत्यत्र छंदसीति नानुवर्तते इत्याहुः
धनितं चेदं इति पक्षे इत्यनु त्वयामूलकृताचनडुहो इतोनुम् सर्वनामस्थाने इत्यतः सर्वनामस्था
नेइति निवर्तते सावनडुहः अर्कीनघोरित्यतोऽनुमनवर्तते आदिरिति च आदित्यधीति विशेषविहितेन
ति पास्तु टासीपु डिवेत्यर्थ नवाध्यते इति उपजीव्यत्वादितिभावः अमाचेति अस्संबुद्धाविति शेष
धिहितेनामेत्यर्थः नुमउपजीव्यत्वेनविरोधाभावात्ततः प्राक्तस्याप्राप्तेरितिभावः क्वचित्तु आमा
चनुम्नवाध्यत इति पाठः तत्रायमर्थः चतुरनडुहोरामुदात्त इत्यादोनडुंसकस्येतिनुम्परत्वादामाचार्ये तपुनः
प्रसंगविज्ञानान्नुनवाध्यते इति दत्वेनेति नुचेवंनुमोऽविकृतरूपस्य वर्णाश्रयत्वेनडुंस्तत्रेत्यत्ररू+
त्वमपि नस्यादितिवाच्यं तस्मिन्नुपदेशावेवृत्यर्थाभावात् संयोगान्तलोपस्येति इस्यानिकस्येत्य
र्थः एवं नस्यशाति परिकान्तत्वाभावात्तलोप इतिभावः अनड्वानिति अनः शाकटं वहतीतिवि

ग्रहः वहेः क्विबनसि अनसोऽश्च यजादित्वात्संप्रसारणं वसुस्रंसु ध्वसनडुहेत्यतः सेतिवर्त्तते
नदाह सांतवस्वंतस्येति वसुः प्रत्ययस्तेन तदंतग्रहणमितिभावः वसुस्रंसेभ्यः सस्यनु तग्र
हणं व्याख्यानात् स्रस्तुध्वंस्योस्तु सांतेन विशेषणमव्यभिचरात् नचतयोर्विचि सुपि संयो
गांतलोपे व्यभिचारोस्त्वेवेतिवाच्यं स्रस्तुध्वंस्योरनभिधानेन विचोऽभावात् क्विपः सार्वत्रिकत्वाच्च
अत एव भाष्यकृता सस्येत्यननुवृत्तावुपपिवानित्यत्रैव दत्वशंकाकृतानानुवृत्तौ चानडुह्यामि
त्यत्रैव दत्वाभावशंकाकृतेति दिक् सहेः सा अपदांतस्य मूर्धन्य इत्यधिक्रियते सेहः रितिकिम्
यस्यनाम्नि उ शब्दोस्ति सडेन सह सउस्तदपत्यं साडो माभूदिति लोके त्विति एतेन तुराषा
ण्मेघवाहन इत्यादौ णिर्वकुलेभः प्रागेव लुषत्वमिति हरदत्तः परास्तः नहि इतीति सूत्रे
णत्विंतसहावेव दीर्घविधानादिति अन्येषामपीति न रनुबंधकपरिभाषालभ्यार्थमाह प्रा
तिपदिकस्येति तेन अक्षद्यूरित्यादौ अंतरंगत्वादूठि स्थानिवत्त्वेन दिवुत्वेपि नोत्वं दिवुधातोः +
सानुबंधकत्वात् स्पष्टं चेदमत्र भाष्ये अत एवाक्षद्यूरित्यत्र सावपि पदमिति पदत्वे उत्वमपि न
नचैवं डिवि प्रत्ययांतोपि सानुबंधकः प्रत्ययस्य तथात्वेपि तदंतस्यातथात्वादिति दिक् ओ
तस्तकार उच्चारणार्थः नत्विसंज्ञकः फलाभावात् नच तित्करितत्वं फलं तिति प्रत्ययग्रह
णं कर्तव्यमिति वार्त्तिकेन प्रत्यय अत एव तस्य लोप इति सूत्रे भाष्येनुबंधानामेकांतत्वादिव ओदित्या
दीनां सर्वादेशत्वापादनं संगच्छते एवं विधेयविषये उच्चारणार्थोचामपि अननुनासिकत्वेन सं

त्वाभवत्येव अत एव वेदं छन्दस्येति सूत्रभाष्ये ऽ छन्दस्य ग्रहणाभावेद्दिविरित्यादौ लोपमशंक्यानुनासि
कः परीयस्य तात् इत्यस्य विधायकस्य ग्रहणमित्युक्तं संगच्छते अनुवादविषये त्वित्संज्ञाशास्त्राप्रवृत्ते
रुच्चारणार्थवर्णसहितसमुदायस्य तदूहितेन लक्षणेति तत्वेन विधेयपरः शास्त्रार्थ इति विधेयबोध
के लक्षणानुचितैव न चैवं णो गमिरित्याद्यादेशानां नुमापत्तिः हुडुत्यादिसिद्ध्यर्थमावश्यका
त् धात्वपदेशे इदितो नुमित्यर्थत्वाददोषः एवं तस्यापि प्रत्ययाप्रत्ययोरिति परिभाषया प्रत्ययस्यैव।
ग्रहणाच्च वस्तुतस्तु अनुवादे उच्चारणार्थत्वेपि विधेयविषये तत्वं प्रमातुमशक्यं अपूर्वविधानेन
तांतत्वांत स्यैव विधानमित्यस्याप्यापत्तेः तस्मादित्संज्ञैवोचिता किंच हृदिच हृतीयवर्णोच्चारणे।
सहायसंपादनेन चरितार्थेषु तत्र तत्र विशेषणार्थेषु इवप्राप्तहले त्यस्य त्राप्रवृत्तौ मानाभा
वात् उच्चारणार्थोत्तु अनुनासिकत्वे मानाभावेन नेत्संज्ञाव्याप्त्यानात्नूतदूहितस्यैव विधानं
उच्चारणार्थवर्णसहितसमुदायस्य तदूहितेन लक्षणेति तत्वं यथैव्यवं प्रकृतेपि सुवचं तथापि प्रा
प्त शास्त्रबाधेन मानं सर्वत्र लक्षणैकचक्षुष्काग्रयणीयेत्यत्र मानाभावात् तांधिनेवोपपत्तेः अत एव त
स्य लोप इति भाष्ये नुबंधानामेकांतत्वे दिव औदित्यादीनां सर्वादेशत्वापादनं संगच्छते स्वराश्र
ति स्तु प्रागुक्तयुक्त्यैवेति वाध्यं न च यद्योष्वितः पथ्यति मात रधुगिति पठ्यमान स्वरितविरोध इति।
वाच्यं दिवेर्डि विरिति व्युत्पत्तिपक्षे प्रत्ययस्वरेण अव्युत्पत्तिपक्षे फिट्स्वरेणैकारस्योदात्तत्वे स्व
सनधर्मणो हलः स्थाने न्यायमतत्वे नौकारस्यानुदात्तत्वे पणौ उदात्ते स्वरितयोर्यणः इत्यनेन स्व।

रिनसिद्धेः नचैवं पृथिवीउतद्यौरिति पठ्यमानां नोदात्तत्वविरोधः घोशाद्व्यस्यसत्वात् दिवउदि
तिसूत्रे उकारस्य नोदात्तो निपात्यते तेन द्युभिरक्तुभिरिति पठ्यमानां नोदात्तत्वं सिद्धं नचनिपात
नस्वरसामर्थ्याद् ऊडिदमित्यादि विभक्तिस्वराशङ्कादिवोझलिति तन्निषेधोव्यर्थ इति वाच्यं विभ
लघुरित्यादावन्तरङ्गप्रकृतिस्वरबाधेन चरितार्थत्वादित्याहुः लोपोनेति अनल्विधावित्यत्रप
चमीसमासस्याप्याश्रयणादितिभावः पदान्तइति पदान्तादित्यनुवृत्तस्य विभक्तिविपरिणाम इ
तिभावः स्तुपुभ्यामिति ऊठत्वन क्ङितीत्यनुवृत्तेः अर्थाधिकारेण धातुविहितत्वसत्वाद्दिप्र
त्ययस्यैवग्रहणेनोठोऽप्राप्तेश्च नन्वत्रौकारस्य स्थानिवत्वाद्धत्वेन लोपः स्यात न चवत्वेना
शास्त्रीयस्यं रूपमणुदिदितिच परिभाषणेनतस्य शास्त्रीयत्वात् नचतथापितस्यहत्वाप
पेतयाविशेषधर्मत्वात्कथमतिदेशः स्थानिवदितिसंग्राहकवाक्यात्तत्तदादेशविधावुद्देश्यप
नावच्छेदकावच्छिन्नतत्तत्स्थानिविषयके पुवकारवदुकारइत्यादिवाक्ये उपस्थितधर्मोपेत
याविशेषधर्मत्वाभावात्स्थानिवत्सूत्रेविशेषातिदेशस्यापि सत्वाच्चेतिचेन्न अल्विधित्वात् अ
त्रहलइतिदीर्घो न तद्भावितपदाश्रयणात् अन्यत्तुभाविदीर्घस्यपरत्वेनवारणात् नदोषः
अन्यथाउइतिनपुंसकनिर्देशेनैवसिद्धौ नहैयर्थ्यस्पष्टमेव नचैवसूत्रस्यादोषावितिदीर्घो
पिनस्यात् बहिरङ्गतयाचाविनस्यासिद्धत्वेनवारयितुमशक्यात् घकामहत्यत्रसंप्रसारण
सेत्युत्तरपदनिमित्तदीर्घस्य बहिरङ्गोपि न प्रत्यासत्तिन्यायेनोत्तरपदनिमित्तसंप्रसारणए

२११ 211

प्रा॰शो॰ वतस्तत्रवृत्तेः स्पष्टंचेदं भाष्यकैयटादौ न च तपरसूत्रं विध्यर्थं परत्वाद्गणिवद्धस्य प्रवृत्तिरिति भाष्ये ऽसि
द्धं तितत्वेनास्मात्रचविधेयत्वेन तदप्रवृत्त्या वाक्यभेदापत्तेन परत्वेन भाविदीर्घव्यावृत्तिर्दुर्लभेति वाच्यं अ
प्रत्यय इत्यस्यासंबंधेन विधेयविशेषेऽपि प्रवृत्तेः सत्त्वात्प्रवृत्तावपि तपरत्वसामर्थ्येन ह्रस्वस्य फलता+
नीयफलकल्पनस्यैवौचित्यात् अत एव तपरत्वसामर्थ्यात्कुरुतइत्यादौ न गुण इति स्थानिवत्सूत्रक
टीकामित्याहुः तित्स्वरितमितिसूत्रे पाठांतरं अस्य तपरत्वस्य भाव्यमाने उकारे सवर्णग्रहणज्ञाप
कतया भाष्ये उक्तत्वेन विमलयु इत्यादौ साक्काशोत्थापत्तया परत्वाच्च अभ्यामित्यादौ कृतिनीत्यनुर
त्रिपदत्वे कोटिन्तृठि पुनः प्रसंगविज्ञानेन ह्रस्वो विध्यर्थेन तपरत्वमिति प्रकृतिसूत्रभाष्ये उक्तत्वेन
चायुक्तमेतदित्यन्ये इत्यंतं ऽस्य तपरत्वस्य भाव्यमानसवर्णग्राहकताज्ञापकत्वस्य भाष्ये उक्तत्वे
नतद्विरोधायुक्तमेतदित्यन्ये षड्भ्यश्च ननुलौनेतिसूत्रे रेफग्रहणे ऽपेल्लरेफांतस्यापि ष
ट्संज्ञाविधेयाकिंतत्र षट्तीत्यत्र चतुर्ग्रहणेन निवृत्तिरन्यत्रे रेफांतत्वेन षड्ङेऽपि संनिपातपरि
भाषया न षड्भ्य इति लुक् अत एव त्रीणीत्यत्र न दोष इति चेन्न चत्वार इत्यादौ नुगापत्तेः ननु
तिषेधार्थं तैनेत्यादि यत्नेनतु पाठांतरं पदत्वाद्यभावाच्च तस्य एणामित्यत्र कार्यकालपक्षे
षट्त्वस्यादौ लभ्येत षट्स्वराणां पत्रिश्चेति सूत्राशयः इत्यंतं विपरीतं गौरवं नचैवमपि ष
ट्त्वितरनुभयोर्हलादिरित्यत्र चतुर्ग्रहणाकरणेन लाघवं च तस्य एणामित्यादौ प्रग्रहसं।
प्रकरणोक्तरीत्या स्थानिवद्भावेन षट्त्वात्षट्स्वरसिद्धिरिति वाच्यं चतुर्थ्येवाच तत्त्वः श्रावेनु

उपपर्वचनत्वेऽग्रहणस्याव्यापकत्वात् न च ससंख्यावाचीऽस्त एव वाचनत्र्यर्थ अभिन्नार्थकमोचत्वारेही
मेहुंहुंमिश्युनायेनेऽतिहुंहुंरहस्येति सूत्रस्य रत्नाद्युदाहरणं संगच्छते अत एव लृति
सूत्रेऽर्धचतस्रो मात्रा इति प्रयोगः सार्धमात्रात्रयमित्यर्थे प्रयुक्तः संगच्छते अर्धेन चतस्रः
स्यादिव्याख्याने तु समन्तसंश्रयमपि बहुवचनान्तत्व एवेति न च तुरः शासीति सूत्रस्य भाष्यविरो
धः स्यालंणान्तं द्वित्वमिति न च पूर्वत्रासिद्धमद्विर्वचने इति णत्वात् पूर्वं द्वित्वमेव युक्तं द्वित्वे कर्त
व्ये ऽस्य स्यासिद्धत्वेन त्वेव तदर्थान्नु न तु द्वित्वस्यासिद्धत्वं वार्यते यत्र द्वित्वे परसवर्णत्वसिद्ध
मिति वचनसामर्थ्येन वर्णद्वित्वे तदप्रवृत्तिः न चेदं व्यर्थमेव अनुस्वारस्येव द्वित्वेऽस्य स्यो आप।
दां तस्येति परसवर्णेऽस्याप्यस्यान्तमेयं निमित्ती कृत्यानुस्वारस्यापीति परसवर्णे द्विपका
रसंध्यं तेऽस्यासिद्धेरिति वाच्यं वा पदान्तस्येत्यस्यासिद्धत्वान्नदिति न च द्वित्वे यत्वटत्वादी।
नि सिद्धानीति वचनसामर्थ्येन सर्वस्यैव द्वैरन्यत्रापि तदप्रवृत्तौ वचनवैयर्थ्यापत्तेः पूर्वत्रासि
